महर्षिपाणिनिप्रणीतः

# अष्टाध्यायीसूत्रपाठः

## प्रकरणनिर्देशसमन्वितः

पुष्पा दीक्षित

## ग्रन्थमिमधिकृत्य किञ्चित्

नभस्यादित्यं परितो ग्रहा इव बम्भ्रमीति निखिलो वैदिको लौकिकश्च शब्दराशिः पाणिन्यष्टाध्यायीं परितः। भगवता पाणिनिना महति समाधियोग आस्थायास्य निखिल-शब्दराशेः प्रत्यक्षमेककालावच्छेदेन कृतमत एव तत्र न किमपि रिष्यति। अत्राष्टस्वध्यायेषु विभक्तानि सूत्राणि शब्दस्यान्तः प्रविश्य, प्रकृतिं प्रत्ययं च विभज्य, तत्रत्यं सर्वं प्रकाशयन्ति। एतत् सर्वमद्भुतमिव यद् भगवता पाणिनिना शब्दानां सिद्ध्यर्थं शब्दा नोक्ता अपितु तत्रत्यान् लोपागमवर्णविकारान् मनस्याकलय्यैकैकस्य कार्यस्य कृते सूत्राणि प्रोक्तानि। तानि च सूत्राण्यधिकारेषु प्रकरणेषु च निबद्धानि सन्ति। एकैकस्मिन् प्रकरण एकैकं कार्यं निःशेषीक्रियते, येन तद्विषयिविचिकित्साव्यपोहो जायते। सन्ति चैतानि प्रकरणान्यष्टाध्याय्यां तिलतण्डुलवद् विभक्तानि, येषां विज्ञानेन शब्दसाक्षात्कारो भवति। महता देवेन सायुज्यमप्यनेनैवाधिगम्यते। अधिकाराणां, प्रकरणानां च विज्ञानं विहायाष्टा-ध्यायीसूत्रपाठोऽपि निगदेनैव शब्द्यमानः कामान् दोग्धुं नालं भवति, का कथा पुनरष्टाध्यायीं विना प्रक्रियाग्रन्थेषु कृतस्यान्धयत्नस्य।

सर्वेषां शास्त्राणां मुखं व्याकरणम्। तस्माच्च बिभेति लोकः प्रक्रियाकाठिन्यात्। अतो मयाष्टाध्याय्याः स्वतः प्रकाशितः पन्थाः प्रकरणानां विभाजनं प्रदर्श्य सर्वदृग्गोचरीकृतः। पाणिनेरिदं महत्सुविहितं सामान्यविशेष-वल्लक्षणमाश्रित्य विश्वस्य कापि भाषा व्याकर्तुं शक्यते अतः सर्ववेदपारिषदं हीदं शास्त्रम्। अष्टाध्याय्याः सर्वविषयप्रकाशनायाथ च पाणिनेः प्रक्रियाविज्ञानावगमाय प्रकरणनिर्देशसमन्वितो-ऽयमष्टाध्यायीसूत्रपाठो ज्ञानप्रदीपो भविष्यति शब्दान् व्याचिकीर्षूणाम्।

23 cm. pp. 192 2009 रु० 400

महर्षिपाणिनिप्रणीतः

# अष्टाध्यायीसूत्रपाठः

## प्रकरणनिर्देशसमन्वितः

पुष्पा दीक्षित

ज्ञानभारती पब्लिकेशन्स

दिल्ली भारत

# AṢṬĀDHYĀYĪ SŪTRAPĀṬHAḤ

**of Maharṣi Pāṇini**

**with Prakaraṇanirdeśa**

*By*

Pushpa Dikshit

**GYANBHARATI PUBLICATION**

**DELHI** **INDIA**

# समर्पणम्

आचार्य-डॉ०राधावल्लभत्रिपाठी

विविधविद्याविद्योतितान्तःकरणेभ्यः साहित्याकाशे प्रसृतयशोवितानेभ्यः
शास्त्रविचक्षणैरनारतं परिगृहीतेभ्यो नाट्यशास्त्रतत्त्वज्ञेभ्यो
राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिपदमलङ्कुर्वाणेभ्यो
ऽनुजकल्पेभ्य आचार्य-डॉ०राधावल्लभत्रिपाठिभ्यः
कृतिमिमां सादरं समर्पयति

दीक्षितपुष्पा

# शुभाशंसा

पाणिनीयव्याकरणमष्टाध्यायीनाम्ना प्रथितं जगतीतले। यन्त्रेण यथा बहूनि वस्तूनि निर्मातुं शक्यन्ते, तथैवाष्टाध्यायीसूत्रसाहाय्येन सर्वे लौकिका, वैदिकाश्च संस्कृतशब्दा यान्त्रिकरीत्या व्युत्पादयितुं शक्यन्ते। पाणिनिकाले संस्कृतभाषा लोकभाषासीत्। पतञ्जलिसमये शिष्टभाषात्वेन व्यवहृतेयं भाषा। तस्याः समग्रपरिज्ञानायाबाल्यादेवाष्टाध्यायीपाठो भवेत्। तदनन्तरं छात्राः सवार्तिकं महाभाष्यमधीत्य कौशलमधिगच्छेयुः। यतः सूत्रेष्वेव सूत्रार्थो निहितः। स च छात्रैः सूत्रैरेव बोधनीयः। अष्टाध्यायीपाठाभावादेवानुवृत्तिविषये सर्वथाऽनभिज्ञाः एव प्रायेण दरीदृश्यन्ते।

शब्दसाधनावस्थायां प्रयुज्यमाना गुण-वृद्धि-ह्रस्व-दीर्घ-लोप-षत्व-णत्व-ङित्व-कित्व-इट्-परस्मैपद-आत्मनेपद-कारक-विभक्ति-समास-संहिता-नुमागम-नलोपेत्यादयो विधयोऽष्टाध्याय्यां प्रकरणेषु समवेतरूपेण सुसज्जिता वर्तन्ते, किन्त्वधुनोपलभ्यमानेष्वष्टा--ध्यायीपाठेष्वेतेषां प्रकरणानां निर्देशो न वर्तते। केवलं मूलमात्रं समुपलभ्यते। अतः पाठवेलायामेषां झटिति परिज्ञानं न जायते। एतदर्थं डॉ. पुष्पादीक्षितमहोदयाभिरेकोऽभिनवः प्रयासो विहितः। सर्वथैकां नूतनां परिकल्पनां मनसि निधायाष्टाध्याय्याः प्रकरणनिर्देश-समन्वितः पाठः सम्पादितः। येन पाठेन सहैव प्रकरणानामपि ज्ञानं भवेद्।

अत्र सूत्रपाठस्यादौ सूत्राणां विभागोऽपि महता कौशलेन कृतः। संज्ञा-परिभाषा-ऽतिदेशाधिकाराः पृथक्कृत्य प्रदर्शिताः। अवशिष्टविषयस्य निर्देशः प्रकरणनिर्देशपूर्वकं कृतः। अनुक्रमणी च द्विविधा व्यवस्थिता - विषयानुक्रमेणाथ चाष्टाध्यायीप्रकरणानुक्रमेण। एतादृशं कार्यमद्यावधि न केनापि कृतमिति सर्वथा प्रशंसार्हो यत्नः पुष्पादीक्षितमहोदयानाम्। ग्रन्थस्यास्य प्रकाशनेन व्याकरणाध्येतॄणां महानुपकारो भविष्यतीति न सन्देहः।

राष्ट्रपतिसम्मानेन विभूषिता डॉ.श्रीमतीपुष्पादीक्षितमहोदया 'अष्टाध्यायी-सहजबोध'नाम्ना चतुरो ग्रन्थानथ चार्धधातुकप्रत्ययानामिडागमव्यवस्थेत्यादीन् ग्रन्थान् विरचय्य देदीप्यमानां कीर्तिं स्थापितवती। तासां नवीनतमा चिन्तनधारा सर्वथानुपमा--भिनन्दनीया च। ताभिः प्रणीतोऽयं व्याकरणग्रन्थो विश्वविश्रुतो भवत्विति प्रार्थये-ऽहमनाथनाथस्य नीलाचलनाथस्य सर्वविद्योद्भावकस्य श्रीजगन्नाथस्य चरणकमलयोः -

प्रो. किशोरचन्द्रपाढीः

आचार्योऽध्यक्षश्च व्याकरणविभागे

श्रीजगन्नाथसंस्कृतविश्वविद्यालये, उत्कलप्रदेशे।

# अवश्यवक्तव्यम्

बहूनि व्याकरणतन्त्राणि प्रोक्तानि बहुभिर्महर्षिभिर्भगवतः पाणिनेः प्रागपि, किन्तु तत्र न विद्यते साङ्गत्वम्। सूत्रपाठो, धातुपाठो, गणपाठ, उणादिपाठो लिङ्गानुशासनञ्चेति मिलित्वा पञ्चाङ्गं भवति व्याकरणम्। तच्चास्ति पाणिनीये। अथ च वैदिकशब्दानामनुशासनाद् वेदाङ्गत्वमपि। अतश्च प्राचीनेषु सकलेषु व्याकरणशास्त्रेषु पाणिनीयं व्याकरणं प्राधान्यं भजते। द्वादशशताब्द्याः प्राङ् नैकोऽपि प्रक्रियाग्रन्थ आसीत्। तदा शास्त्राणां, महाकाव्यानां च प्रणेतारोऽपि पाणिन्यादीनामाचार्याणां ग्रन्थक्रमेणैव व्याकरणमधीत्यापारशब्दशास्त्रपारं जग्मुः।

प्रक्रियाग्रन्थानां प्रणेतारोऽष्टाध्यायीं पुरस्कृत्याष्टाध्यायीसाधनायैव प्रक्रियाग्रन्थान् विरचयामासुः। अतश्च लिखितवन्तो भट्टोजिदीक्षितमहाभागाः सिद्धान्तकौमुद्या लौकिक-
-भागस्यान्ते -

इत्थं लौकिकशब्दानां दिङ्मात्रमिह दर्शितम्।
विस्तरस्तु यथाशास्त्रं द्रष्टव्यं शब्दकौस्तुभे।।

सर्वथा सत्यमिदं वचनं, यतः प्रक्रियाग्रन्थेषु सूत्रस्य तावानेवार्थः प्रकाशमेति यावतेष्टप्रयोगसिद्धिः संजायते। अवशिष्टार्थस्तु बुद्धिगम्य एवावसीयते।

अतश्च यथाष्टाध्यायीं पुरस्कृत्य प्रक्रियाग्रन्था विरचितास्तथैवाष्टाध्यायीं पुरस्कृत्यैव तेऽध्येतव्या अपि। किन्तु प्रक्रियाग्रन्थानामवतारानन्तरं राष्ट्रेऽस्मिन्नपूर्वः कोऽपि क्रमः प्रादुरभूत्, यत्र पाणिन्यष्टाध्यायीमनवलोक्यैव सर्वं पाणिनीयशास्त्रमधीयते। अत्रैकैकं प्रयोगं पुरस्कृत्य तत्साधनाय सर्वाणि सूत्राण्युपस्थाप्यन्ते, बहुभिश्च तैः सूत्रैरेक एव प्रयोगः साध्यते। तान्येव सूत्राणि यद्यष्टाध्यायीं विज्ञाय पठ्येरन्, तदा तैरेव सूत्रैरनन्तः शब्दराशिः साधयितुं शक्येत। अतश्च पुना राष्ट्रेऽस्मिन्नष्टाध्यायीसूत्रपाठेन पदं न्यधायि।

दुश्चरतपसा भगवान् पाणिनिर्निखिललौकिकवैदिकशब्दराशेः प्रत्यक्षमेककाला-
-वच्छेदेन कृत्वा प्रकृत्यादिविभागकल्पनया सामान्यविशेषवता लक्षणेनापूर्वमिदं शास्त्रं कृतवान्, येनाखिला लौकिका, वैदिकाश्च शब्दा अल्पीयसा कालेन सिध्यन्ति।

अष्टाध्यायीविषयास्त्रिषु भागेषु विभक्ताः प्रतीयन्ते -

१. प्रथमद्वितीयाध्याययोः वाक्येभ्यः पदानां संकलनम्।

२. तृतीयचतुर्थपञ्चमाध्यायेषु पदानां प्रकृतिप्रत्ययविभागः।

३. षष्ठसप्तमाष्टमाध्यायेषु प्रकृति-प्रत्ययैः सह आगमादेशादीनां संयोजनेन परिनिष्ठितपदानां निर्माणञ्च।

यथा भगवान् भास्करोऽखिलं विश्वं प्रकाशयति तथैव पाणिनेरेकैकं सूत्रमप्यखिलं लौकिकवैदिकशब्दराशिं प्रकाशयति।

प्रक्रियाक्रमे फक्किादीनां दुरूहत्वमनुभूय छात्रा व्याकरणाध्ययनात्पराजयन्ते। किन्तु पाणिनीयशास्त्रेऽस्मिन् गुणवृद्धिदीर्घनलोपनुमागमसम्प्रसारणादीनां कार्याणां कृत एकैकं प्रकरणं वर्तते, यस्य विज्ञानेन तत्कार्यं निखिललौकिकवैदिकशब्दराशिषु कर्तुं शक्यते। तत्र न किमपि रिष्यति। यद्यष्टाध्याय्या अधिकारप्रकरणविभाजनमविज्ञाय तस्याः पाठो नित्यमपि क्रियेत, तदा निगदेनैव शब्दायमानोऽन्धधावनमिव स निष्फलतामेति, इति भूयो भूयो मनस्यवकलय्य मयाधिकारप्रकरणनिर्देशसमन्वितो नवीनोऽयमष्टाध्यायीसूत्रपाठो महता यत्नेन यथामति विरचितः, येन कार्याणां विज्ञानं पाठेन सहैव स्वयमेव जायते।

सूत्रेषु '-' अयं चिह्न उच्चारणसौकर्याय दत्तो, न तु सन्धिविच्छेदाय। अनेन पाठशुद्धिर्भविष्यति। यतः पाठकाले सन्धिविच्छेदस्तु नैवापेक्ष्यते।

विषयानुक्रमण्यां पाणिनीयाष्टाध्याय्याः सर्वाः संज्ञाः, सर्वाः परिभाषाः, सर्वेऽतिदेशा अधिकाराश्च निष्कृष्यादौ पठिताः। विधयोऽधिकारा नियमाश्च प्रकरणेषु निबद्धाः सन्तीति, तेषां विभागस्तेषु तेष्वध्यायेष्वेव पृथक्कृत्य प्रदर्शितः। अनया सर्वाष्टाध्यायी हस्तामलकवद--वलोकितुं शक्यते।

प्रथमे दिवसेऽस्या द्वावध्यायौ, अनन्तरमेकैकः प्रतिदिनमिति कृत्वा अस्याः सप्ताहपारायणेन पाणिनीयशास्त्रे निर्बाधगतिर्भवति। यद्येनामधिगत्य पुरस्कृत्य च सिद्धान्तकौमुद्यादयो ग्रन्था अधीयेरन्, तदा सूत्रेष्वनुवृत्तिविषयिणी, पौर्वापर्यविषयिणी न जनिष्यते विचिकित्सापि। अथ च सूत्रस्य निखिलोऽर्थो बुद्धौ स्फुटीभविष्यति।

भवानीशंकराविव मातापितरौ जानकीसुन्दरलालशुक्लौ प्रणम्य, गुरुचरणान् आचार्यविश्वनाथत्रिपाठिमहाभागान्, आचार्य-डॉ.बच्चूलालावस्थिमहाभागान् हृदि निधाय, अथ चाचार्यरामयत्नशुक्लमहाभागान्, आचार्यरामकरणशर्ममहाभागान् भूयो भूयोऽभिवन्द्य मदीयः संकल्पोऽयं पूर्णतामुपगतः। महत्यस्मिन् कार्ये वैयाकरणतल्लजाया डॉ. पाठकमनीषायाः साहाय्यं प्रतिपदं लब्धमिति ताः सादरं स्मर्तव्याः। अथ च यैरस्य ग्रन्थस्य पाठशोधनं महत्या सूक्ष्मेक्षिकया कृतं त आचार्यडॉ.बलरामशुक्लमहाभागा अपि महत्त्वमस्य कार्यस्य मीमांसमानाः सर्वथा शुभाशीर्भाजः। कार्येऽस्मिन् रतस्य शिष्यस्याऽभिजिद्-दीक्षितस्य, अथ च पाणिनीयशास्त्रम--धीयानाया माधुरी तामस्कर इत्यस्याः पाणिनीयशास्त्रेऽव्याहतगतिर्भूयादिति कामये। छात्रश्चन्दनजैनोऽपि टङ्कणादिषु सहकारीत्यविस्मर्तव्यः। येषां वामाङ्गे निषद्य मयाहर्निशं सेव्यते भगवान् पाणिनिस्ते दीक्षितशिवप्रसादमहाभागा अपि वन्द्याः। यस्य भ्रुकुटिविलासेनैव सृष्टिलयौ भवतस्तस्यैव कृपाकटाक्षेण कार्यमिदं निष्पन्नमिति तच्चरणयोः प्रणमतीयम् ----

गीता-जयन्ती
२०६६ विक्रमाब्दे।
९.१२.२००८ दिनाङ्के

# विषयानुक्रमणी



## अष्टाध्यायीसूत्रपाठः

### ( प्रकरणनिर्देशसमन्वितः )

# अष्टाध्यायीविषयानुक्रमणी

अस्यामनुक्रमण्यां पाणिनीयाष्टाध्याय्याः सर्वाः संज्ञाः, सर्वाः परिभाषाः, सर्वेऽधिकाराः, सर्वेऽतिदेशाश्च निष्कृष्यादौ पठिताः। विधयो नियमाश्च प्रकरणेषु निबद्धाः सन्तीति, तेषां विभाग एतदनन्तरं तेषु तेष्वध्यायेष्वेव पृथक्कृत्य प्रदर्शितः।

## संज्ञाः

५३. गतिसंज्ञा १.४.६०-७९
५४. परस्मैपदसंज्ञा १.४.९९
५५. उत्तमसंज्ञा १.४.१०१
५६. प्रथमसंज्ञा १.४.१०१
५७. मध्यमसंज्ञा १.४.१०१
५८. एकवचनसंज्ञा १.४.१०२-३
५९. द्विवचनसंज्ञा १.४.१०२-३
६०. बहुवचनसंज्ञा १.४.१०२-३
६१. विभक्तिसंज्ञा १.४.१०४
६२. अवसानसंज्ञा १.४.११०
६३. उपसर्गसंज्ञा १.४.५९
६४. कर्मप्रवचनीयसंज्ञा १.४.८३-९८
६५. आत्मनेपदसंज्ञा १.४.१००
६६. संहितासंज्ञा १.४.१०९
६७. समाससंज्ञाधिकार: २.१.३
६८. अव्ययीभावसंज्ञा २.१.५
६९. तत्पुरुषसंज्ञा २.१.२२
७०. द्वन्द्वसंज्ञा २.२.२९
७१. द्विगुसंज्ञा २.१.२३
७२. बहुव्रीहिसंज्ञा २.२.२३
७३. आमन्त्रितसंज्ञा २.३.४८
७४. सम्बुद्धिसंज्ञा २.३.४९
७५. प्रत्ययसंज्ञा ३.१.१
७६. धातुसंज्ञा ३.१.३२ (आतिदेशिकधातव:)
७७. उपपदसंज्ञा ३.१.९२
७८. कृत्संज्ञा ३.१.९३
७९. कृत्यसंज्ञा ३.१.९५
८०. सत्संज्ञा ३.२.१२७
८१. सार्वधातुकसंज्ञा ३.४.११३
८२. आर्धधातुकसंज्ञा ३.४.११४-११७
८३. तद्धितसंज्ञा ४.१.७६
८४. गोत्रसंज्ञा ४.१.१६२
८५. युवसंज्ञा ४.१.१६३-१६७
८६. तद्राजसंज्ञा ४.१.१७४
८७ विभक्तिसंज्ञा ५.३.१
८८. तद्राजसंज्ञा ५.३.११९
८९. अभ्याससंज्ञा ६.१.४
९०. अभ्यस्तसंज्ञा ६.१.५
९१. आम्रेडितसंज्ञा ८.१.२

**अर्थविशिष्टशब्दस्वरूपग्राहकसूत्रम्**

९२. स्वं रूपं शब्दस्याशब्दसंज्ञा १.१.६८

**सवर्णग्राहकसूत्रम्**

९३. अणुदित्सवर्णस्य चाप्रत्यय: १.१.६९
९४. तपरस्तत्कालस्य १.१.७०

**तदन्तग्राहकसूत्रम्**

९५. येन विधिस्तदन्तस्य १.१.७२

**परिभाषा:**

१. इको गुणवृद्धी १.१.३
२. आद्यन्तवदेकस्मिन् १.१.२१
३. आद्यन्तौ टकितौ १.१.४६
४. मिदचोऽन्त्यात्पर: १.१.४७
५. एच इग्घ्रस्वादेशे १.१.४८
६. षष्ठी स्थानेयोगा १.१.४९
७. स्थानेऽन्तरतम: १.१.५०
८. उरण् रपर: १.१.५१
९. अलोऽन्त्यस्य १.१.५२
१०. ङिच्च १.१.५३
११. आदे: परस्य १.१.५४
१२. अनेकाल् शित् सर्वस्य १.१.५५
१३. प्रत्ययलोपे प्रत्ययलक्षणम् १.१.६२ ।
१४. न लुमताऽङ्गस्य १.१.६३
१५. तस्मिन्निति निर्दिष्टे पूर्वस्य १.१.६६
१६. तस्मादित्युत्तरस्य १.१.६७

१७. अचश्च १.२.२८
१८. यथासंख्यमनुदेशः समानाम् १.३.१०
१९. स्वरितेनाधिकारः १.३.११
२०. विप्रतिषेधे परं कार्यम् १.४.२
२१. समर्थः पदविधिः २.१.१
२२. वाऽसरूपोऽस्त्रियाम् ३.१.९४
२३. अनुदात्तं पदमेकवर्जम् ६.१.१५८

## अतिदेशाः

१. आद्यन्तवदेकस्मिन् १.१.२१
२. स्थानिवद्भावातिदेशः १.१.५६-५९
३. ङित्त्वातिदेशः १.२.१-४
४. कित्त्वातिदेशः १.२.५-१७
५. अकित्त्वातिदेशः १.२.१८-२६
६. लुपि युक्तवद्भावातिदेशः १.२.५१-५२
७. पूर्ववत्सनः १.३.६२
८. स्त्री पुंवच्च १.२.६६
९. आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य १.३.६३.
१०. सुबामन्त्रिते पराङ्गवत् स्वरे २.१.२
११. द्विगुरेकवचनम् २.४.१.
१२. परवल्लिङ्गं द्वन्द्व-तत्पुरुषयोः २.४.२६.
१३. कर्मवत्कर्मणा तुल्यक्रियः ३.१.८७
१४. वर्तमानसामीप्ये वर्तमानवद्वा ३.३.१३१.
१५. नानद्यतनवत्क्रिया-प्रबन्धसामीप्ययोः ३.३.१३५
१६. लोटो लङ्वत् ३.४.८५.
१७. सेर्ह्यपिच्च ३.४.८७
१८. आडुत्तमस्य पिच्च ३.४.९२
१९. कालेभ्यो भववत् ४.२.३४
२०. चरणेभ्यो धर्मवत् ४.२.४६
२१. समूहवच्च बहुषु ५.४.२२
२२. अन्तादिवच्च ६.१.८५
२३. षत्वतुकोरसिद्धः ६.१.८६
२४. अप्लुतवदुपस्थिते ६.१.१२९
२५. उत्तरपदे स्त्रियाः पुंवद्भावातिदेशः ६.३.३४-४२
२६. अम्प्रत्ययवत्त्वातिदेशः ६.३.६८
२७. असिद्धवत्त्वातिदेशः ६.४.२२-१७५
२८. स्यसिच्सीयुट्-तासिषु भावकर्मणोरुपदेशेऽज्झन-ग्रह-दृशां वा चिण्वदिट् च ६.४.६२
२९. णिद्वद्भावातिदेशः ७.१.९०-९२
३०. तृज्वत्क्रोष्टुः ७.१.९५
३१. सन्वल्लघुनि चङ्परेऽनग्लोपे ७.४.९३
३२. एकं बहुव्रीहिवत् ८.१.९
३३. कर्मधारयवदुत्तरेषु ८.१.११
३४. आमन्त्रितं पूर्वमविद्यमानवत् ८.१.७२
३५. पूर्वत्रासिद्धत्वातिदेशाधिकारः ८.२.१-८.४.६८

## अधिकाराः

### १. एकसंज्ञाधिकारः

आकडारादेका संज्ञा १.४.१-२.२.३८

### २. कारकसंज्ञाधिकारः

कारके १.४.२३-५५

### ३. निपातसंज्ञाधिकारः

प्राग्रीश्वरान्निपाताः १.४.५६-९७

### ४. कर्मप्रवचनीयसंज्ञाधिकारः

कर्मप्रवचनीयाः १.४.८३-९८

### ५. समासाधिकारः

प्राक्कडारात्समासः २.१.३-२.२.३८

**६. अव्ययीभावाधिकार:**

अव्ययीभाव: २.१.५-२.१.२१

**७. तत्पुरुषाधिकार:**

तत्पुरुष: २.१.२२-२.२.२२

**८. अनभिहिताधिकार:**

अनभिहिते २.३.१-७३

**९. तत्पुरुषे नपुंसकाधिकार:**

तत्पुरुषोऽनञ्कर्मधारय: २.४.१९-२५

**१०. आर्धधातुक इत्यधिकार:**

आर्धधातुके २.४.३५-५७

**११. प्रत्ययाधिकार:**

प्रत्यय: ३.१.१-५.४.१६०

**१२. प्रत्ययस्य परत्वाधिकार:**

परश्च ३.१.२-५.४.१६०

**१३. प्रत्ययस्याद्युदात्तत्वाधिकार:**

आद्युदात्तश्च ३.१.३-५.४.१६०

**१४. धात्वधिकार: (प्रथम:)**

धातोरेकाचो हलादे: क्रियासमभिहारे यङ् ३.१.२२-३.१.९०। अस्य सूत्रस्यैकदेशो 'धातो:' इत्यधिक्रियते।

**१५. धात्वधिकार: (द्वितीय:)**

धातो: ३.१.९१-३.४.११७

**१६. भूताधिकार:**

भूते ३.२.८४-१२२

**१७. वर्तमानाधिकार:**

वर्तमाने लट् ३.२.१२३-३.३.१। अस्य सूत्रस्यैकदेशो 'वर्तमाने' इत्यधिक्रियते।

**१८. ताच्छील्याद्यर्थाधिकार:**

आ क्वेस्तच्छील-तद्धर्म-तत्साधुकारिषु ३.२.१३४-१७७।

**१९. भविष्यदधिकार:**

भविष्यति गम्यादय: ३.३.३-१५

**२०. भावाधिकार:**

भावे ३.३.१८-११२

**२१. 'अकर्तरि च कारके संज्ञायाम्' इत्यधिकार:**

अकर्तरि च कारके संज्ञायाम् ३.३.१९-११२

**२२. स्त्र्यधिकार:**

स्त्रियां क्तिन् ३.३.९४-११२। अस्य सूत्रस्यैकदेश: 'स्त्रियां' इत्यधिक्रियते।

**२३. करणाधिकरणयो: इत्यधिकार:**

करणाधिकरणयोश्च ३.३.११७-१२५

**२४. लाधिकार:**

लस्य ३.४.७७-११२

**२५. प्रातिपदिकाधिकार:**

ङ्याप्प्रातिपदिकात् ४.१.१-५.४.१६०

**२६. स्त्र्यधिकार:**

स्त्रियाम् ४.१.३-४.१.८१

**२७. अनुपसर्जनाधिकार:**

अनुपसर्जनात् ४.१.१४-८१

**२८. तद्धिताधिकार:**

तद्धिता: ४.१.७६-५.४.१६०

**२९. समर्थाधिकार:**

समर्थानां प्रथमाद्वा ४.१.८२-५.२.१४०

**५५. मपर्यन्तस्येत्यधिकार:**

मपर्यन्तस्य ७.२.९१-९८

**५६. उत्तरपदस्येत्यधिकार:**

उत्तरपदस्य ७.३.१०-३२

**५७. द्विरुक्ताधिकार:**

सर्वस्य द्वे ८.१.१-१५

**५८. 'पदस्य' इत्यधिकार:**

पदस्य ८.१.१६-८.३.५५

**५९. 'पदात्' इत्यधिकार:**

पदात् ८.१.१७-६९

**६०. 'अनुदात्तं सर्वमपादादौ' इत्यधिकार:**

अनुदात्तं सर्वमपादादौ ८.१.१८-७४

**६१. पूर्वत्रासिद्धत्वाधिकार:**

पूर्वत्रासिद्धम् ८.२.१-८.४.६८

**६२. वाक्यस्य टे: प्लुत उदात्त इत्यधिकार:**

वाक्यस्य टे: प्लुत उदात्त: ८.२.८२-१०८

**६३. संहिताधिकार: (तृतीय:)**

तयोर्य्वावचि संहितायाम् ८.२.१०८-८.४.६८

**६४. अपदान्तस्य मूर्धन्य: इत्यधिकार:**

अपदान्तस्य मूर्धन्य: ८.३.५५-११९

**६५. 'इण्को:' इत्यधिकार:**

इण्को: ८.३.५७-११९

❀❀❀

**संज्ञा उक्ता:, परिभाषा, अतिदेशा अधिकाराश्चोक्ता:, इदानी-मवशिष्टविषयोऽष्टाध्यायी क्रमेण विभज्य प्रदर्श्यते**

**प्रथमाध्याये प्रथम: पाद:**



**प्रथमाध्याये द्वितीय: पाद:**



**प्रथमाध्याये तृतीय: पाद:**



**प्रथमाध्याये चतुर्थ: पाद:**



**द्वितीयाऽध्याये प्रथमद्वितीयपादौ**

**समासाधिकार:**




**द्वितीयाऽध्याये तृतीय: पाद:**



**द्वितीयाऽध्यायस्य चतुर्थ: पाद:**



**तत्पुरुषे नपुंसकाधिकार:**


**अन्वादेशप्रकरणम्**


**आर्धधातुकाधिकार:**

**तृतीयाध्याये प्रथमद्वितीयपादौ**

अध्यायेऽस्मिन् धातुभ्यः प्रत्ययानां विधानम् वर्तते। अत्र -

प्रत्ययाधिकारः ३.१.१-५.४.१६०

प्रत्ययस्य परत्वाधिकारः ३.१.२- ५.४.१६०

प्रत्ययस्याद्युदात्ताधिकारः ३.१.३-५.४.१६०

**धात्वधिकारः प्रथमः**

३.१.२२-९०

अत्र ३.१.५-३१ इति यावद् धातुभ्यो विहिताः सनादयो धातुप्रत्ययाः। ३.१.३३-८६ इति यावद् धातुभ्यो विहिता विकरणप्रत्ययाः। ३.१.८७-८९ यावत् कर्मवद्भावः।

**धात्वधिकारो द्वितीयः**

३.१.९१-३.४.७६

अत्र धातुभ्यो विहिताः कृत् प्रत्यया लकारप्रत्ययाश्च सन्ति।

**कृत्यप्रत्ययाः**

३.१.९५-१३२

**कृत्प्रत्ययाः सामान्याः**

३.१.१३३-३.२.८३

**भूताधिकारः**

३.२.८४-१२२

अत्र भूतार्थे लकारप्रत्ययाः, कृत्प्रत्ययाश्च

**वर्तमानाधिकारः**

३.२.१२३-३.३.१

अत्र वर्तमानार्थे लकारप्रत्ययाः, कृत्प्रत्ययाश्च।

**वर्तमाने शित्प्रत्ययाः**

शतृ, शानच्, चानश् शानन्

३.२.१२३-१३३

**वर्तमाने ताच्छील्याद्यर्थाधिकारः**

३.२.१३४-१७८

अत्र ताच्छील्याद्यर्थे वर्तमाने कृत्प्रत्ययाः।

**वर्तमाने डु-ष्ट्रन्-इत्र-क्त-प्रत्ययाः**

३.२.१७९-१८८

**तृतीयाध्याये तृतीयचतुर्थपादौ**

**भविष्यदधिकारः**

३.३.३-१५

अत्र भविष्यदर्थे लकारप्रत्ययाः, कृत्प्रत्ययाश्च।

**इत उत्तरं त्रिषु कालेषु कृत्प्रत्ययाः।**

**भावाधिकारः**

३.३.१८-३.३.११२

अधिकारेऽस्मिन् भावे कृत्प्रत्ययाः। अकर्तरि च कारके संज्ञायाम् इत्यधिकारः ३.३.१९-११२ इति यावत्।

**स्त्र्यधिकारः**

३.३.९४-११२

अधिकारेऽस्मिन् अकर्तरि कारके, संज्ञायां, भावे, स्त्रियाम् कृत्प्रत्ययाः।

**कृत्यल्युट्प्रत्ययानामर्थनिर्देशः**

३.३.११३

भावे क्त-ल्युट्प्रत्ययौ ३.३.११४-११६

**करणाधिकरणयोः प्रत्ययाः**
३.३.११७-१२५

**कृच्छ्राकृच्छ्रार्थेषु प्रत्ययाः**
३.३.१२६-१३०

वर्तमानवत्प्रत्ययाः ३.३.१३१
भूतवत्प्रत्ययाः ३.३.१३२
लकारप्रत्यया, लकारार्थेषु विहिताः कृत्प्रत्यया, लकारार्थाश्च ३.३.१३३-३.४.५
अत्रैव लकारार्थेषु विहिताः कृत्प्रत्यया अपि।
वैदिकाः कृत्प्रत्ययाः ३.४.६-१७

**लौकिकाः कृत्प्रत्ययाः**

खमुञ्, क्त्वा, णमुल्, तुमुन् ३.४.१८-६६

**कृत्प्रत्ययानां लकाराणां चार्थाः**
३.४.६७-७६

**लाधिकारः**
अत्र लादेशास्तिङः, तिङादेशाश्चान्ये।
३.४.७७-११७

**चतुर्थाध्यायस्य १,२,३ पादाः**

**ङ्याप्प्रातिपदिकात् ४.१.१**
इतः प्रातिपदिकाधिकारः ४.१.१-५.४.१६० इति यावत्

स्वादिप्रत्ययाः ४.१.२

**'स्त्रियाम्' इत्यधिकारः**
४.१.३-८१ इति यावत् स्त्रीप्रत्ययाः

**तद्धिताधिकारः**
४.१.७६-५.४.१६०

**समर्थाधिकारः**
४.१.८२-५.२.१४०
अत्र पञ्चमहोत्सर्गप्रत्ययेषु तद्धितार्थानां विभाजनम् वर्तते

**१. अणधिकारः प्राग्दीव्यतीयः**
४.१.८३-४.३.१६८
अधोनिर्दिष्टेषु ४४ प्राग्दीव्यतीयेष्वर्थेषु अण् प्रत्ययोऽधिकृतो वेदितव्यः

१. तस्यापत्यम् ४.१.९२-१७८
२. तेन रक्तं रागात् ४.२.१
३. नक्षत्रेण युक्त कालः ४.२.३
४. दृष्टं साम ४.२.७
५. परिवृतो रथः ४.२.१०
६. तत्रोद्धृतममत्रेभ्यः ४.२.१४
७. संस्कृतं भक्षाः ४.२.१६
८. सास्मिन्पौर्णमासीति संज्ञायाम् ४.२.२१
९. सास्य देवता ४.२.२४
१०. तस्य समूहः ४.२.३७
११. विषयो देशे ४.२.५२
१२. सोऽस्यादिरितिच्छन्दसः प्रगाथेषु ४.२.५५
१३. तदस्यां प्रहरणमिति क्रीडायां णः ४.२.५७
१४. तदधीते तद्वेद ४.२.५९

**चतुरर्थाः**

१५. तदस्मिन्नस्तीति देशे तन्नाम्नि ४.२.६७
१६. तेन निर्वृत्तम् ४.२.६८
१७. तस्य निवासः ४.२.६९
१८. अदूरभवश्च ४.२.७०

**अथ शेषे इत्यधिकारः**

'४.२.९२' इत्यारभ्य 'तस्य विकारः ४.३.११४' इति यावत्

१९. तत्र जातः ४.३.२५
२०. कृतलब्धक्रीतकुशलाः ४.३.३८
२१. प्रायभवः ४.३.३९
२२. संभूते ४.३.४१
२३. कालात्साधुपुष्प्यत्पच्यमानेषु ४.३.४३
२४. उप्ते च ४.३.४४
२५. देयमृणे ४.३.४७
२६. व्याहरति मृगः ४.३.५१
२७. तदस्य सोढम् ४.३.५२
२८. तत्र भवः ४.३.५३
२९. तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः ४.३.६६
३०. तत आगतः ४.३.७४
३१. प्रभवति ४.३.८३
३२. तद्गच्छति पथिदूतयोः ४.३.८५
३३. अभिनिष्क्रामति द्वारम् ४.३.८६
३४. अधिकृत्य कृते ग्रन्थे ४.३.८७
३५. सोऽस्य निवासः ४.३.८९
३६. अभिजनश्च ४.३.९०
३७. भक्तिः ४.३.९५
३८. तेन प्रोक्तम् ४.३.१०१
३९. तेनैकदिक् ४.३.११२
४०. उपज्ञाते ४.३.११५
४१. कृते ग्रन्थे ४.३.११६
४२. तस्येदम् ४.३.१२०

**प्राण्योषधिवृक्षेभ्यो विकारावयवयोरर्थयोः यथाविहितप्रत्यया भवन्ति। प्राण्योषधिवृक्षान्यप्रकृतिभ्यः शैषिका एवेति विवेकः।**

४३. तस्य विकारः ४.३.१३४
४४. अवयवे च प्राण्योषधिवृक्षेभ्यः ४.३.१३५

## चतुर्थाध्याये चतुर्थः पादः

**२. ठगधिकारः प्राग्वहतीयः**

४.४.१-४.४.७४

अधोनिर्दिष्टेषु ३६ प्राग्वहतीयेष्वर्थेषु ठक् प्रत्ययोऽधिकृतो वेदितव्यः

१. तेन दीव्यति खनति जयति जितम् ४.४.२
२. संस्कृतम्
३. तरति ४.४.५
४. चरति ४.४.८
५. वेतनादिभ्यो जीवति ४.४.१२
६. हरत्युत्सङ्गादिभ्यः ४.४.१५
७. निर्वृत्तेऽक्षद्यूतादिभ्यः ४.४.१९
८. संसृष्टे ४.४.२२
९. व्यञ्जनैरुपसिक्ते ४.४.२६
१०. ओजःसहोम्भसा वर्तते ४.४.२७
११. प्रयच्छति गर्ह्यम् ४.४.३०
१२. उञ्छति ४.४.३२
१३. रक्षति ४.४.३३
१४. शब्ददर्दुरं करोति ४.४.३४
१५. पक्षिमत्स्यमृगान्हन्ति ४.४.३५
१६. परिपन्थं च तिष्ठति ४.४.३६
१७. माथोत्तरपदपदव्यनुपदं धावति ४.४.३७
१८. पदोत्तरपदं गृह्णाति ४.४.३९
१९. धर्मं चरति ४.४.४१
२०. प्रतिपथमेति ठंश्च ४.४.४२
२१. समवायान् समवैति ४.४.४३

**३. यदधिकार: प्राग्घितीय:**

**४.४.७५-४.४.१४४**

अधोनिर्दिष्टेषु ३१ प्राग्घितीयेष्वर्थेषु यत् प्रत्ययोऽधिकृतो वेदितव्य:



**पञ्चमाध्याये प्रथम: पाद:**

**४. छाधिकार: प्राक्क्रीतीय:**

**५.१.१-५.५.१.३७**

अधोनिर्दिष्टेषु त्रिषु प्राक्क्रीतीयेष्वर्थेषु छ: प्रत्ययोऽधिकृतो वेदितव्य:

### ५. ठञधिकारः प्राग्वतीयः

५.१.१८-११५

अधोनिर्दिष्टेषु २७ प्राग्वतीयेष्वर्थेषु ठञ् प्रत्ययोऽधिकृतो वेदितव्यः

### ठञधिकारमध्ये ठगधिकारः प्रागार्हीयः

आर्हादगोपुच्छसंख्यापरिमाणाट्ठक् ५.१.१९। 'तदर्हति ५.१.६३' इत्येतदभिव्याप्य ठञधिकारमध्ये ठञोऽपवादष्ठगधिक्रियते, गोपुच्छादीन् वर्जयित्वा। इत्थञ्चैतेष्वेकादशस्वार्हीयेष्वर्थेषु गोपुच्छसंख्यापरिमाणादिभ्यष्ठञ् भवति, तदन्येभ्यष्ठगिति वेदितव्यम्। ठक्ठञोर्मध्ये स्वरे भेदः।

१. तेन क्रीतम् ५.१.३७
२. तस्य निमित्तं संयोगोत्पातौ ५.१.३८
३. तस्येश्वरः ५.१.४२
४. तत्र विदित इति च ५.१.४३
५. तस्य वापः ५.१.४५
६. तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते ५.१.४७
७. तद्धरति वहत्यावहति भाराद्वंशादिभ्यः ५.१.५०
८. संभवत्यवहरति पचति ५.१.५२
९. सोऽस्यांशवस्नभृतयः ५.१.५६
१०. तदस्य परिमाणम् ५.१.५७
११. तदर्हति ५.१.६३

इत्यार्हीयाः

१२. पारायणतुरायणचान्द्रायणं वर्तयति ५.१.७२
१३. संशयमापन्नः ५.१.७३
१४. योजनं गच्छति ५.१.७४
१५. उत्तरपथेनाहृतं च ५.१.७७

### कालाधिकारः

कालात् ५.१.७८ इत्यत आरभ्य व्युष्टादिभ्योऽण् ५.१.९७' इत्यतः प्रागधिकारोऽयम्। यदित ऊर्ध्वमनुक्रमिष्यते, कालादित्येवं तद्वेदितव्यम्।

१६. तेन निर्वृत्तम् ५.१.७९
१७. तमधीष्टो भृतो भूतो भावी ५.१.८०
१८. षष्टिकाः षष्टिरात्रेण पच्यन्ते ५.१.९०
१९. तेन परिजय्यलभ्यकार्यसुकरम् ५.१.९३
२०. तदस्य ब्रह्मचर्यम् ५.१.९४
२१. तस्य च दक्षिणा यज्ञाख्येभ्यः ५.१.९५
२२. तत्र च दीयते कार्यं भववत् ५.१.९६

इति कालाधिकारः

२३. संपादिनि ५.१.९९
२४. तस्मै प्रभवति संतापादिभ्यः ५.१.१०१
२५. समयस्तदस्य प्राप्तम् ५.१.१०४
२६. प्रकृष्टे ठञ् ५.१.१०८
२७. प्रयोजनम् ५.१.१०९

### अव्ययसंज्ञको वतिप्रत्ययः

५.१.११५-११८

### भावकर्मार्थकाः प्रत्ययाः

५.१.११९-१३६

समर्थानां प्रथमाद्वा (४.१.८६) इत्यधिकार इतो निवृत्तः।

### पञ्चमाध्याये द्वितीयः पादः

पञ्चमाध्यायस्य द्वितीये पादे ५.२.१-९३ इति यावत् न कोऽपि प्रत्ययोऽधिक्रियते। स्फुटेष्वर्थेषु स्फुटप्रत्ययाः सन्ति। ते चार्थाः-

१. धान्यानां भवने क्षेत्रे खञ् ५.२.१
२. सर्वचर्मणः कृतः खखञौ ५.२.५
३. यथामुखसंमुखस्य दर्शनः खः ५.२.६
४. तत्सवदिः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति ५.२.७
५. आप्रपदं प्राप्नोति ५.२.८
६. अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु ५.२.९
७. परोवरपरंपरपुत्रपौत्रमनुभवति ५.२.१०
८. अवारपारात्यन्तानुकामं गामी ५.२.११
९. समां समां विजायते ५.२.१२
१०. अनुग्वलंगामी ५.२.१५
११. व्रातेन जीवति ५.२.२१
१२. तेन वित्तश्चुञ्चुप्चणपौ ५.२.२६
१३. तदस्य संजातं तारकादिभ्य इतच् ५.२.३६
१४. यत्तदेतेभ्यः परिमाणे वतुप् ५.२.३९
१५. किमः संख्यापरिमाणे डति च ५.२.४१
१६. तदस्मिन्नधिकमिति दशान्ताड्डः ५.२.४५
१७. संख्याया गुणस्य निमाने मयट् ५.२.४७
१८. तस्य पूरणे डट् ५.२.४८
१९. मतौ छः सूक्तसाम्नोः ५.२.५९
२०. तत्र कुशलः पथः ५.२.६३
२१. धनहिरण्यात्कामे ५.२.६५
२२. स्वाङ्गेभ्यः प्रसिते ५.२.६६
२३. उदराट्ठगाद्यूने ५.२.६७
२४. सस्येन परिजातः ५.२.६८
२५. अंशं हारी ५.२.६९
२६. तन्त्रादचिरापहृते ५.२.७०
२७. ब्राह्मणकोष्णिके संज्ञायाम् ५.२.७१
२८. शीतोष्णाभ्यां कारिणि ५.२.७२
२९. अनुकाभिकाभीकः कमिता ५.२.७४
३०. पार्श्वेनान्विच्छति ५.२.७५
३१. स एषां ग्रामणीः ५.२.७८
३२. शृङ्खलमस्य बन्धनं करभे ५.२.७९
३३. उत्क उन्मनाः ५.२.८०
३४. कालप्रयोजनाद्रोगे ५.२.८१
३५. तदस्मिन्नन्नं प्राये संज्ञायाम् ५.२.८३
३६. श्रोत्रियंश्छन्दोऽधीते ५.२.८४
३७. श्राद्धमनेन भुक्तमिनिठनौ।
३८. पूर्वादिनिः ५.२.८६
३९. सपूर्वाच्च ५.२.८७
४०. छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि ५.२.८८
४१. अनुपद्यन्वेष्टा ५.२.९०
४२. साक्षाद् द्रष्टरि संज्ञायाम् ५.२.९१
४३. क्षेत्रियच्परक्षेत्रे चिकित्स्यः ५.२.९२

### अथ मत्वर्थीयाः

तदस्यास्त्यस्मिन्निति मतुप् ५.२.९४ इत आरभ्य ५.२.१४० इत्यन्तम् 'अस्य' 'अस्मिन्' इत्यर्थे प्रत्यया भवन्ति।

### पञ्चमाध्याये तृतीयः पादः

#### विभक्तिसंज्ञकास्तद्धितप्रत्ययाः

'पञ्चम्यास्तसिल् ५.३.७' इत आरभ्य 'दिक्शब्देभ्यः ५.३.२७' इत्यन्तं वक्ष्यमाणाः प्रत्ययाः, विभक्तिसंज्ञका अव्ययसंज्ञकाश्च।

**अव्ययसंज्ञकास्तद्धितप्रत्यया:**

इत आरभ्य 'याप्ये पाशप् ५.३.४७' इत्यत: प्राग् कथिता: प्रत्यया: 'तसिलादय: प्राक्पाशप:' इत्यनेन अव्यय-संज्ञका:। एषां विभक्तिसंज्ञा नास्ति।

**आतिशायिकप्रकरणम्**

५.३.५५-६५

**स्वार्थिकप्रत्यया:**

५.३.६-६९

**काधिकार:**

'प्रागिवात्क: ५.३.७०' इत्यारभ्य 'इवे प्रतिकृतौ ५.३.९६' इत्येतस्मात् प्राक् कप्रत्ययोऽधिकृत:।

**इवार्थे प्रत्यया:**

५.३.९६-१११

तद्राजप्रत्यया: ५.३.११२-११८

**पञ्चमाध्याये चतुर्थ: पाद:**

**अव्ययसंज्ञकास्तद्धितप्रत्यया:**

१. तसिश्च ४.३.११३' इत्यनेन विधीय--मानस्तसि:।

२. किमेत्तिङव्ययघादाम्वद्रव्य० ५.४.११ इत्यनेन विधीयमानो आमु:, अमु चच्छन्दसि ५.४.१२ इत्यनेन विधीयमानो अमु:।

३. कृत्वसुच्-सुच्-धा-प्रत्यया:, '५.४.१७' इत्यत आरभ्य ५.५.२० इत्यन्ता:।

४. 'बह्वल्पार्थाच्छस्कारकादन्य० ५.४.४२' इत्यारभ्य प्राक् 'समासान्ता: ५.३.६८' इति प्रत्यया: 'शस्प्रभृतय: प्राक् समासान्तेभ्य:' इत्यनेन विधीयमाना: प्रत्यया:।

**समासान्ताधिकार:**

५.४.६८-१६०

अधिकारोऽयम्। आपादपरिसमाप्तेर्ये प्रत्यया विहितास्ते समासस्यान्तावयवा एकदेशा भवन्ति, तद्ग्रहणेन गृह्यन्त इति वेदितव्यम्।

**षष्ठाध्याये प्रथम: पाद:**

**द्वित्वप्रकरणम्**

६.१.१-६.१.१२

**सम्प्रसारणप्रकरणम्**

६.१.१३-६.१.४४

**आत्त्वप्रकरणम्**

६.१.४५-५९

अमागमप्रकरणम् ६.१.५८-५९

प्रकृत्यादेशप्रकरणम् ६.१.६०-६४

लोपप्रकरणम् ६.१.६५-६९

तुगागमप्रकरणम् ६.१.७०-७५

**संहिताधिकार:**

६.१.७१-१५५ अत्राच्सन्धि:

यण्सन्धि: ६.१.७६

अयादिसन्धि: ६.१.७७-८२

**एक: पूर्वपरयोरित्यधिकार:**

अधिकारोऽयं ६.१.८३ इत्यत आरभ्य 'ख्यत्यात् परस्य ६.१.११०' इत्येतस्मात् सूत्रात् प्राग्वतति। इत उत्तरं यद् वक्ष्यते, तत्र पूर्वस्य परस्य द्वयोरपि स्थाने एकादेशो भवतीत्येतद् वेदितव्यम्।

### सुट्कात्पूर्व इत्यधिकारः

अधिकारोऽयं ६.१.१३३ इत्यत आरभ्य 'पारस्करप्रभृतीनि च संज्ञायाम् ६.१.१५४' इति यावत्। इत उत्तरं यद्वक्ष्यते, तत्र सुडिति कात्पूर्व इति चैतदधिकृतं वेदितव्यम्।

### स्वरप्रकरणम्

६.१.१५५- ६.२.१९९



## षष्ठाध्याये द्वितीयः पादः

### पूर्वपदस्य प्रकृत्या स्वरः

६.२.१-६३

पूर्वपदमित्यनुवर्तते। इत उत्तरं यद्वक्ष्यते, तत् पूर्वपदस्य भवतीत्येवं तद्वेदितव्यम्।

### पूर्वपदाद्युदात्तस्वराधिकारः

६.२.६४-९१

इत आदिरुदात्त इत्येतदधिकृतं वेदितव्यम्। इत उत्तरं यद्वक्ष्यते, तत्र पूर्वपदस्यादिरुदात्तो भवतीत्येवं तद्वेदितव्यम्।

### पूर्वपदान्तोदात्तस्वराधिकारः

६.२.९२-११०

अन्त इत्यधिकृतम्। यदित उत्तरं वक्ष्यते, तत्र पूर्वस्यान्त उदात्तो भवतीत्येवमधिकृतं वेदितव्यम्।

### उत्तरपदाद्युदात्तस्वराधिकारः

६.२.१११-१४२

उत्तरपदादिरित्येतदधिकृतम्। यदित ऊर्ध्व-मनुक्रमिष्यते, तत्र उत्तरपदस्यादिरुदात्तो भवतीत्येवमधिकृतं वेदितव्यम्। उत्तरपदस्ये-त्येतदापादपरिसमाप्तेः।

### उत्तरपदान्तोदात्तस्वरप्रकरणम्

६.२.१४३-१९९

अन्त इत्येतदधिकृतमापादान्तम्। यदित ऊर्ध्वमनुक्रमिष्यते, तत्र समासस्योत्तर--पदस्यान्त उदात्तो भवतीत्येवं तद् वेदितव्यम्।

## षष्ठाध्याये तृतीयः पादः

### 'उत्तरपदे' इत्यधिकारः

६३.१-.१३९

'अलुगिति' च 'उत्तरपदे' इति च एतदधिकृतं वेदितव्यम्। यदित ऊर्ध्वमनुक्रमिष्यते--ऽलुगुत्तरपदे इत्येवं तद् वेदितव्यम्। अत्र विवेकः,'अलुगिति'६.३.२४ इत्यन्तमधि-

क्रियते 'उत्तरपदे' इति च पादान्तमधिक्रियते।

## उत्तरपदेऽलुक्प्रकरणम्
६.३.१-२४

## उत्तरपदे परे प्रकृत्यादेशाः
६.३.२५-११०

उत्तरपद आनङ् ६.३.२५-३३
उत्तरपदे पुंवद्भावः ६.३.३४-४२
उत्तरपदे ह्रस्वः ६.३.४३-४५
उत्तरपद आत्त्वम् ६.३.४६-४७
उत्तरपदे प्रकृत्यादेशाः ६.३.४८-६६
उत्तरपदे मुमागमः ६.३.६७-७२
उत्तरपदे नञादेशाः ६.३.७३-७७
उत्तरपदे सहस्यादेशाः ६.३.७८-८३
उत्तरपदे समानस्यादेशाः ६.३.८४-८८
दृग्दृशवतुषु प्रकृत्यादेशाः ६.३.८९-९१
अञ्चतौ वप्रत्यये प्रकृत्यादेशाः ६.३.९२-९४
सहस्यादेशाः ६.३.९५-९६
अप आदेशाः ६.३.९७-९८
अन्यशब्दस्यादेशाः ६.३.९९-१००
कुशब्दस्यादेशाः ६.३.१०१-१०८
पृषोदरादीनि निपातनानि ६.३.१०९
अह्नशब्दस्यादेशाः ६.३.११०

## 'उत्तरपदे दीर्घः'
६.३.१११-१३९

'अङ्गस्य दीर्घः' ६.४.१८ इति यावत्

## द्वितीयः संहिताधिकारः

'संहितायाम् ६.३.११४' इत्यधिकार आपादान्तम्। यदित ऊर्ध्वमनुक्रमिष्यते संहितायामित्येवं तद्वेदितव्यम्।

# षष्ठाध्याये चतुर्थः पादः

## अङ्गाधिकारः
६.४.१-७.४.९७

अङ्गस्य दीर्घः ६.४.१-१८
अङ्गस्य शूठ् ६.४.१९-२१

## असिद्धवदधिकारः
६.४.२२-१७५

असिद्धवदित्यधिकारोऽयम्। यदित ऊर्ध्वमनुक्रमिष्यते, आ षष्ठाध्यायपरिसमाप्तेः, असिद्धवत् तद्वेदितव्यम्। आभादिति विषय-निर्देशः। तस्मिन् समानाश्रये आभीये कर्तव्ये समानाश्रयमाभीयमसिद्धं भवति। व्याश्रयं तु न भवति। अस्याधिकारस्य विषयाः क्रमेण निर्दिश्यन्ते ---

१. नलोपः ६.४.२३-३३
२. शास उपधाया इकारादेशः ६.४.३४
३. शासः शा ६.४.३५
४. हन्तेर्जः ६.४.३६
५. अनुनासिकलोपः ६.४.३७-४०
६. अनुनासिकस्यात्त्वम् ६.४.४१-४५

## आर्धधातुक इत्यधिकारः
६.४.४६.६.४.७०

आर्धधातुके इत्यधिकारोऽयं 'मयतेरिदन्यतरस्याम् ६.४.७०' इत्यन्तम्। प्रागेतस्माद्यदित ऊर्ध्वमनुक्रमिष्यते, 'आर्धधातुके' इत्येवं तद् वेदितव्यम्।

७. भ्रस्जो रमागमः ६.४.४७
८. अतो लोपः ६.४.४८

## सप्तमाऽध्याये प्रथमः पादः

**अङ्गात्परस्य प्रत्ययस्यादेशाः**
**७.१.१-४९**

प्रकृतेरागमाः ७.१.५०-८३
असुगागमः ७.१.५०-५१

**स्वादिषु विभक्तिषु परतः कार्याणि**
**७.१.५०-९९**
**५१, ५८-६९ सूत्राणि वर्जयित्वा**

सुडागम आमि ७.१.५२
त्रेस्त्रयादेश आमि ७.१.५३
नुडागम आमि ७.१.५४-५७
नुमागमप्रकरणम् ७.१.५८-८३
दिव औत्त्वम् ७.१.८४
पथिमथ्यृभुक्षामङ्गकार्याणि ७.१.८५-८८
पुंसः। गोतः। सख्युः। ऋकारान्तानाम्। उशनस्पुरुदंसोऽनेहसाम्। क्रोष्टुः। चतुरनडुहोश्चाङ्गकार्याणि ७.१.८९-९९
ॠकारस्यादेशाः ७.१.१००-१०३

## सप्तमाध्याये द्वितीयः पादः

**सिचि वृद्धिः ७.२.१-८**

**इडागमप्रकरणम्**
७.२.८-७८ इति यावत्। तत्र ---
अनिट्प्रत्ययाः - ७.२.८-९।
अनिड्धातवः - ७.२.१०।
वेड्धातवः - ७.२.४३-४६।
इडागमनिषेधः - ७.२.११-३४।

आर्धधातुकप्रत्ययस्येडागमः ७.२ ३५-३६
इटो दीर्घः ७.२.३७-४०
पुनरार्धधातुकप्रत्ययस्येडागमः ७.२.४१-४३
क्त्वानिष्ठयोः, सनि, तासि च ७.२.४७-६०
थलीडागमः ७.२.६१-६६
क्वसौ-इडागमः ७.२.६७-६९
स्ये, सिचि, सनि इडागमः ७.२.७०-७५

**सार्वधातुके प्रत्ययेऽङ्गकार्याणि**
'रुदादिभ्यः सार्वधातुके ७.२.७६ इत्यत आरभ्य 'ईदासः ७.२.८३' इति यावत् सार्वधातुके प्रत्यये कार्याणि भवन्ति।

**विभक्तौ परतः प्रकृत्यादेशाः**
**७.२.८४-११३**

आकारादेशः ७.२.८४-९०

**मपर्यन्तस्येत्यधिकारः**
**७.२.९१-९८**

**विभक्तौ परतः प्रकृत्यादेशाः**
**७.२.९९-११३**

**वृद्धिप्रकरणम्**
**७.२.११४-७.३.३१**

**'ञ्णिति' परतो वृद्धिः**
**७.२.११५-७.३.३५ इति यावत्**

## सप्तमाध्याये तृतीयः पादः

**'ञ्णिति' 'किति' 'तद्धितेषु' वृद्धिः**
**७.२.११५-७.३.३१ इति यावत्**

**उत्तरपदस्येत्यधिकारः**
उत्तरपदस्येत्यधिकारो हनस्तो चिण्णलोः ७.३.३२ इत्यतः प्रागिति। प्रागेतस्मात् यदित ऊर्ध्वमनुक्रमिष्यते उत्तरपदस्येत्येवं तद् वेदितव्यम्।

**पूर्वपदस्य च**
७.३.१९-७.३.३१

णौ परतो विधयः ७.३.३६-४३
कात्पूर्वस्यात इत्त्वम् ७.३.४४-४९
प्रत्ययादेशाः ७.३.५०-५१
चजोः कुत्वम् ७.३.५२-६९
लोप-लुक्-प्रकरणम् ७.३.७०-७३

**सार्वधातुके प्रत्ययेऽङ्गकार्याणि**

'शमामष्टानां दीर्घः श्यनि ७.३.७४' इत्यत आरभ्य 'अतो दीर्घो यञि ७.३.१०१' इति यावत् सार्वधातुके प्रत्यये कार्याणि भवन्ति।
सार्वधातुकार्धधातुकयोः ७.३.८४
जाग्रोऽविचिण्णल्ङित्सु ७.३.८५
पुगन्तलघूपधस्य च ७.३.८६
(एतानि त्रीणि सूत्राण्यार्धधातुकेऽपि प्रवर्तन्त इति विवेकः)

**स्वादिषु विभक्तिषु परतः कार्याणि**
७.३.१०२-१२०

## सप्तमाध्याये चतुर्थः पादः

णौ चङ्यङ्गकार्यम् ७.४.१-८
लिट्यङ्गकार्यम् ७.४.९-१४
केऽङ्गकार्यम् ७.४.१५
अङ्यङ्गकार्यम् ७.४.१६-२०
सार्वधातुके शीङो गुणः ७.४.२१

**यकारादिषु प्रत्ययेषु च्वौ चाङ्गकार्याणि**
७.४.२२-३९

**तकारादौ कित्यङ्गकार्याणि**
७.४.४०-४८

अपो भि तकारादेशः ७.४.४८
सकारान्तस्याङ्गस्यादेशाः ७.४.४९-५३
सन्यङ्गकार्याणि ७.४.५४-५८

**अभ्यासकार्यप्रकरणम्**
७.४.५९-९७

तत्र सामान्याभ्यासकार्याणि ७.४.५९-६७
लिट्यभ्यासकार्याणि ७.४.६८-७४
श्लावभ्यासकार्याणि ७.४.७५-७८
सन्यभ्यासकार्याणि ७.४.७९-८१
यङि-यङ्लुक्यभ्यासकार्याणि ७.४.८२-९२
चङ्यभ्यासकार्याणि ७.४.९३-९७

## अष्टमाऽध्याये प्रथमः पादः

**द्विरुक्तप्रकरणम्**
८.१.१-१५

**'पदस्य' इत्यधिकारः**
८.१.१६-८.३.५५

पदस्येत्ययमधिकारः प्राग् अपदान्तस्य मूर्धन्यः ८.३.५५' इति। यदित ऊर्ध्व-मनुक्रमिष्यते पदस्येत्येवं तद् वेदितव्यम्।

**'पदात्' इत्यधिकारः**
८.१.१७-८.१.६८

पदादित्ययमधिकारः प्राग् 'कुत्सने च सुप्यगोत्रादौ ८.१.६९' इति। यदित ऊर्ध्वमनुक्रमिष्यते पदादित्येवं तद् वेदितव्यम्।

## वाक्यस्वरा:

### 'अनुदात्तं सर्वमपादादौ' इत्यधिकार:

८.१.१९-७४

अनुदात्तमिति च, सर्वमिति च, अपादादाविति च, एतत्त्रयमधिकृतं वेदितव्य--मापादपरिसमाप्ते:। इत उत्तरं यद्वक्ष्यते अनुदात्तं सर्वमपादादावित्येवं तद् वेदितव्यम्। एतावता पदात्परस्यापादादौ वर्तमानस्य पदस्य सर्वमनुदात्तं भवति।

युष्मदस्मदोरादेशा अनुदात्तं च ८.१.२०-२६

**पदात् इति निवृत्तम्**

८.१.६८

अविद्यमानवत् ८.१.७२-७४

## अष्टमाध्याये द्वितीय: पाद:

### पूर्वत्रासिद्धत्वाधिकार:

८.२.१-८.४.६६

पूर्वत्रासिद्धमित्यधिकार आष्टमा--ध्यायपरिसमाप्ते:। यदित ऊर्ध्वमनुक्रमिष्यते पूर्वत्रासिद्धमित्येवं तद्वेदितव्यम्। तत्र येयं सपादसप्ताध्याय्यनुक्रान्ता एतस्यामयं पादोनो-ऽध्यायोऽसिद्धो भवति। इत उत्तरं चोत्तरोत्तरो योग: पूर्वत्र पूर्वत्रासिद्धो भवति। असिद्धवद् भवति, सिद्धकार्यं न करोतीत्यर्थ:।

**पूर्वत्रासिद्धत्वस्य निषेध:**

८.२.२-३

**एकादेशस्वर:**

८.२.४-६

नलोप: ८.२.७-९

मतोरादेशा: ८.२.९-१७

लत्वम् ८.२.१८-२२

लोपप्रकरणम् ८.२.२३-२९

संयोगान्तस्य लोप: ८.२.२३

सकारस्य लोप: ८.२.२४-२९

### झलि पदान्ते कार्याणि

८.२.३०-३८ इति यावत्

कुत्वम् ८.२.३०

ढत्वम् ८.२.३१

घत्वम् ८.२.३२-३३

धत्वम् ८.२.३४

थत्वम् ८.२.३५

षत्वम् ८.२.३६

भष्भाव: ८.२.३७-३८

पदान्तजश्त्वम् ८.२.३९

भष्भाव: ८.२.४०

षढो: क: ८.२.४१

### निष्ठातकारस्यादेशा:

८.२.४२-६१

पदान्तस्य कुत्वम् ८.२.६२-६३

पदान्तस्य मकारस्य नकारादेश: ८.२.६४-६५

पदान्तस्य रुत्वम्, दत्वम् ८.२.६६-७५

र्वोर्दीर्घ: ८.२.७६-७९

अदस आदेशा: ८.२..८०-८१

### वाक्यस्य टे: प्लुत उदात्त, इत्यधिकार:

८.२.८२-१०७

**संहिताधिकारः तृतीयः**

८.२.१०८-८.४.६६

संहितायामित्यधिकृतं वेदितव्यमाध्याय परिसमाप्तेः। इत उत्तरं यद्वक्ष्यते संहिताया-मित्येवं तद्वेदितव्यम्।

**अष्टमाध्याये तृतीयः पादः**

**रुत्वप्रकरणम्**

८.३.१-१२

ढलोपः ८.३.१३
रलोपः ८.३.१४
रेफस्य विसर्जनीयादेशः ८.३.१५-१६
रोयदिशः ८.३.१७.
वकारस्य, यकारस्यादेशाः ८.३.१८-२२
मकारस्य आदेशाः ८.३.२३-२७
कुक्, टुक्, धुट्, तुक्, ङमुट् आगमाः ८.३.२८-३२
उञो वः ८.३.३३

**विसर्जनीयस्यादेशाः**

८.३.३४-५४

**अपदान्तस्य मूर्धन्यादेशाधिकारः**

(षत्वं, ढत्वञ्च)

८.३.५५-११९

पदाधिकारो निवृत्तः। इतोऽपदान्तस्येति मूर्धन्यस्येति चैतदधिकृतं वेदितव्यमापाद-परिसमाप्तेः।

**'इण्कोः' इत्यधिकारः**

८.३.५७-११९

इण्कोरित्येतदधिकृतं वेदितव्यम्। इत उत्तरं यद्वक्ष्यते इणः कवर्गाच्चेत्येव तद् वेदितव्यमापादान्तम्।

**अष्टमाध्याये चतुर्थः पादः**

**णत्वप्रकरणम्**

८.४.१.-३९

**हल्सन्धिः**

८.४.४०-६५

श्चुत्वम् ८.४.४०
ष्टुत्वम् ८.४.४१-४४
अनुनासिकः ८.४.४५
यरो द्वित्वम् ८.४.४६-५२
अपदान्तजश्त्वम् ८.४.५३
अभ्यासस्य जश्त्वं चर्त्वम् ८.४.५४
अपदान्तचर्त्वम् ८.४.५५
पदान्तचर्त्वम् ८.४.५६
अप्रगृह्यस्यानुनासिकः ८.४.५७
अनुस्वारस्य परसवर्णः ८.४.५८-५९
लत्वम् ८.४.६०
पूर्वसवर्णः ८.४.६१-६२
शश्छत्वम् ८.४.६३
यमां लोपः ८.४.६४
झरो लोपः ८.४.६५
स्वरितः ८.२.६६-६७
विवृताकारस्य संवृताकारः ८.२.६८

❀❀❀

# अकारादिक्रमेणाष्टाध्यायीविषयानुक्रमणी

व.

❀❀❀

महर्षिपाणिनिप्रणीतः

# अष्टाध्यायीसूत्रपाठः

प्रकरणनिर्देशसमन्वितः

# अथ प्रत्याहारप्रकरणम्

श्रीहरि:

अष्टाध्यायी जगन्माता यस्य चित्तात्समुत्थिता।
वेदानामुपकाराय तस्मै पाणिनये नमः।। १।।

अष्टकं पाणिनेर्दिव्यं शब्दशास्त्रमलौकिकम्।
आकुमारं यशो यस्य तस्मै पाणिनये नमः।। २।।

शब्दरत्नाकरोद्भूतं शैवं रत्नचतुर्दशम्।
शास्त्रे येन समायोजि तस्मै पाणिनये नमः।। ३।।

ब्रह्माण्डारणिनिर्मन्थादुत्थितज्ञानवह्निना।
निर्ममे शब्दशास्त्रं यस्तस्मै पाणिनये नमः।। ४।।

व्याकृत्य दर्शितो येन त्रय्या वाचः परं पदम्।
सिद्धिसोपानभूतं यत् तस्मै पाणिनये नमः।। ५।।

शब्दब्रह्म समाराध्य कृतवान् यो विलक्षणम्।
सर्वाश्चर्यमयं शास्त्रं तस्मै पाणिनये नमः।। ६।।

यस्य भासावभासन्ते वैदिका लौकिकास्तथा।
शब्दा रूपं विवृत्येमे तस्मै पाणिनये नमः।। ७।।

वाचं कामदुघां कर्तुं दिव्यं शास्त्रमरीरचद्।
भवं प्रसाद्य भक्त्या यस्तस्मै पाणिनये नमः।। ८।।

यः परं पदमन्वेष्टुं पदराशिं व्यबीभजत्।
मोक्षमार्गप्रकाशाय तस्मै पाणिनये नमः।। ९।।

यतो नावर्तते जीवः शब्दशास्त्रमुपासिता [१]।
तत्पदं दर्शितं येन तस्मै पाणिनये नमः।। १०।।

येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः।। ११।।

येन धौता गिरः पुंसां विमलैः शब्दवारिभिः।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः।। १२।।

[१] 'आस उपवेशने' इत्यस्माद् धातोः तच्छीलाद्यर्थेषु कर्तरि तृन्। तेन 'न लोकाव्यय०' इति षष्ठीनिषेधः।

अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः।। १३।।

सदाशिवसमारम्भां तथा पाणिनिमध्यमाम्।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम्।। १४।।

उपासनीयं यत्नेन शास्त्रं व्याकरणं महत्।
प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम्।। १५।।

अथ शब्दानुशासनम्। केषां शब्दानाम् ? लौकिकानां वैदिकानां च। लौकिका अनियतशब्दानुपूर्वीकाः, वैदिका नियतशब्दानुपूर्वीकाः। कथमनुशासनम्? प्रकृत्यादि--विभागकल्पनया सामान्यविशेषवता लक्षणेन।

### अथ वर्णोपदेशः

# अथ वर्णमातृका

## स्वरवर्णाः

अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, ऌ, ए, ऐ, ओ, औ।

अं = अनुस्वारः अः = विसर्गः

## व्यञ्जनवर्णाः

| | प्रथमः | द्वितीयः | तृतीयः | चतुर्थः | पञ्चमः | वर्गः |
|---|---|---|---|---|---|---|
| स्पर्शाः | क | ख | ग | घ | ङ | कवर्गः – कु |
| स्पर्शाः | च | छ | ज | झ | ञ | चवर्गः – चु |
| स्पर्शाः | ट | ठ | ड | ढ | ण | टवर्गः – टु |
| स्पर्शाः | त | थ | द | ध | न | तवर्गः – तु |
| स्पर्शाः | प | फ | ब | भ | म | पवर्गः – पु |
| अन्तःस्थाः | य | र | ल | व | | |
| ऊष्माणः | श | ष | स | ह | | |

भगवतः पाणिनेस्तपःप्रभावेणैषा वर्णमातृकैव शिवस्य डमरुनिनादान्माहेश्वर--सूत्ररूपेणोद्गता।

## अथ माहेश्वराणि सूत्राणि

**१. अइउण् २.ऋऌक् ३. एओङ् ४. ऐऔच् ५. हयवरट् ६. लण् ७. ञमङणनम् ८. झभञ् ९. घढधष् १०. जबगडदश् ११. खफछठथचटतव्, १२. कपय् १३. शषसर् १४. हल् ।**

इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि । अत्र १, २, ३, ४, सूत्रेषु मातृकापाठस्य स्वरवर्णाः सन्ति । ५, ६, सूत्रयोः मातृकापाठस्यान्तःस्थवर्णाः सन्ति । ७ सूत्रे मातृकापाठस्य पञ्चमवर्णाः सन्ति । ८, ९, सूत्रयोः मातृकापाठस्य चतुर्थवर्णाः सन्ति । १० सूत्रे मातृकापाठस्य तृतीयवर्णाः सन्ति । ११, १२ सूत्रयोः मातृकापाठस्य प्रथमद्वितीयवर्णाः सन्ति । १३, १४, सूत्रयोः मातृकापाठस्योष्मवर्णाः सन्ति। एषां सूत्राणामन्त्या इतः । त एवानुबन्धाः । अनुबन्धाश्च प्रत्याहारार्थाः । प्रत्याहाराश्च त्रयश्चत्वारिंशत् -----

### अथ प्रत्याहाराः

**अइउण्** - अस्य णकारेणैकः प्रत्याहारः - अण् इति ।

**ऋऌक्** - अस्य ककारेण त्रयः प्रत्याहाराः - अक्, इक्, उक्, इति ।

**एओङ्** - अस्य ङकारेणैकः प्रत्याहारः - एङ्, इति ।

**ऐऔच्** - अस्य चकारेण चत्वारः प्रत्याहाराः - अच्, इच्, एच्, ऐच्, इति ।

**हयवरट्**- अस्य टकारेणैकः प्रत्याहारः - अट्, इति ।

**लण्** - अस्य णकारेण त्रयः प्रत्याहाराः - अण्, इण्, यण्, इति ।

**ञमङणनम्** - अस्य मकारेण त्रयः प्रत्याहाराः - अम्, ञम्, ङम्, इति ।

**झभञ्** - अस्य ञकारेणैकः प्रत्याहारः - यञ् इति ।

**घढधष्** - अस्य षकारेण द्वौ प्रत्याहारौ - भष्, झष्, इति ।

**जबगडदश्** - अस्य शकारेण षट् प्रत्याहाराः - अश्, हश्, वश्, जश्, झश्, बश्, इति ।

**खफछठथचटतव्** - अस्य वकारेणैकः प्रत्याहारः - छव्, इति ।

**कपय्** - अस्य यकारेण पञ्च प्रत्याहाराः - यय्, मय्, झय्, खय्, इति ।

**शषसर्** - अस्य रेफेण पञ्च प्रत्याहाराः - यर्, झर्, खर्, चर्, शर्, इति ।

**हल्** - अस्य लकारेण षट् प्रत्याहाराः - अल्, हल्, वल्, रल्, झल्, शल्, इति ।

**एकस्मान् ङञणवटा / द्वाभ्यां षस्त्रिभ्य एव कणमाः स्युः ।**

**ज्ञेयौ चयौ चतुर्भ्यो / रः पञ्चभ्यः / शलौ षड्भ्यः ।।**

वर्णोपदेशे हकारादिष्वकार उच्चारणार्थः । अनुबन्धाश्च 'अण्' इत्येवमादिकाः संज्ञाः प्रणेतुं तद्रूपप्रतिपादनायोच्चार्यन्ते । ततश्च परार्थमुपादीयमानत्वादप्राधान्यमनुभवन्ति । इतरे तु स्वार्थमुपादीयन्त इति तेषां प्राधान्यम् । तेन तेषामेवाजिति एषा संज्ञा भवति, नानुबन्धानाम् । आचार्यप्रवृत्तिरप्येवं ज्ञापयति । यदयम् 'उणादयो बहुलम्' 'ङमो ह्रस्वादचि ङमुण् नित्यम्' 'यरोऽनुनासिकेऽनुनासिको वा' इत्यादिषु णकारादिषु परतो यणादेशं न करोति । अतश्च प्रत्याहारेष्वितां न ग्रहणम् ।

माहेश्वरसूत्रेष्वनुबन्धा आसञ्जिताः - अइउण्, ऋलृक्, इति । धातुष्वनुबन्धा आसञ्जिताः - डुकृञ्, टुनदि, ञिमिदा इति । आगमेष्वनुबन्धा आसञ्जिताः - इट्, सुट्, नुम्, नुक्, इति । प्रत्ययेष्वनुबन्धा आसञ्जिताः - ण्वुल्, तृच्, क्त्वा, क्तिन्, ष्यञ्, इति । गणेष्वनुबन्धा आसञ्जिता - नदट्, चोरट्, इति । एतेऽनुबन्धा एव पाणिनिशास्त्रं प्रयोजयन्ति । कुत्र भवेद् वृद्धिः, कुत्र गुणः, कुत्र च गुणवृद्धिनिषेधः, कुत्र सम्प्रसारणं, कुत्र नलोपः, कुत्र नुमागमः, कुत्रात्त्वं, कुत्रेत्त्वम्, इति सर्वं निर्दिशन्त्येतेऽनुबन्धा इति महदाश्चर्यकरम् । अयमेव वर्णोपदेशविधिर्भगवतः पाणिनेः । तादृशेन विधिनोपदेशः येन स्वयमेव स्यात् प्रवृत्तिः सूत्राणाम् । अत एवोक्तं भाष्ये - 'वृत्तिसमवायार्थ उपदेशः' । वृत्तिः शास्त्रप्रवृत्तिः, समवायो वर्णानामानुपूर्व्येण संनिवेशः । अनुबन्धाः, प्रत्याहाराः, प्रकरणानि च प्राणाः सन्त्यष्टाध्याय्याः । अत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम् ।

भगवता सर्वो लौकिको, वैदिकश्च शब्दराशिरेककालावच्छेदेन प्रत्यक्षीकृतो योगेबलेन । अत एव ते तत्रत्यलोपागमवर्णविकारान् महत्या सूक्ष्मेक्षिकया निरीक्ष्यैकैकं कार्यमेकैकस्मिन् प्रकरणे निबध्नन्ति । यथा - 'श्नान्नलोपः (६.४.२३)' इत्यारभ्यैकादशसूत्रैः सर्वो लौकिको वैदिकश्च नलोपस्तत्र विहितः । अतः 'श्नान्नलोपः (६.४.२३)' इत्यतः प्राक्, अथ च 'भञ्जेश्च चिणि (६.४.३३) इत उत्तरं न कोऽपि नलोपोऽष्टाध्याय्यां द्रष्टुं शक्यते । यत एकैकं कार्यमेकैकस्मिन् प्रकरणे निःशेषीभवति । एकैकस्य कार्यस्य कृत एकैकं प्रकरणमित्येव विधिर्वर्ततेऽष्टाध्याय्याः । प्रकरणेऽपि सूत्राण्यनुवृत्तिक्रमेण निबद्धाः सन्ति, येन सूत्रार्थावगतिः स्वयमेव जायते । इत्थञ्च न हि पाणिनिना शब्दाः प्रोक्ताः, किं तर्हि ? सूत्रम् ।

अतः पाणिनीयशास्त्रमिदं न केवलं लौकिकवैदिकशब्दराशिं प्रकाशयति, अपितु तादृशं किमपि विज्ञानं प्रकटयति येन कस्या अपि भाषाया शब्दराशिर्व्याकर्तुं शक्यते । इदं न केवलं संस्कृतस्य व्याकरणमपितु स्वस्वभाषाव्याचिकीर्षूणां ज्ञानप्रदीपः ।

**इति प्रत्याहारप्रकरणम् ।**

# अथ पाणिन्यष्टाध्यायीसूत्रपाठः

## (प्रकरणनिर्देशसमन्वितः)

अवश्यध्यातव्यम् - सूत्रपाठेऽस्मिन् सूत्रात्प्राक् या संख्या लिखिता, सा अष्टाध्याय्याः सूत्रस्य क्रमं दर्शयति। सूत्रात् परं या संख्या लिखिता, सा सिद्धान्तकौमुद्यां तस्य सूत्रस्य क्रमाङ्कं दर्शयति। तया संख्यया तत्सूत्रं सिद्धान्तकौमुद्यां झटित्यन्वेष्टुं शक्यते।

### अथ प्रथमाध्याये प्रथमः पादः

वृद्धिसंज्ञा

१. वृद्धि-रादैच् १६।

गुणसंज्ञा

२. अदेङ् गुणः १७।

परिभाषा

३. इको गुणवृद्धी ३४।

गुणवृद्धिनिषेधः

४. न धातुलोप आर्धधातुके २६५६।

५. क्ङिति च २२१७।

६. दीधी-वेवी-टाम् २१९०।

संयोगसंज्ञा

७. हलोऽनन्तराः संयोगः ३०।

अनुनासिकसंज्ञा

८. मुख-नासिका-वचनोऽ-
नुनासिकः ९।

सवर्णसंज्ञा

९. तुल्यास्य-प्रयत्नं सवर्णम् १०।

१०. नाज्झलौ १३।

प्रगृह्यसंज्ञा

११. ईदूदेद् द्विवचनं प्रगृह्यम् १००।

१२. अदसो मात् १०१।

१३. शे १०२।

१४. निपात एकाजनाङ् १०३।

१५. ओत् १०४।

१६. संबुद्धौ शाकल्यस्येता-
वनार्षे १०५।

१७. उञः १०६।

१८. ऊँ १०७।

१९. ईदूतौ च सप्तम्यर्थे १०९।

घुसंज्ञा

२०. दाधाघ्वदाप् २३७३।

परिभाषा

२१. आद्यन्त-वदेकस्मिन् ३४८।

घसंज्ञा

२२. तरप्तमपौ घः २००३।

संख्यासंज्ञा

२३. बहु-गण-वतु-डति संख्या २५८।

षट्संज्ञा

२४. ष्णान्ता षट् ३६९।

२५. डति च २५९।

निष्ठासंज्ञा

२६. क्त-क्तवतू निष्ठा ३०१२।

सर्वनामसंज्ञा

२७. सर्वादीनि सर्वनामानि २१३।

२८. विभाषा दिक्समासे -
बहुव्रीहौ २९२।

२९. न बहुव्रीहौ २२२।

३०. तृतीयासमासे २२३ ।
३१. द्वन्द्वे च २२४ ।
३२. विभाषा जसि २२५ ।
३३. प्रथम-चरम-तयाल्पार्ध-कतिपय नेमाश्च २२६ ।
३४. पूर्व-परावर-दक्षिणोत्तरा-परा-धराणि व्यवस्थाया-मसंज्ञायाम् २१८ ।
३५. स्व-मज्ञाति-धनाख्यायाम् २१९ ।
३६. अन्तरं बहिर्योगोप - संव्यानयो:२२० ।

अव्ययसंज्ञा

३७. स्वरादि-निपात-मव्ययम् ४४७ ।
३८. तद्धितश्चा-सर्वविभक्ति: ४४८ ।
३९. कृन्मेजन्त: ४४९ ।
४०. क्त्वा-तोसुन्कसुन: ४५० ।
४१. अव्ययीभावश्च ४५१ ।

सर्वनामस्थानसंज्ञा

४२. शि सर्वनामस्थानम् ३१३ ।
४३. सुडनपुंसकस्य २२९ ।

विभाषासंज्ञा

४४. न वेति विभाषा २४ ।

सम्प्रसारणसंज्ञा

४५. इग्यण: संप्रसारणम् ३२८ ।

परिभाषासूत्राणि

४६. आद्यन्तौ टकितौ ३६ ।
४७. मिदचोऽन्त्यात्पर: ३७ ।
४८. एच इग्घ्रस्वादेशे ३२३ ।
४९. षष्ठी स्थानेयोगा ३८ ।
५०. स्थानेऽन्तरतम: ३९ ।
५१. उरण् रपर: ७० ।
५२. अलोऽन्त्यस्य ४२ ।
५३. ङिच्च ४३ ।
५४. आदे: परस्य ४४ ।
५५. अनेकाल् शित् सर्वस्य ४५ ।

स्थानिवत्त्वातिदेश:

५६. स्थानिवदादेशोऽनल्विधौ ४९ ।
५७. अच: परस्मिन् पूर्वविधौ ५० ।
५८. न पदान्त-द्विर्वचन-वरे-यलोप-स्वर-सवर्णानुस्वार-दीर्घ-जश्चर्विधिषु ५१ ।
५९. द्विर्वचनेऽचि २२४३ ।

लोपसंज्ञा

६०. अदर्शनं लोप: ५३ ।

लुक्-श्लु-लुप्-संज्ञा:

६१. प्रत्ययस्य लुक्श्लुलुप: २६० ।

परिभाषासूत्रे

६२. प्रत्ययलोपे प्रत्ययलक्षणम् २६२ ।
६३. न लुमताऽङ्गस्य २६३ ।

टिसंज्ञा

६४. अचोऽन्त्यादि टि ७९ ।

उपधासंज्ञा

६५. अलोऽन्त्यात्पूर्व उपधा २४९ ।

परिभाषासूत्रे

६६. तस्मिन्निति निर्दिष्टे पूर्वस्य ४० ।
६७. तस्मादित्युत्तरस्य ४१ ।

ग्रहणकसूत्राणि

अर्थविशिष्टशब्दस्वरूपग्राहकसूत्रम्

६८. स्वं रूपं शब्दस्या-शब्दसंज्ञा २५ ।

सवर्णग्राहकसूत्रम्

६९. अणुदित्सवर्णस्य चाप्रत्यय: १४।

सवर्णग्राहकसूत्रम्

७०. तपरस्तत्कालस्य १५।

प्रत्याहारसंज्ञा

७१. आदिरन्त्येन सहेता २।

तदन्तग्राहकसूत्रम्

७२. येन विधिस्तदन्तस्य २६।

वृद्धसंज्ञा

७३. वृद्धिर्यस्याचामादिस्तद् वृद्धम् १३३५।

७४. त्यदादीनि च १३३६।

७५. एङ् प्राचां देशे १३३८।

## प्रथमाध्याये द्वितीय: पाद:

### अतिदेशप्रकरणम्

१.२.१ सूत्रादारभ्य १.२.२६ इत्यन्तम् अतिदेशप्रकरणमस्ति। एतानि सूत्राणि धातुभ्यो विहितेषु केषुचित् प्रत्ययेषु कित्त्वम्, केषुचित् अकित्त्वम्, केषुचिच्च ङित्वमतिदिशन्ति।.

ङित्त्वातिदेश:

१. गाङ्कुटादिभ्योऽञ्णिन्ङित् २४६१।

२. विज इट् २५३६।

३. विभाषोर्णो: २४४७।

४. सार्वधातुक-मपित् २२३४।

कित्त्वातिदेश:

५. असंयोगाल्लिट् कित् २२४२।

६. इन्धि-भवतिभ्यां च ३३९३।

७ मृड-मृद-गुध-कुष-क्लिश-वद-वस: क्त्वा ३३२३।

८. रुद-विद-मुष-ग्रहि-स्वपि-प्रच्छ: संश्च २६०९।

९. इको झल् २६१२।

१०. हलन्ताच्च २६१३।

११. लिङ्-सिचा-वात्मनेपदेषु २३००।

१२. उश्च २३६८।

१३. वा गम: २७००।

१४. हन: सिच् २६९७।

१५. यमो गन्धने २६९८।

१६. विभाषोप-यमने २७३०।

१७. स्थाघ्वोरिच्च २३८९।

अकित्त्वातिदेश:

१८. न क्त्वा सेट् ३३२२।

१९. निष्ठा शीङ्-स्विदि-मिदि-क्ष्विदि-धृष: ३०५२।

२०. मृषस्तितिक्षायाम् ३०५५।

२१. उदुपधाद् भावादि-कर्मणो-रन्यतरस्याम् ३०५६।

२२. पूङ: क्त्वा च ३०५१।

२३. नोपधात् थफान्ताद्वा ३३२४।

२४. वञ्चि-लुञ्च्यृतश्च ३३२५।

२५. तृषि-मृषि-कृशे: - काश्यपस्य ३३२६।

२६. रलो व्युपधाद्धलादे: संश्च २६१७।

ह्रस्व-दीर्घ-प्लुत-संज्ञा:

२७. ऊकालोऽज्झ्रस्व-दीर्घप्लुत: ४।

परिभाषासूत्रम्

२८. अचश्च ३५।

उदात्त-अनुदात्त-स्वरित-संज्ञा:

२९. उच्चै-रुदात्त: ५।

३०. नीचै-रनुदात्त: ६।

३१. समाहारः स्वरितः ७।

स्वरिते उदात्तांश-अनुदात्तांश-निर्णयः

३२. तस्यादित उदात्त-मर्धह्रस्वम् ८।

एकश्रुतिप्रकरणम्

३३. एकश्रुति दूरात्संबुद्धौ ३६६२।

३४. यज्ञकर्मण्यजपन्यूङ्ख-सामसु ३६६३।

३५. उच्चैस्तरां वा वषट्कारः ३६६४।

३६. विभाषा छन्दसि ३६६५।

३७. न सुब्रह्मण्यायां स्वरितस्य तूदात्तः ३६६६।

३८. देवब्रह्मणो-रनुदात्तः ३६६७।

३९. स्वरितात् संहिताया-मनुदात्तानाम् ३६६८।

सन्नतरादेशः

४०. उदात्तस्वरितपरस्य सन्नतरः ३६६९।

अपृक्तसंज्ञा

४१. अपृक्त एकाल्प्रत्ययः२५१।

कर्मधारयसंज्ञा

४२. तत्पुरुषः समानाधिकरणः कर्मधारयः ७४५।

उपसर्जनसंज्ञा

४३. प्रथमानिर्दिष्टं समास उपसर्जनम् ६५३।

४४. एकविभक्ति चापूर्वनिपाते ६५५।

प्रातिपदिकसंज्ञा

४५. अर्थवदधातु-रप्रत्ययः प्रातिपदिकम् १७८।

४६. कृत्तद्धित-समासाश्च १७९।

ह्रस्वविधिः

४७. ह्रस्वो नपुंसके प्रातिपदिकस्य ३१८।

४८. गोस्त्रियो-रुपसर्जनस्य ६५६।

स्त्रीप्रत्ययस्य लुक्

४९. लुक्तद्धितलुकि १४०८।

गोण्या इकारादेशः

५०. इद् गोण्याः १७०३।

लुपि युक्तवद्भावः

५१. लुपि युक्तवद् व्यक्ति-वचने १२९४।

५२. विशेषणानां चाजातेः १३००।

अशिष्यप्रकरणम्

५३. तदशिष्यं संज्ञाप्रमाणत्वात् १२९५।

५४. लुब्योगाप्रख्यानात् १२९६।

५५. योगप्रमाणे च तदभावेऽदर्शनं स्यात् १२९७।

५६. प्रधान-प्रत्ययार्थवचन-मर्थस्यान्य-प्रमाणत्वात् १२९८।

५७. कालोपसर्जने च तुल्यम् १२९९।

वचननिर्धारणम्

५८. जात्याख्याया-मेकस्मिन्बहुवचन-मन्यतरस्याम् ८१७।

५९. अस्मदो द्वयोश्च ८१८।

६०. फल्गुनी-प्रोष्ठपदानां - च नक्षत्रे ८१९।

६१. छन्दसि पुनर्वस्वोरेक-वचनम् ३३८७।

६२. विशाखयोश्च ३३८८।

६३. तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे - बहुवचनस्य द्विवचनं नित्यम् ८२० ।

एकशेषप्रकरणम्

६४. सरूपाणा-मेकशेष एकविभक्तौ १८८ ।
६५. वृद्धो यूना तल्लक्षणश्चेदेव विशेषः ९३१ ।
६६. स्त्री पुंवच्च ९३२ ।
६७. पुमान् स्त्रिया ९३३ ।
६८. भ्रातृपुत्रौ स्वसृ-दुहितृभ्याम् ९३४ ।
६९. नपुंसक-मनपुंसके-नैकवच्चा-स्यान्यतरस्याम् ९३५ ।
७०. पिता मात्रा ९३६ ।
७१. श्वशुरः श्वश्र्वा ९३७ ।
७२. त्यदादीनि सर्वैर्नित्यम् ९३८ ।
७३. ग्राम्य-पशु-सङ्घेष्व-तरुणेषु स्त्री ९३९ ।

## प्रथमाध्याये तृतीयः पादः

धातुसंज्ञा

१. भूवादयो धातवः १८ ।

इत्संज्ञाप्रकरणम्

२. उपदेशेऽजनुनासिक इत् ३ ।
३. हलन्त्यम् १ ।
४. न विभक्तौ तुस्माः १९० ।
५. आदिर्ञिटुडवः २२८९ ।
६. षः प्रत्ययस्य ४७४ ।
७. चुटू १८९ ।
८. लशक्वतद्धिते १९५ ।

इत्-लोप-विधिः

९. तस्य लोपः ६२ ।

परिभाषासूत्रम्

१०. यथासंख्य-मनुदेशः समानाम् १२८ ।
११. स्वरितेनाधिकारः ४६ ।

आत्मनेपदप्रकरणम्

१२. अनुदात्तङित आत्मनेपदम् २१५७ ।
१३. भावकर्मणोः २६७९ ।
१४. कर्तरि कर्मव्यतिहारे २६८० ।
१५. न गति-हिंसार्थेभ्यः २६८१ ।
१६. इतरेतरान्योऽन्योप-पदाच्च २६८२ ।
१७. नेर्विशः २६८३ ।
१८. परिव्यवेभ्यः क्रियः २६८४ ।
१९. विपराभ्यां जेः २६८५ ।
२०. आङो दोऽनास्यविहरणे २६८६ ।
२१. क्रीडोऽ-नुसंपरिभ्यश्च २६८७ ।
२२. समवप्र-विभ्यः स्थः २६८९ ।
२३. प्रकाशनस्थेयाख्ययोश्च २६९० ।
२४. उदोऽनूर्ध्वकर्मणि २६९१ ।
२५. उपान्मन्त्रकरणे २६९२ ।
२६. अकर्मकाच्च २६९३ ।
२७ उद्विभ्यां तपः २६९४ ।
२८. आङो यमहनः २६९५ ।
२९. समो गम्यृच्छिभ्याम् २६९९ ।
३०. निसमुप-विभ्यो ह्वः २७०३ ।
३१. स्पर्धायामाङः २७०४ ।

३२. गन्धना-वक्षेपण-सेवन-साहसिक्य-प्रतियत्न-प्रकथनोपयोगेषु कृञः २७०५।
३३. अधेः प्रसहने २७०६।
३४. वेः शब्दकर्मणः २७०७।
३५. अकर्मकाच्च २७०८।
३६. संमानोत्सञ्जना-चार्यकरण-ज्ञान-भृति-विगणन-व्ययेषु नियः २७०९।
३७. कर्तृस्थे चाशरीरे कर्मणि २७१०।
३८. वृत्ति-सर्ग-तायनेषु क्रमः २७११।
३९. उपपराभ्याम् २७१२।
४०. आङ उद्गमने २७१३।
४१. वेः पादविहरणे २७१४।
४२. प्रोपाभ्यां समर्थाभ्याम् २७१५।
४३. अनुपसर्गाद्वा २७१६।
४४. अपह्नवे ज्ञः २७१७।
४५. अकर्मकाच्च २७१८।
४६. संप्रतिभ्या-मनाध्याने २७१९।
४७. भासनोप-संभाषा-ज्ञान-यत्न-विमत्युपमन्त्रणेषु वदः २७२०।
४८. व्यक्तवाचां समुच्चारणे २७२१।
४९. अनोरकर्मकात् २७२२।
५०. विभाषा विप्रलापे २७२३।
५१. अवाद् ग्रः २७२४।
५२. समः प्रतिज्ञाने २७२५।
५३. उदश्चरः सकर्मकात् २७२६।
५४. समस्तृतीयायुक्तात् २७२७।
५५. दाणश्च सा चेच्चतुर्थ्यर्थे २७२८।
५६. उपाद्यमः स्वकरणे २७२९।
५७. ज्ञा-श्रु-स्मृ-दृशां सनः २७३१।
५८. नानोर्ज्ञः २७३२।
५९. प्रत्याङ्भ्यां श्रुवः २७३३।
६०. शदेः शितः २३६२।
६१. म्रियतेर्लुङ्-लिङोश्च २५३८।
६२. पूर्ववत्सनः २७३४।
६३. आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य २२४०।
६४. प्रोपाभ्यां युजे-रयज्ञपात्रेषु २७३५।
६५. समः क्ष्णुवः २७३६।
६६. भुजोऽनवने २७३७।
६७. णेरणौ यत्कर्म णौ चेत्स - कर्ताऽनाध्याने २७३८।
६८. भीस्म्योर्हेतुभये २५९४।
६९. गृधि-वञ्च्योः प्रलम्भने २७३९।
७०. लियः संमानन-शालीनी-करणयोश्च २५९२।
७१. मिथ्योपपदात् कृञोऽभ्यासे २७४०।

उभयपदप्रकरणम्

७२. स्वरितञितः कर्त्रभिप्राये क्रियाफले २१५८।
७३. अपाद्वदः २७४१।
७४. णिचश्च २५६४।
७५. समुदाङ्भ्यो यमोऽग्रन्थे २७४२।
७६. अनुपसर्गाज्ज्ञः २७४३।
७७. विभाषोपपदेन प्रतीयमाने २७४४।

परस्मैपदप्रकरणम्

७८. शेषात्कर्तरि परस्मैपदम् २१५९।

७९. अनुपराभ्यां कृञः २७४५ ।
८०. अभिप्रत्यतिभ्यः क्षिपः २७४६ ।
८१. प्राद्वहः २७४७ ।
८२. परेर्मृषः २७४८ ।
८३. व्याङ्-परिभ्यो रमः २७४९ ।
८४. उपाच्च २७५० ।
८५. विभाषाऽकर्मकात् २७५१ ।
८६. बुध-युध-नश-जनेङ्-प्रु-द्रु-स्रुभ्यो णेः २७५२ ।
८७. निगरण-चलनार्थेभ्यश्च २७५३ ।
८८. अणा-वकर्मकात् - चित्तवत्कर्तृकात् २७५४ ।
८९. न पादम्याङ्यमाङ्यस-परिमुह-रुचि-नृति-वद-वसः २७५५ ।
९०. वा क्यषः २६६९ ।
९१. द्युद्भ्यो लुङि २३४५ ।
९२. वृद्भ्यः स्यसनोः २३४७ ।
९३. लुटि च क्लृपः २३५१ ।

## प्रथमाध्याये चतुर्थः पादः

एकसंज्ञाधिकारः

१. आकडारादेका संज्ञा २३२ ।

अधिकारोऽयम्। इत आरभ्य 'कडाराः कर्मधारये २.२.३८' इति सूत्रावधिं यावद् एकस्य एकैव संज्ञा भवतीति वेदितव्यम्।

परिभाषासूत्रम्

२. विप्रतिषेधे परं कार्यम् १७५ ।

नदीसंज्ञा

३. यूस्त्र्याख्यौ नदी २६६ ।
४. नेयङुवङ्स्थाना-वस्त्री ३०३ ।
५. वाऽऽमि ३०४ ।
६. ङिति ह्रस्वश्च २९६ ।

घिसंज्ञा

७. शेषो घ्यसखि २४३ ।
८. पतिः समास एव २५७ ।
९. षष्ठीयुक्तश्छन्दसि वा ३३८९ ।

लघुसंज्ञा

१०. ह्रस्वं लघु ३१ ।

गुरुसंज्ञा

११. संयोगे गुरु ३२ ।
१२. दीर्घं च ३३ ।

अङ्गसंज्ञा

१३. यस्मात्प्रत्ययविधिस्तदादि-प्रत्ययेऽङ्गम् १९९ ।

पद-संज्ञा

१४. सुप्तिङन्तं पदम् २९ ।
१५. नः क्ये २६५९ ।
१६. सिति च १२५२ ।
१७. स्वादिष्वसर्वनामस्थाने २३० ।

भ-संज्ञा

१८. यचि भम् २३१ ।
१९. तसौ मत्वर्थे १८९६ ।
२०. अयस्मयादीनि छन्दसि ३३९० ।

एकवचन-द्विवचन-बहुवचनविधिः

२१. बहुषु बहुवचनम् १८७ ।
२२. द्व्येकयोर्द्विवचनैकवचने १८६ ।

कारकसंज्ञाधिकारः

२३. कारके ५३४ ।

१.४.२३ सूत्रादारभ्य १.४.५५ इत्यन्तं कारकसंज्ञाधिकारो वर्तते। एभिः सूत्रैः कारकसंज्ञा विधीयन्ते।

अपादानसंज्ञा

२४. ध्रुवमपायेऽपादानम् ५८६।
२५. भीत्रार्थानां भयहेतुः ५८८।
२६. पराजे-रसोढः ५८९।
२७. वारणार्थाना-मीप्सितः ५९०।
२८. अन्तर्धौ येनादर्शनमिच्छति ५९१।
२९. आख्यातोपयोगे ५९२।
३०. जनिकर्तुः प्रकृतिः ५९३।
३१. भुवः प्रभवः ५९४।

सम्प्रदानसंज्ञा

३२. कर्मणा यमभिप्रैति स संप्रदानम् ५६९।
३३. रुच्यर्थानां प्रीयमाणः ५७१।
३४. श्लाघ-ह्नुङ्-स्था-शपां ज्ञीप्स्यमानः ५७२।
३५. धारे-रुत्तमर्णः ५७३।
३६. स्पृहे-रीप्सितः५७४ ।
३७. क्रुध-द्रुहेर्ष्या-ऽसूयार्थानां-यं प्रति कोपः ५७५।
३८. क्रुधद्रुहो-रुपसृष्टयोः कर्म ५७६।
३९. राधीक्ष्योर्यस्य विप्रश्नः ५७७।
४०. प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता ५७८।
४१. अनुप्रति-गृणश्च ५७९।

करणसंज्ञा

४२. साधकतमं करणम् ५६०।
४३. दिवः कर्म च ५६२।
४४. परिक्रयणे संप्रदान-मन्यतरस्याम् ५८०।

अधिकरणसंज्ञा

४५. आधारोऽधिकरणम् ६३२।

कर्मसंज्ञा

४६. अधिशीङ्स्थाऽऽसां कर्म ५४२।
४७. अभिनिविशश्च ५४३।
४८. उपान्वध्याङ्वसः ५४४।
४९. कर्तुरीप्सिततमं कर्म ५३५।
५०. तथायुक्त चानीप्सितम् ५३८।
५१. अकथितं च ५३९।
५२. गति-बुद्धि-प्रत्यवसानार्थ-शब्दकर्मा-कर्मकाणा-मणि कर्ता स णौ ५४०।
५३. हृक्रो-रन्यतरस्याम् ५४१।

कर्तृसंज्ञा

५४. स्वतन्त्रः कर्ता ५५९।
५५. तत्प्रयोजको हेतुश्च २५७५।

निपातसंज्ञाधिकारः

५६. प्राग्रीश्वरान्निपाताः १९।
इत आरभ्य 'अधिरीश्वरे १.४.९७' इति सूत्रात् प्राङ् निपातसंज्ञाधिक्रियते।
५७. चादयोऽसत्त्वे २०।
५८. प्रादयः २१।

उपसर्गसंज्ञा

५९. उपसर्गाः क्रियायोगे २२।

गतिसंज्ञा

६०. गतिश्च २३।
६१. ऊर्यादिच्विडाचश्च ७६२।
६२. अनुकरणं चानितिपरं ७६३।
६३. आदरा-नादरयोः सदसती ७६४।
६४. भूषणेऽलम् ७६५।

६५. अन्त-रपरिग्रहे ७६६।
६६. कणेमनसी श्रद्धाप्रतीघाते ७६७।
६७. पुरोऽव्ययम् ७६८।
६८. अस्तं च ७६९।
६९. अच्छ गत्यर्थवदेषु ७७०।
७०. अदोऽनुपदेशे ७७१।
७१. तिरोन्तर्धौ ७७२।
७२. विभाषा कृञि ७७३।
७३. उपाजेऽन्वाजे ७७४।
७४. साक्षात्प्रभृतीनि च ७७५।
७५. अनत्याधान उरसिमनसी ७७६।
७६. मध्ये पदे निवचने च ७७७।
७७. नित्यं हस्ते पाणावुपयमने ७७८।
७८. प्राध्वं बन्धने ७७९।
७९. जीविकोपनिषदा-वौपम्ये ७८०।

गत्युपसर्गसंज्ञानियमः गत्युपसर्गप्रयोग--नियमो वा

८०. ते प्राग्धातोः २२३०।
८१. छन्दसि परेऽपि ३३९१।
८२. व्यवहिताश्च ३३९२।

कर्मप्रवचनीयसंज्ञाधिकारः

८३. कर्मप्रवचनीयाः ५४६।

इत आरभ्य 'विभाषा कृञि १.४.९८' इति सूत्रं यावत् कर्मप्रवचनीयसंज्ञाधिक्रियते।

८४. अनुर्लक्षणे ५४७।
८५. तृतीयार्थे ५४९।
८६. हीने ५५०।
८७. उपोऽधिके च ५५१।
८८. अपपरी वर्जने ५९६।
८९. आङ्मर्यादावचने ५९७।
९०. लक्षणेत्थंभूताख्यान-भाग-वीप्सासु प्रतिपर्यनवः ५५२।
९१. अभिरभागे ५५३।
९२. प्रतिः प्रतिनिधिप्रतिदानयोः ५९९।
९३. अधिपरी अनर्थकौ ५५४।
९४. सुः पूजायाम् ५५५।
९५. अतिरतिक्रमणे च ५५६।
९६. अपिः पदार्थ-संभावनाऽन्ववसर्ग-गर्हा-समुच्चयेषु ५५७।
९७. अधिरीश्वरे ६४४।
९८. विभाषा कृञि ६४६।

परस्मैपदसंज्ञा

९९. लः परस्मैपदम् २१५५।

आत्मनेपदसंज्ञा

१००. तङानावात्मनेपदम् २१५६।

प्रथममध्यमोत्तमसंज्ञाः

१०१. तिङस्त्रीणि त्रीणि प्रथम - मध्यमोत्तमाः २१६०।

एकवचन-द्विवचन-बहुवचन-संज्ञाः

१०२. तान्येकवचन-द्विवचन-बहुवचनान्येकशः २१६१।
१०३. सुपः १८५।

विभक्तिसंज्ञा

१०४. विभक्तिश्च १८४।

प्रथममध्यमोत्तमपुरुषविधिः

१०५. युष्मद्युपपदे समानाधिकरणे-स्थानिन्यपि मध्यमः २१६२।
१०६. प्रहासे च मन्योपपदे-मन्यते-रुत्तम एकवच्च २१६३।
१०७. अस्मद्युत्तमः २१६४।

१०८. **शेषे प्रथमः २१६५ ।**

संहितासंज्ञा

१०९. **परः संनिकर्षः संहिता २८ ।**

अवसानसंज्ञा

११०. **विरामोऽवसानम् २७ ।**

## द्वितीयाध्याये प्रथमः पादः

समर्थपरिभाषा

१. **समर्थः पदविधिः ६४७ ।**

परिभाषेयम् । यः कश्चिदिह शास्त्रे पदविधिः श्रूयते स समर्थाश्रितो बोध्यः ।

पराङ्गवद्भावातिदेशः

२. **सुबा-मन्त्रिते पराङ्गवत् स्वरे ३६५६ ।**

समासाधिकारः

३. **प्राक्कडारात्समासः ६४८ ।**

संज्ञाधिकारोऽयम् । 'कडाराः कर्मधारये २.२.३८' इति प्राक् समास इत्यधिक्रियते ।

४. **सह सुपा ६४९ ।**

अव्ययीभावाधिकारः

५. **अव्ययीभावः ६५१ ।**

'अव्ययीभाव' इति संज्ञाधिकारोऽयम् । इत आरभ्य 'तत्पुरुषः २.१.२२' इत्यतः प्राक् अव्ययीभावसंज्ञाधिक्रियते ।

६. **अव्ययं विभक्ति-समीप-समृद्धि-व्यृद्ध्यर्थाभावात्यया-संप्रति-शब्द-प्रादुर्भाव-पश्चाद्यथानुपूर्व्य-यौगपद्य-सादृश्य-संपत्ति-साकल्यान्त-वचनेषु ६५२ ।**

७. **यथाऽसादृश्ये ६६१ ।**

८. **यावदवधारणे ६६२ ।**

९. **सुप्प्रतिना मात्रार्थे ६६३ ।**

१०. **अक्ष-शलाका-संख्याः परिणा ६६४ ।**

११. **विभाषा ६६५ ।**

१२. **अपपरिबहिरञ्चवः पञ्चम्या ६६६ ।**

१३. **आङ् मर्यादाभिविध्योः ६६७ ।**

१४. **लक्षणे-नाभिप्रती-आभिमुख्ये ६६८ ।**

१५. **अनुर्यत्समया ६६९ ।**

१६. **यस्य चायामः ६७० ।**

१७. **तिष्ठद्गुप्रभृतीनि च ६७१ ।**

१८. **पारे मध्ये षष्ठ्या वा ६७२ ।**

१९. **संख्या वंश्येन ६७३ ।**

२०. **नदीभिश्च ६७४ ।**

२१. **अन्यपदार्थे च संज्ञायाम् ६७५ ।**

तत्पुरुषाधिकारः

२२. **तत्पुरुषः ६८४ ।**

संज्ञाधिकारोऽयम् । इत आरभ्य 'शेषो बहुव्रीहिः २.२.२३' इत्यतः प्राक् तत्पुरुष-संज्ञाधिक्रियते ।

२३. **द्विगुश्च ६८५ ।**

२४. **द्वितीया श्रितातीत-पतित-गतात्यस्त-प्राप्तापन्नैः ६८६ ।**

२५. **स्वयं क्तेन ६७८ ।**

२६. **खट्वा क्षेपे ६८८ ।**

२७. **सामि ६८९ ।**

२८. **कालाः ६९० ।**

२९. **अत्यन्तसंयोगे च ६९१ ।**

३०. **तृतीया तत्कृतार्थेन - गुणवचनेन ६९२ ।**

३१. पूर्वसदृश-समोनार्थ-कलह-निपुण-मिश्र-श्लक्ष्णैः ६९३ ।
३२. कर्तृकरणे कृता बहुलम् ६९४ ।
३३. कृत्यै-रधिकार्थवचने ६९५ ।
३४. अन्नेन व्यञ्जनम् ६९६ ।
३५. भक्ष्येण मिश्रीकरणम् ६९७ ।
३६. चतुर्थी तदर्थार्थ-बलि-हित-सुख-रक्षितैः ६९८ ।
३७. पञ्चमी भयेन ६९९ ।
३८. अपेतापोढ-मुक्त-पतिता--पत्रस्तै-रल्पशः ७०० ।
३९. स्तोकान्तिक-दूरार्थकृच्छ्राणि-क्तेन ७०१ ।
४०. सप्तमी शौण्डैः ७१७ ।
४१. सिद्ध-शुष्क-पक्व-बन्धैश्च ७१८ ।
४२. ध्वाङ्क्षेण क्षेपे ७१९ ।
४३. कृत्यैर्ऋणे ७२० ।
४४. संज्ञायाम् ७२१ ।
४५. क्तेनाहो-रात्रावयवाः ७२२ ।
४६. तत्र ७२३ ।
४७. क्षेपे ७२४ ।
४८. पात्रे-समितादयश्च ७२५ ।
४९. पूर्वकालैक-सर्वजरत्पुराण-नव-केवलाः समानाधिकरणेन ७२६ ।
५०. दिक्संख्ये संज्ञायाम् ७२७ ।
५१. तद्धितार्थोत्तरपद-समाहारे च ७२८ ।
५२. संख्यापूर्वो द्विगुः ७३० ।
५३. कुत्सितानि कुत्सनैः ७३२ ।
५४. पापाणके कुत्सितैः ७३३ ।
५५. उपमानानि सामान्यवचनैः ७३४ ।
५६. उपमितं व्याघ्रादिभिः-सामान्याप्रयोगे ७३५ ।
५७. विशेषणं विशेष्येण बहुलम् ७३६ ।
५८. पूर्वापर-प्रथम-चरम-जघन्य-समान-मध्य-मध्यम-वीराश्च ७३७ ।
५९. श्रेण्यादयः कृतादिभिः ७३८ ।
६०. क्तेन नञ्विशिष्टेनानञ् ७३९ ।
६१. सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः ७४० ।
६२. वृन्दारक-नाग-कुञ्जरैः -पूज्यमानम् ७४१ ।
६३. कतर-कतमौ जातिपरिप्रश्ने ७४२ ।
६४. किं क्षेपे ७४३ ।
६५. पोटा-युवति-स्तोक-कतिपय-गृष्टि-धेनु-वशा-वेहद्-वष्कयणी-प्रवक्तृ-श्रोत्रियाध्यापक-धूर्तैर्जातिः ७४४ ।
६६. प्रशंसावचनैश्च ७४७ ।
६७. युवा खलति-पलित-वलिन-जरतीभिः ७४८ ।
६८. कृत्य-तुल्याख्या अजात्या ७४९ ।
६९. वर्णो वर्णेन ७५०. ।
७०. कुमारः श्रमणादिभिः ७५२ ।
७१. चतुष्पादो गर्भिण्या ७५३ ।
७२. मयूरव्यंसकादयश्च ७५४ ।

द्वितीयाध्याये द्वितीयः पादः

१. पूर्वापराधरोत्तर-मेकदेशि-नैकाधिकरणे ७१२ ।
२. अर्धं नपुंसकम् ७१३ ।

३. द्वितीय-तृतीय-चतुर्थ-तुर्याण्यन्यतरस्याम् ७१४ ।
४. प्राप्तापन्ने च द्वितीयया ७१५ ।
५. कालाः परिमाणिना ७१६ ।
६. नञ् ७५६ ।
७. ईषदकृता ७५५ ।
८. षष्ठी ७०२ ।
९. याजकादिभिश्च ७०३ ।
१०. न निर्धारणे ७०४ ।
११. पूरण-गुण-सुहितार्थ-सदव्यय-तव्य-समानाधिकरणेन ७०५ ।
१२. क्तेन च पूजायाम् ७०६ ।
१३. अधिकरणवाचिना च ७०७ ।
१४. कर्मणि च ७०८ ।
१५. तृजकाभ्यां कर्तरि ७०९ ।
१६. कर्तरि च ७१० ।
१७. नित्यं क्रीडा-जीविकयोः ७११ ।
१८. कु-गतिप्रादयः ७६१ ।
१९. उपपद-मतिङ् ७८२ ।
२०. अमैवाव्ययेन ७८३ ।
२१. तृतीयाप्रभृतीन्यन्यतरस्याम् ७८४ ।
२२. क्त्वा च ७८५ ।

बहुव्रीहिसमासः

२३. शेषो बहुव्रीहिः ८२९ ।

इत आरभ्य 'चार्थे द्वन्द्वः २.२.२९' इत्यतः प्राक् बहुव्रीहिसंज्ञाधिक्रियते ।

२४. अनेकमन्यपदार्थे ८३० ।
२५. संख्ययाव्ययासन्ना-दूराधिक-संख्याः संख्येये ८४३ ।
२६. दिङ्नामान्यन्तराले ८४५ ।
२७. तत्र तेनेद-मिति सरूपे ८४६ ।
२८. तेन सहेति तुल्ययोगे ८४८ ।

द्वन्द्वसमासः

२९. चार्थे द्वन्द्वः ९०१ ।

पूर्वनिपात-परनिपातप्रकरणम्

२.२.३० सूत्रादारभ्य २.२.३८ इति सूत्रं यावत् पूर्वनिपात-परनिपात-प्रकरणं वर्तते ।

३०. उपसर्जनं पूर्वम् ६५४ ।
३१. राजदन्तादिषु परम् ९०२ ।
३२. द्वन्द्वे घि ९०३ ।
३३. अजाद्यदन्तम् ९०४ ।
३४. अल्पाच्तरम् ९०५ ।
३५. सप्तमी-विशेषणे बहुव्रीहौ ८९८ ।
३६. निष्ठा ८९९ ।
३७. वाहिताग्न्यादिषु ९०० ।
३८. कडाराः कर्मधारये ७५१ ।

## द्वितीयाध्याये तृतीयः पादः

अनभिहिताधिकारः

१. अनभिहिते ५३६ ।

अधिकारोऽयम् । इत आरभ्य 'चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः २.२.७३' इति सूत्रं यावदापादान्तम् अनभिहिते कर्मादौ विभक्तयो विधीयन्ते । अतोऽयं पादो विभक्तिपाद इत्यभिधीयते ।

द्वितीया विभक्तिः

२. कर्मणि द्वितीया ५३७ ।
३. तृतीया च होश्छन्दसि ३३९४ ।
४. अन्तरान्तरेण युक्ते ५४५ ।
५. कालाध्वनो-रत्यन्तसंयोगे ५५८ ।
६. अपवर्गे तृतीया ५६३ ।

७. सप्तमी-पञ्चम्यौ-
कारकमध्ये ६४३ ।

८. कर्मप्रवचनीय-युक्ते-
द्वितीया ५४८ ।

९. यस्मादधिकं यस्य चेश्वरवचनं
तत्र सप्तमी ६४५ ।

१०. पञ्चम्यपाङ्परिभि: ५९८ ।

११. प्रतिनिधि-प्रतिदाने च-
यस्मात् ६०० ।

१२. गत्यर्थ-कर्मणि द्वितीया-चतुर्थ्यौ-
चेष्टाया-मनध्वनि ५८५ ।

चतुर्थी विभक्ति:

१३. चतुर्थी संप्रदाने ५७० ।

१४. क्रियार्थोपपदस्य च कर्मणि -
स्थानिन: ५८१ ।

१५. तुमर्थाच्च भाववचनात् ५८२ ।

१६. नम: स्वस्ति-स्वाहा-स्वधालं-
वषड्योगाच्च ५८३ ।

१७. मन्यकर्मण्यनादरे-
विभाषाप्राणिषु ५८४ ।

तृतीया विभक्ति:

१८. कर्तृकरणयोस्तृतीया ५६१ ।

१९. सहयुक्तेऽप्रधाने ५६४ ।

२०. येनाङ्ग-विकार: ५६५ ।

२१. इत्थंभूतलक्षणे ५६६ ।

२२. संज्ञोऽन्यतरस्यां कर्मणि ५६७ ।

२३. हेतौ ५६८ ।

२४. अकर्तर्यृणे पञ्चमी ६०१ ।

२५. विभाषा गुणेऽस्त्रियाम् ६०२ ।

२६. षष्ठी हेतुप्रयोगे ६०७ ।

२७. सर्वनाम्नस्तृतीया च ६०८ ।

पञ्चमी विभक्ति:

२८. अपादाने पञ्चमी ५८७ ।

२९. अन्यारादितरर्ते-दिक्छब्दाञ्चू-
त्तर-पदाजाहि-युक्ते ५९५ ।

३०. षष्ठ्यतसर्थप्रत्ययेन ६०९ ।

३१. एनपा द्वितीया ६१० ।

३२. पृथग्विना-नानाभिस्तृतीयान्य -
तरस्याम् ६०३ ।

३३. करणे च स्तोकाल्प-कृच्छ्र-
कतिपयस्या-सत्त्व-वचनस्य
६०४ ।

३४. दूरान्तिकार्थै:
षष्ठ्यन्यतरस्याम् ६११ ।

३५. दूरान्तिकार्थेभ्यो-
द्वितीया च ६०५ ।

सप्तमी विभक्ति:

३६. सप्तम्यधिकरणे च ६३३ ।

३७. यस्य च भावेन-
भावलक्षणम् ६३४ ।

३८. षष्ठी चानादरे ६३५ ।

३९. स्वामीश्वराधिपति-दायाद-
साक्षि-प्रतिभू-प्रसूतैश्च ६३६ ।

४०. आयुक्त-कुशलाभ्यां-
चासेवायाम् ६३७ ।

४१. यतश्च निर्धारणम् ६३८ ।

४२. पञ्चमी विभक्ते ६३९ ।

४३. साधु-निपुणाभ्या-मर्चायां
सप्तम्यप्रते: ६४० ।

४४. प्रसितोत्सुकाभ्यां तृतीया च ६४१ ।

४५. नक्षत्रे च लुपि ६४२।

प्रथमा विभक्तिः

४६. प्रातिपदिकार्थ-लिङ्ग-परिमाण-वचनमात्रे प्रथमा ५३२।

४७. सम्बोधने च ५३३।

आमन्त्रितसंज्ञा

४८. सामन्त्रितम् ४११।

सम्बुद्धिसंज्ञा

४९. एकवचनं संबुद्धिः १९२।

षष्ठी विभक्तिः

५०. षष्ठी शेषे ६०६।

५१. ज्ञोऽविदर्थस्य करणे ६१२।

५२. अधीगर्थ-दयेशां कर्मणि ६१३।

५३. कृञः प्रतियत्ने ६१४।

५४. रुजार्थानां भाववचनाना-मज्वरेः ६१५।

५५. आशिषि नाथः ६१६।

५६. जासि-निप्रहण-नाट-क्राथ-पिषां हिंसायाम् ६१७।

५७. व्यवहृपणोः समर्थयोः ६१८।

५८. दिवस्तदर्थस्य ६१९।

५९. विभाषोपसर्गे ६२०।

६०. द्वितीया ब्राह्मणे ३३९५।

६१. प्रेष्यब्रुवोर्हविषो देवता-संप्रदाने ६२१।

६२. चतुर्थ्यर्थे बहुलं छन्दसि ३३९६।

६३. यजेश्च करणे ३३९७।

६४. कृत्वोऽर्थप्रयोगे - कालेऽधिकरणे ६२२।

६५. कर्तृकर्मणोः कृति ६२३।

६६. उभयप्राप्तौ कर्मणि ६२४।

६७. क्तस्य च वर्तमाने ६२५।

६८. अधिकरणवाचिनश्च ६२६।

६९. न लोकाव्यय-निष्ठा-खलर्थ-तृनाम् ६२७।

७०. अकेनोर्भविष्य-दाधमर्ण्ययोः ६२८।

७१. कृत्यानां कर्तरि वा ६२९।

७२. तुल्यार्थै-रतुलोपमाभ्यां तृतीयान्यतरस्याम् ६३०।

७३. चतुर्थी चाशिष्यायुष्य-मद्र-भद्र-कुशल-सुखार्थ-हितैः ६३१।

## द्वितीयाध्याये चतुर्थः पादः

द्विगुद्वन्द्वसमासयोर्वचननिर्णयः

इत आरभ्य '२.४.३१' इति सूत्रं यावत् समासानां लिङ्गवचननिर्धारणं क्रियते।

१. द्विगु-रेकवचनम् ७३१।

२. द्वन्द्वश्च प्राणि-तूर्य-सेनाङ्गानाम् ९०६।

३. अनुवादे चरणानाम् ९०७।

४. अध्वर्यु-क्रतु-रनपुंसकम् ९०८।

५. अध्ययनतो-ऽविप्रकृष्टा-ख्यानाम् ९०९।

६. जाति-रप्राणिनाम् ९१०।

७. विशिष्टलिङ्गो - नदीदेशोऽग्रामाः ९११।

८. क्षुद्रजन्तवः ९१२।

९. येषां च विरोधः - शाश्वतिकः ९१३।

१०. शूद्राणा-मनिरवसितानाम् ९१४।

११. गवाश्वप्रभृतीनि च ९१५ ।
१२. विभाषा वृक्ष-मृग-तृण-धान्य-व्यञ्जन-पशु-शकुन्यश्व-वडव-पूर्वापराधरोत्तराणाम् ९१६ ।
१३. विप्रतिषिद्धं चानधिकरण-वाचि ९१७ ।
१४. न दधिपय आदीनि ९१८ ।
१५. अधिकरणैतावत्त्वे च ९१९ ।
१६. विभाषा समीपे ९२० ।

द्विगुद्वन्द्वाव्ययीभावानां लिङ्गनिर्णयः

१७. स नपुंसकम् ८२१ ।
१८. अव्ययीभावश्च ६५९ ।

तत्पुरुषे नपुंसकाधिकारः

१९. तत्पुरुषोऽनञ्कर्मधारयः ८२२ ।

अधिकारोऽयमुत्तरसूत्रेषूपतिष्ठते । यदित ऊर्ध्वमनुक्रमिष्यते तत्र नञ्समासं, कर्मधारयं च वर्जयित्वाऽन्यस्तत्पुरुषो नपुंसकलिङ्गे भवतीत्येतदधिकृतं वेदितव्यम् ।

२०. संज्ञायां कन्थोशीनरेषु ८२३ ।
२१. उपज्ञोपक्रमं तदाद्या-चिख्यासायाम् ८२४ ।
२२. छाया बाहुल्ये ८२५ ।
२३. सभा राजाऽमनुष्यपूर्वा ८२६ ।
२४. अशाला च ८२७ ।
२५. विभाषा सेना-सुराच्छाया-शाला-निशानाम् ८२८ ।

द्वन्द्व-तत्पुरुषयोर्लिङ्गनिर्णयः

२६. परवल्लिङ्गं द्वन्द्व-तत्पुरुषयोः ८१२ ।
२७. पूर्ववदश्व-वडवौ ८१३ ।
२८. हेमन्तशिशिरा-वहोरात्रे चच्छन्दसि ३३९९ ।
२९. रात्राह्नाहाः पुंसि ८१४ ।
३०. अपथं नपुंसकम् ८१५ ।
३१. अर्धर्चाः पुंसि च ८१६ ।

अन्वादेशप्रकरणम् २.२.३४ इति यावत्

३२. इदमोऽन्वादेशेऽ-शनुदात्तस्तृतीयादौ ३५० ।
३३. एतदस्त्रतसोस्त्रतसौ-चानुदात्तौ १९६२ ।
३४. द्वितीयाटौस्स्वेनः ३५१ ।

आर्धधातुक इत्यधिकारः

**अधिकारेऽस्मिन्नार्धधातुकप्रत्ययेषु परेषु धात्वादेशाः विधीयन्ते**

३५. आर्धधातुके २४३२ ।

अधिकारोऽयं 'ण्यक्षत्रियार्षञितो यूनि लुगणिञोः २.४.५७' इति सूत्रात् प्राग्वर्तते । यदित ऊर्ध्वमनुक्रमिष्यते तदार्धधातुके वेदितव्यम् ।

३६. अदो जग्धिर्ल्यप्ति किति ३०८० ।
३७. लुङ्सनोर्घस्लृ २४२७ ।
३८. घञपोश्च ३२३६ ।
३९. बहुलं छन्दसि ३३९८ ।
४०. लिट्यन्यतरस्याम् २४२४ ।
४१. वेञो वयिः २४११ ।
४२. हनो वध लिङि २४३३ ।
४३. लुङि च २४३४ ।
४४. आत्मनेपदेष्वन्यतरस्याम् २६९६ ।

४५. इणो गा लुङि २४५८।
४६. णौ गमिरबोधने २६०७।
४७. सनि च २६१५।
४८. इङश्च २६१६।
४९. गाङ् लिटि २४५९।
५०. विभाषा लुङ्लृङोः २४६०।
५१. णौ च संश्चङोः २५७९।
५२. अस्तेर्भूः २४७०।
५३. ब्रुवो वचिः २४५३।
५४. चक्षिङः ख्याञ् २४३६।
५५. वा लिटि २४३७।
५६. अजेर्व्यघञपोः २२९२।
५७. वा यौ ३२९२।

लुक्प्रकरणम् - २.४.५८-८४

५८. ण्यक्षत्रियार्षञितो यूनि - लुगणिञोः १२७६।
५९. पैलादिभ्यश्च १०८४।
६०. इञः प्राचाम् १०८५।
६१. न तौल्वलिभ्यः १०८६।
६२. तद्राजस्य बहुषु - तेनैवास्त्रियाम् ११९३।
६३. यस्कादिभ्यो गोत्रे ११४६।
६४. यञञोश्च ११०८।
६५. अत्रि-भृगु-कुत्स-वसिष्ठ - गोतमाङ्गिरोभ्यश्च ११४७।
६६. बह्वच इञः प्राच्यभरतेषु ११४८।
६७. न गोपवनादिभ्यः ११४९।
६८. तिक-कितवादिभ्यो द्वन्द्वे ११५०।
६९. उपकादिभ्योऽन्यतरस्या-मद्वन्द्वे ११५१।
७०. आगस्त्य-कौण्डिन्ययो-रगस्ति - कुण्डिनच् ११५२।
७१. सुपो धातुप्रातिपदिकयोः ६५०।
७२. अदिप्रभृतिभ्यः शपः २४२३।
७३. बहुलं छन्दसि ३४००।
७४. यङोऽचि च २६५०।
७५. जुहोत्यादिभ्यः श्लुः २४८९ः।
७६. बहुलं छन्दसि ३४०१।
७७. गाति-स्था-घु-पा-भूभ्यः सिचः परस्मैपदेषु २२२३।
७८. विभाषा घ्रा-धेट्-शाच्छासः २३७६।
७९. तनादिभ्यस्तथासोः २५४७।
८०. मन्त्रे घस-ह्वर-णश-वृ-दहाद्-वृच्-कृ-गमि-जनिभ्यो लेः ३४०२।
८१. आमः २२३८।
८२. अव्ययादाप्सुपः ४५२।
८३. नाव्ययीभावा-दतोऽम्त्व-पञ्चम्याः ६५७।
८४. तृतीयासप्तम्योर्बहुलम् ६५८।

लादेशाः

८५. लुटः प्रथमस्य डारौरसः २१८८।

## तृतीयाध्याये प्रथमः पादः

प्रत्ययाधिकारः

१. प्रत्ययः १८०।

इत आरभ्यापञ्चमाध्यायपरिसमाप्ते--रधिकारोऽयम्। अत्र प्रत्ययशब्दः संज्ञात्वे--नाधिक्रियते। इत ऊर्ध्वं येऽनुक्रमिष्यन्ते, प्रत्ययसंज्ञास्ते वेदितव्याः।

एतेषु त्रिष्वध्यायेषु धातोः, प्रातिपदिकाद्, ङ्यन्तादाबन्ताच्च प्रत्यया विधीयन्ते। अतस्त्रयोऽध्याया इमे प्रत्ययाध्याया इति कथ्यन्ते। अत्र विशेषाः -

अत्र ३.१.३२ इत्यन्तं सनादयो द्वादश प्रत्ययाः सन्ति। एते धातुप्रत्यया, इति कथ्यन्ते। ततः ३.३.९० इत्यन्तं विकरणप्रत्ययाः सन्ति। ततः ३.४.७६ इत्यन्तं लकारप्रत्ययाः कृत्प्रत्ययाश्च सन्ति। ततः 'लस्य ३.४.७७' इत्यारभ्य ३.४.११७ इत्यन्तं लाधिकारो वर्तते।

प्रत्ययस्य परत्वाधिकारः

२. **परश्च १८१।**

इत आरभ्यापञ्चमाध्यायपरिसमाप्ते--रधिकारोऽयं योगे योग उपतिष्ठते। परश्च स भवति धातोर्वा प्रातिपदिकाद्वा, यः प्रत्ययसंज्ञः।

प्रत्ययस्याद्युदात्तत्वाधिकारः

३. **आद्युदात्तश्च ३७०८।**

अयमप्यधिकारः परिभाषा वा आ पञ्चमाध्यायपरिसमाप्तेः। आद्युदात्तश्च स भवति यः प्रत्ययसंज्ञः।

४. **अनुदात्तौ सुप्पितौ ३७०९।**

पूर्वस्यायमपवादः। सुपः, पितश्च प्रत्यया अनुदात्ता भवन्ति।

सनादयो धातुप्रत्ययाः

सन् प्रत्ययः

५. **गुप्तिज्किद्भ्यः सन् २३९३।**

६. **मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य २३९४।**

७. **धातोः कर्मणः समानकर्तृका--दिच्छायां वा २६०८।**

क्यच् प्रत्ययः

८. **सुप आत्मनः क्यच् २६५७।**

काम्यच् प्रत्ययः

९. **काम्यच्च २६६३।**

१०. **उपमानादाचारे २६६४।**

क्यङ् प्रत्ययः

११. **कर्तुः क्यङ् सलोपश्च २६६५।**

१२. **भृशादिभ्यो भुव्यच्वेर्लोपश्च - हलः २६६७।**

क्यष् प्रत्ययः

१३. **लोहितादिडाज्भ्यः क्यष् २६६८।**

१४. **कष्टाय क्रमणे २६७०।**

१५. **कर्मणो रोमन्थतपोभ्यां वर्तिचरोः २६७१।**

१६. **बाष्पोष्मभ्यामुद्वमने २६७२।**

१७. **शब्दवैरकलहाभ्रकण्वमेघेभ्यः - करणे २६७३।**

१८. **सुखादिभ्यः - कर्तृवेदनायाम् २६७४।**

क्यच् प्रत्ययः

१९. **नमोवरिवश्चित्रङः - क्यच् २६७५।**

णिङ् प्रत्ययः

२०. **पुच्छभाण्डचीवराण्णिङ् २६७६।**

णिच् प्रत्ययः

२१. **मुण्ड-मिश्र-श्लक्षण-लवण-व्रत-वस्त्र-हल-कल-कृत-तूस्तेभ्यो णिच् २६७७।**

धात्वधिकारः (प्रथमः)

यङ् प्रत्ययः

२२. **धातो-रेकाचो हलादेः - क्रियासमभिहारे यङ् २६२९।**

अस्मात्सूत्राद् 'धातोः' इत्येकदेश--स्याधिकारः 'कुषिरजोः प्राचां श्यन् परस्मैपदं च ३.१.९०' इति सूत्रं यावद् वर्तते। अस्मिन् धात्वधिकारे सनादिधातुप्रत्यया, विकरण--प्रत्ययाश्च सन्ति।

२३. नित्यं कौटिल्ये गतौ २६३४।

२४. लुप-सद-चर-जप-जभ-दह-दश-गृभ्यो भाव-गर्हायाम् २६३५।

णिच् प्रत्ययः

२५. सत्याप-पाश-रूप-वीणा-तूल-श्लोक-सेना-लोम-त्वच-वर्म-वर्ण-चूर्ण-चुरादिभ्यो णिच् २५६३।

२६. हेतुमति च २५७६।

यक् प्रत्ययः

२७. कण्ड्वादिभ्यो यक् २६७८।

आयप्रत्ययः

२८. गुपू-धूप-विच्छि-पणि-पनिभ्य -आयः २३०३।

ईयङ् प्रत्ययः

२९. ऋतेरीयङ् २४२२।

णिङ् प्रत्ययः

३०. कमेर्णिङ् २३१०।

३१. आयादय आर्धधातुके वा २३०५।

धातुसंज्ञा

३२. सनाद्यन्ता धातवः २३०४।

'स्यतासी लृलुटोः' इत्यस्मात् सूत्रादा--रभ्य 'कुषिरजोः प्राचां श्यन् परस्मैपदं च ३.१.९०' इत्यन्तं विकरणप्रत्ययाः सन्ति।

स्य-तास्-प्रत्ययौ

३३. स्यतासी लृ-लुटोः २१८६।

सिप्प्रत्ययः

३४. सिब्बहुलं लेटि ३४२५।

आम्प्रत्ययः

३५. कास्प्रत्यया-दाममन्त्रे लिटि २३०६।

३६. इजादेश्च गुरुमतोऽनृच्छः २२३७।

३७. दयायासश्च २३२४।

३८. उष-विद-जागृभ्योऽन्य-तरस्याम् २३४१।

३९. भी-ह्री-भृ-हुवां श्लुवच्च २४९१।

४०. कृञ्चानुप्रयुज्यते लिटि २२३९।

४१. विदांकुर्वन्त्वित्यन्य-तरस्याम् २४६५।

४२. अभ्युत्सादयां-प्रजनयां-चिकयां-रमयामकः पावयांक्रियाद्-विदामक्रन्निति च्छन्दसि ३४०३।

च्लिप्रत्ययः

४३. च्लि लुङि २२२१।

सिच्प्रत्ययः

४४. च्लेः सिच् २२२२।

क्सप्रत्ययः

४५. शल इगुपधादनिटः क्सः २३३६।

४६. श्लिष आलिङ्गने २५१४।

४७. न दृशः २४०७।

चङ्प्रत्ययः

४८. णि-श्रि-द्रु-स्रुभ्यः -कर्तरि चङ् २३१२।

४९. विभाषा धेट्श्व्योः २३७५।

५०. गुपेश्छन्दसि ३४०४।

५१. नोनयति-ध्वनयत्येलयत्यर्द-यतिभ्यः ३४०५।

अङ्प्रत्ययः

५२. अस्यति-वक्ति-ख्यातिभ्योऽङ् २४३८ ।

५३. लिपि-सिचि-ह्वश्च २४१८ ।

५४. आत्मनेपदेष्वन्यतरस्याम् २४१९ ।

५५. पुषादि-द्युतादि-लृदितः परस्मैपदेषु २३४३ ।

५६. सर्ति-शास्त्यर्तिभ्यश्च २३८२ ।

५७. इरितो वा २२६९ ।

५८. जॄ-स्तम्भु-म्रुचु-म्लुचु-ग्रुचु-ग्लुचु-ग्लुञ्चु-श्विभ्यश्च २२९१ ।

५९. कृ-मृ-दृ-रुहिभ्यश्छन्दसि ३४०६ ।

चिण्प्रत्ययः

६०. चिण्ते पदः २५१३ ।

६१. दीप-जन-बुध-पूरि-तायि-प्यायिभ्योऽन्यतरस्याम् २३२८ ।

६२. अचः कर्मकर्तरि २७६८ ।

६३. दुहश्च २७६९ ।

६४. न रुधः २७७० ।

६५. तपोऽनुतापे च २७६० ।

६६. चिण्भावकर्मणोः २७५८ ।

यक्प्रत्ययः

६७. सार्वधातुके यक् २७५६ ।

शप्प्रत्ययः

६८. कर्तरि शप् २१६७ ।

श्यन्प्रत्ययः

६९. दिवादिभ्यः श्यन् २५०५ ।

७०. वा भ्राश-भ्लाश-भ्रमु-क्रमु-क्लमु-त्रसि-त्रुटि-लषः २३२१ ।

७१. यसोऽनुपसर्गात् २५२१ ।

७२. संयसश्च २५२२ ।

श्नुप्रत्ययः

७३. स्वादिभ्यः श्नुः २५२३ ।

७४. श्रुवः शृ च २३८६ ।

७५. अक्षोऽन्यतरस्याम् २३३८ ।

७६. तनूकरणे तक्षः २३३९ ।

शप्रत्ययः

७७. तुदादिभ्यः शः २५३४ ।

श्नम्प्रत्ययः

७८. रुधादिभ्यः श्नम् २५४३ ।

उप्रत्ययः

७९. तनादिकृञ्भ्यः उः २४६६ ।

८०. धिन्वि-कृण्व्यो र च २३३२ ।

श्नाप्रत्ययः

८१. क्र्यादिभ्यः श्ना २५५४ ।

८२. स्तन्भु-स्तुन्भु-स्कन्भु-स्कुन्भु-स्कुञ्भ्यः श्नुश्च २५५५ ।

शानच्प्रत्ययः

८३. हलः श्नः शानज्झौ २५५७ ।

शायच्प्रत्ययः

८४. छन्दसि शायजपि ३४३२ ।

८५. व्यत्ययो बहुलम् ३४३३ ।

अङ्प्रत्ययः

८६. लिङ्याशिष्यङ् ३४३४ ।

कर्मवद्भावप्रकरणम्

८७. कर्मवत्कर्मणा तुल्यक्रियः २७६६ ।

८८. तपस्तपःकर्मकस्यैव २७७१ ।

८९. न दुह-स्नु-नमां-यक्चिणौ २७६७ ।

श्यन्प्रत्ययः

९०. कुषिरजोः प्राचां श्यन् - परस्मैपदं च २७७२ ।

धात्वधिकारः (द्वितीयः)

९१. धातोः २८२९ ।

इत आरभ्याधिकारोऽयं वेदितव्य आ तृतीयाध्यायपरिसमाप्तेः । यदित ऊर्ध्वमनु--क्रमिष्यते, धातोरित्येवं तद् वेदितव्यम् ।

उपपदसंज्ञा

९२. तत्रोपपदं सप्तमीस्थम् ७८१ ।

कृत्संज्ञा

९३. कृदतिङ् ३७४ ।

अस्मिन् द्वितीये धात्वधिकारे, इत आरभ्य ३.४.६६ इति यावत् कृत्प्रत्ययाः सन्ति । अनुवृत्त्यनुरोधेन लकारप्रत्यया अप्यत्रैव विहिताः ।

इत्थञ्च द्विविधाः प्रत्ययाः सन्त्यस्मिन् द्वितीये धात्वधिकारे । कृत्प्रत्यया, लकार--प्रत्ययाश्च । ३.४.७७ सूत्रादारभ्य लकाराणां स्थाने विहितास्तिङ्प्रत्यया अप्यस्मिन्नेवाधिकारे वर्तन्ते । एते विवेकेन विवेच्याः । एतेषु तिङ्भिन्नानां प्रत्ययानां कृत्संज्ञा भवतीति वेदितव्यम् ।

परिभाषासूत्रम्

९४. वाऽसरूपोऽस्त्रियाम् २८३० ।

अस्मिन् द्वितीये धात्वधिकारेऽसमान-रूपोऽपवादप्रत्यय उत्सर्गस्य वा बाधको भवति स्त्र्यधिकारविहितप्रत्ययं वर्जयित्वा ।

कृत्यसंज्ञा

९५. कृत्याः २८३१ ।

इत आरभ्य 'ण्वुल्तृचौ ३.१.१३३' इत्यतः प्राक् ये षट् प्रत्यया अनुक्रमिष्यन्ते, कृत्यसंज्ञकास्ते वेदितव्याः ।

तव्यत्-तव्य-अनीयर्-प्रत्ययाः

९६. तव्यत्तव्यानीयरः २८३४ ।

यत्प्रत्ययः

९७. अचो यत् २८४२ ।

९८. पोरदुपधात् २८४४ ।

९९. शकिसहोश्च २८४७ ।

१००. गद-मद-चर-यमश्चानुपसर्गे २८४८ ।

१०१. अवद्य-पण्य-वर्या गर्ह्य-पणितव्या-निरोधेषु २८४९ ।

१०२. वह्यं करणम् २८५० ।

१०३. अर्यः स्वामिवैश्ययोः २८५१ ।

१०४. उपसर्या काल्या प्रजने २८५२ ।

१०५. अजर्यं संगतम् २८५३ ।

क्यप् प्रत्ययः

१०६. वदः सुपि क्यप् च २८५४ ।

१०७. भुवो भावे २८५५ ।

१०८. हनस्त च २८५६ ।

१०९. एति-स्तु-शास्वृ-दृ-जुषः - क्यप् २८५७ ।

११०. ऋदुपधाच्चा - क्लृपिचृतेः २८५९ ।

१११. ई च खनः २८६० ।

११२. भृञोऽन्यतरस्याम् २८६१ ।

११३. मृजेर्विभाषा २८६२ ।

११४. राजसूय-सूर्य-मृषोद्य-रुच्य-कुप्य-कृष्ट-पच्याव्यथ्याः २८६५ ।

११५. भिद्योद्ध्यौ नदे २८६६ ।
११६. पुष्य-सिद्ध्यौ नक्षत्रे २८६७ ।
११७. विपूय-विनीय-जित्या-मुञ्ज-कल्क-हलिषु २८६८ ।
११८. प्रत्यपिभ्यां ग्रहेः २८६९ ।
११९. पदास्वैरि-बाह्यापक्षेषु च २८७० ।
१२०. विभाषा कृ-वृषोः २८७१ ।
१२१. युग्यं च पत्रे २८७३ ।
१२२. अमावस्य-दन्यतरस्याम् २८७४ ।
१२३. छन्दसि निष्टक्र्य-देवहूय-प्रणीयोन्नीयोच्छिष्य-मर्यस्तर्या-ध्वर्य-खन्य-खान्य-देवयज्या-पृच्छ्य-प्रतिषीव्य-ब्रह्मवाद्य-भाव्य-स्ताव्योप-चाय्यपृडानि ३४०७ ।

ण्यत् प्रत्ययः

१२४. ऋहलोर्ण्यत् २८७२ ।
१२५. ओरावश्यके २८८६ ।
१२६. आसु-यु-वपि-रपि-लपि-त्रपि-चमश्च २८८७ ।
१२७. आनाय्योऽनित्ये २८८८ ।
१२८. प्रणाय्योऽसंमतौ २८८९ ।
१२९. पाय्य-सांनाय्य-निकाय्य-धाय्या-मान-हविर्निवास-सामिधेनीषु २८९० ।
१३०. क्रतौ कुण्डपाय्य-संचाय्यौ २८९१ ।
१३१. अग्नौ परिचाय्योपचाय्य-समूह्याः २८९२ ।
१३२. चित्याग्निचित्ये च २८९३ ।

ण्वुल्-तृच् प्रत्ययौ

१३३. ण्वुल्तृचौ २८९५ ।

ल्यु-णिनि-अच् प्रत्ययाः

१३४. नन्दि-ग्रहि-पचादिभ्यो-ल्युणिन्यचः २८९६ ।

क-प्रत्ययः

१३५. इगुपध-ज्ञा-प्री-किरः कः २८९७ ।
१३६. आतश्चोपसर्गे २८९८ ।

श-प्रत्ययः

१३७. पा-घ्रा-ध्मा-धेट्-दृशः शः २८९९ ।
१३८. अनुपसर्गाल्लिम्प-विन्द-धारि-पारि-वेद्युदेजि-चेति-साति-साहिभ्यश्च २९०० ।
१३९. ददाति-दधात्योर्विभाषा २९०१ ।

ण-प्रत्ययः

१४०. ज्वलिति-कसन्तेभ्यो णः २९०२ ।
१४१. श्याद् व्यधास्रु-संस्रवती-णवसा-वहृ-लिह-श्लिष-श्वसश्च २९०३ ।
१४२. दुन्यो-रनुपसर्गे २९०४ ।
१४३. विभाषा ग्रहः २९०५ ।

क-प्रत्ययः

१४४. गेहे कः २९०६ ।

ष्वुन् प्रत्ययः

१४५. शिल्पिनि ष्वुन् २९०७ ।

थकन् प्रत्ययः

१४६. गस्थकन् २९०८ ।

ण्युट् प्रत्ययः

१४७. ण्युट् च २९०९ ।

१४८. हश्च व्रीहि-कालयोः २९१० ।

वुन् प्रत्ययः

१४९. प्रु-सृल्वः समभिहारे वुन् २९११ ।

१५०. आशिषि च २९१२ ।

## तृतीयाध्याये द्वितीयः पादः

अण् प्रत्ययः

१. कर्मण्यण् २९१३ ।

२. ह्वावामश्च २९१४ ।

क-प्रत्ययः

३. आतोऽनुपसर्गे कः २९१५ ।

४. सुपि स्थः २९१६ ।

५. तुन्दशोकयोः परिमृजापनुदोः २९१९ ।

६. प्रे दाज्ञः २९२० ।

७. समि ख्यः २९२१ ।

ट-प्रत्ययः

८. गापोष्टक् २९२२ ।

अच् प्रत्ययः

९. हरते-रनुद्यमनेऽच् २९२३ ।

१०. वयसि च २९२४ ।

११. आङि ताच्छील्ये २९२५ ।

१२. अर्हः २९२६ ।

१३. स्तम्ब-कर्णयो रमिजपोः २९२७ ।

१४. शमि धातोः संज्ञायाम् २९२८ ।

१५. अधिकरणे शेतेः २९२९ ।

ट-प्रत्ययः

१६. चरेष्टः २९३० ।

१७. भिक्षा-सेना-दायेषु च २९३१ ।

१८. पुरोग्रतोऽग्रेषु सर्तेः २९३२ ।

१९. पूर्वे कर्तरि २९३३ ।

२०. कृञो हेतु-ताच्छील्या-नुलोम्येषु २९३४ ।

२१. दिवा-विभा-निशा-प्रभा-भास्करान्तानन्तादि-बहु-नान्दी-किं-लिपि-लिबि-बलि-भक्ति-कर्तृ-चित्र-क्षेत्र-संख्या-जङ्घा-बाह्व-हर्यत्तद्-धनु-ररुःषु २९३५ ।

२२. कर्मणि भृतौ २९३६ ।

२३. न शब्द-श्लोक-कलह-गाथा-वैर-चाटु-सूत्र-मन्त्रपदेषु २९३७ ।

इन् प्रत्ययः

२४. स्तम्ब-शकृतोरिन् २९३८ ।

२५. हरतेर्दृति-नाथयोः पशौ २९३९ ।

२६. फलेग्रहि-रात्मंभरिश्च २९४० ।

२७. छन्दसि वन-सन-रक्षि-मथाम् ३४०८ ।

खश् प्रत्ययः

२८. एजेः खश् २९४१ ।

२९. नासिकास्तनयो-र्ध्माधेटोः २९४४ ।

३०. नाडी-मुष्ट्योश्च २९४५ ।

३१. उदि कूले रुजिवहोः २९४६ ।

३२. वहाभ्रे लिहः २९४७ ।

३३. परिमाणे पचः २९४८ ।

३४. मितनखे च २९४९ ।

३५. विध्वरुषोस्तुदः २९५० ।

३६. असूर्य-ललाटयोर्दृशि-
तपो: २९५१।

३७. उग्रंपश्येरंमद-
पाणिन्धमाश्च २९५२।

खच् प्रत्यय:

३८. प्रियवशे वद: खच् २९५३।

३९. द्विषत्परयोस्तापे: २९५४।

४०. वाचि यमो व्रते २९५६।

४१. पू:सर्वयोर्दारिसहो: २९५८।

४२. सर्वकूलाभ्र-करीषेषु कष: २९५९।

४३. मेघर्तिभयेषु कृञ: २९६०।

४४. क्षेमप्रियमद्रेऽण्च २९६१।

४५. आशिते भुव: -
करणभावयो: २९६२।

४६. संज्ञायां भृ-तॄ-वृ-जि-
धारि-सहि-तपि-दम: २९६३।

४७. गमश्च २९६४।

ड-प्रत्यय:

४८. अन्तात्यन्ताध्व-दूर-पार-सर्वान्तेषु
ड: २९६५।

४९. आशिषि हन: २९६६।

५०. अपे क्लेशतमसो: २९६७।

णिनि-प्रत्यय:

५१. कुमारशीर्षयोर्णिनि: २९६८।

टक् प्रत्यय:

५२. लक्षणे जायापत्योष्टक् २९६९।

५३. अमनुष्यकर्तृके च २९७०।

५४. शक्तौ हस्तिकपाटयो: २९७१।

५५. पाणिघताडघौ शिल्पिनि २९७२।

ख्युन् प्रत्यय:

५६. आढ्य-सुभग-स्थूल-पलित-
नग्नान्ध-प्रियेषु च्व्यर्थेष्वच्वौ
कृञ: करणे ख्युन् २९७३।

खिष्णुच्-खुकञ्-प्रत्ययौ

५७. कर्तरि भुव: -
खिष्णुच्खुकञौ २९७४।

क्विन् प्रत्यय:

५८. स्पृशोऽनुदके क्विन् ४३२।

५९. ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चु -
युजिक्रुञ्चां च ३७३।

कञ् प्रत्यय:

६०. त्यदादिषु दृशोऽनालोचने
कञ्च ४२९।

क्विप् प्रत्यय:

६१. सत्सू-द्विष-द्रुह-दुह-युज-विद-
भिदच्छिद-जि-नी-राजा-
मुपसर्गेऽपि क्विप् २९७५।

ण्वि-प्रत्यय:

६२. भजो ण्वि: २९७६।

६३. छन्दसि सह: ३४०९।

६४. वहश्च ३४१०।

ञ्युट् प्रत्यय:

६५. कव्य-पुरीष-पुरीष्येषु -
ञ्युट् ३४११।

६६. हव्येऽनन्त:पादम् ३४१२।

विट् प्रत्यय:

६७. जन-सन-खन-क्रम-गमो
विट् ३४१३।

६८. **अदोऽनन्ने २९७७।**

६९. **क्रव्ये च २९७८।**

कप्-प्रत्ययः

७०. **दुहः कब्घश्च २९७९।**

ण्विन् प्रत्ययः

७१. **मन्त्रे श्वेतवहोक्थशस्पुरोडाशो - ण्विन् ३४१४।**

७२. **अवे यजः ३४१५।**

विच् प्रत्ययः

७३. **विजुपे छन्दसि ३४१७**

मनिन्-क्वनिप्-वनिप्-विच् प्रत्ययाः

७४. **आतो मनिन्क्वनिब्वनि- पश्च ३४१८।**

७५. **अन्येभ्योऽपि दृश्यन्ते २९८०।**

क्विप् प्रत्ययः

७६. **क्विप्च २९८३।**

क-प्रत्ययः

७७. **स्थः क च २९८७।**

णिनि-प्रत्ययः

७८. **सुप्यजातौ - णिनिस्ताच्छील्ये २९८८।**

७९. **कर्तर्युपमाने २९८९।**

८०. **व्रते २९९०।**

८१. **बहुलमाभीक्ष्ण्ये २९९१।**

८२. **मनः २९९२।**

खश्-प्रत्ययः

८३. **आत्ममाने खश्च २९९३।**

भूताधिकारः

८४. **भूते २९९५।**

भूत इत्यधिकार इत आरभ्य 'वर्तमाने लट् ३.२.१२२' इत्यतः प्राक् वर्तते। यदित ऊर्ध्वमनुक्रमिष्यते भूत एव तदिति वेदितव्यम्। धात्वधिकाराच्च धात्वर्थे भूत इति विज्ञायते।

णिनि-प्रत्ययः

८५. **करणे यजः २९९६।**

८६. **कर्मणि हनः २९९७।**

क्विप्-प्रत्ययः

८७. **ब्रह्म-भ्रूण-वृत्रेषु क्विप् २९९८।**

८८. **बहुलं छन्दसि ३४१९।**

८९. **सुकर्म-पाप-मन्त्र- पुण्येषु कृञः २९९९।**

९०. **सोमे सुञः ३०००।**

९१. **अग्नौ चेः ३००१।**

९२. **कर्मण्यग्न्याख्यायाम् ३००२।**

इनि प्रत्ययः

९३. **कर्मणीनि वि-क्रियः ३००३।**

क्वनिप् प्रत्ययः

९४. **दृशेः क्वनिप् ३००४।**

९५. **राजनि युधि कृञः ३००५।**

९६. **सहे च ३००६।**

ड-प्रत्ययः

९७. **सप्तम्यां जनेर्डः ३००७।**

९८. **पञ्चम्यामजातौ ३००८।**

९९. **उपसर्गे च संज्ञायाम् ३००९।**

१००. **अनौ कर्मणि ३०१०।**

१०१. **अन्येष्वपि दृश्यते ३०११।**

क्त-क्तवतु-प्रत्ययौ

१०२. **निष्ठा ३०१३।**

ङ्वनिप् प्रत्ययः

१०३. **सुयजोर्ङ्वनिप् ३०९१।**

अतृन् प्रत्ययः

१०४. **जीर्यतेरतृन् ३०९२।**

लिट् प्रत्ययः (लकारप्रत्ययः)

१०५. **छन्दसि लिट् ३०९३।**

कानच् प्रत्ययः

१०६. **लिटः कानज्वा ३०९४।**

क्वसु-प्रत्ययः

१०७. **क्वसुश्च ३०९५।**

१०८. **भाषायां सद-वस-श्रुवः ३०९७।**

१०९. **उपेयिवा-ननाश्वा-ननूचानश्च ३०९८।**

लुङ् प्रत्ययः (लकारप्रत्ययः)

११०. **लुङ् २२१८।**

लङ् प्रत्ययः (लकारप्रत्ययः)

१११. **अनद्यतने लङ् २२०५।**

लृट् प्रत्ययः (लकारप्रत्ययः)

११२. **अभिज्ञावचने लृट् २७७३।**

११३. **न यदि २७७४।**

११४. **विभाषा साकाङ्क्षे २७७५।**

लिट् प्रत्ययः (लकारप्रत्ययः)

११५. **परोक्षे लिट् २१७१।**

लङ् प्रत्ययः (लकारप्रत्ययः)

११६. **हशश्वतोर्लङ् च २७७६।**

११७. **प्रश्ने चासन्नकाले २७७७।**

लट् प्रत्ययः (लकारप्रत्ययः)

११८. **लट् स्मे २७७८।**

११९. **अपरोक्षे च २७७९।**

१२०. **ननौ पृष्टप्रतिवचने २७८०।**

१२१. **नन्वोर्विभाषा २७८१।**

लुङ् प्रत्ययः (लकारप्रत्ययः)

१२२. **पुरि लुङ् चास्मे २७८२।**

वर्तमानाधिकारः

लट् प्रत्ययः (लकारप्रत्ययः)

१२३. **वर्तमाने लट् २१५१।**

आरब्धोऽपरिसमाप्तश्च वर्तमानः। तस्मिन् वर्तमानेऽर्थे वर्तमानाद् धातोर्लट् प्रत्ययो भवति। अस्य सूत्रस्यैकदेशो 'वर्तमाने' इत्यधिक्रियते। इत आरभ्य 'उणादयो बहुलम् ३.३.१' इत्यन्तं प्रत्यया वर्तमानेऽर्थे भवन्तीति वेदितव्यम्।

शतृ-शानच्-प्रत्ययौ

१२४. **लटः शतृ-शानचा-वप्रथमा-समानाधिकरणे ३१००।**

१२५. **सम्बोधने च ३१०२।**

१२६. **लक्षणहेत्वोः क्रियायाः ३१०३।**

सत्-संज्ञा

१२७. **तौ सत् ३१०६।**

शानन् प्रत्ययः

१२८. **पूङ्यजोः शानन् ३१०८।**

चानश् प्रत्ययः

१२९. **ताच्छील्य-वयोवचन-शक्तिषु - चानश् ३१०९।**

शतृ-प्रत्ययः

१३०. **इङ्धार्योः शत्र-कृच्छ्रिणि ३११०।**

१३१. **द्विषोऽमित्रे ३१११।**

१३२. **सुञो यज्ञसंयोगे ३११२।**

१३३. **अर्हः प्रशंसायाम् ३११३।**

ताच्छील्याद्यर्थाधिकारः

१३४. आ क्वेस्तच्छील-तद्धर्म-
तत्साधु-कारिषु ३११४ ।

"भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप् ३.२.१७७' इति क्विपं वक्ष्यति । आ एतस्मात् क्विप्संशब्दाद्य इत ऊर्ध्वमनुक्रमिष्यन्ते तच्छीलादिषु कर्तृषु ते वेदितव्याः । अभिविधौ चायमाङ् । तेन क्विपोऽप्ययमर्थनिर्देशः । तदिति धात्वर्थः ।

तृन् प्रत्ययः

१३५. तृन् ३११५ ।

इष्णुच् प्रत्ययः

१३६. अलंकृञ्-निराकृञ्-प्रजनोत्पचो-
त्पतोन्मद-रुच्यपत्रप-वृतु-
वृधु-सह-चर इष्णुच् ३११६ ।

१३७. णेश्छन्दसि ३११७ ।

१३८. भुवश्च ३११८ ।

ग्स्नु प्रत्ययः

१३९. ग्लाजिस्थश्च ग्स्नुः ३११९ ।

क्नु प्रत्ययः

१४०. त्रसि-गृधि-धृषि-क्षिपेः -
क्नुः ३१२० ।

घिनुण् प्रत्ययः

१४१. शमित्यष्टाभ्यो घिनुण् ३१२१ ।

१४२. संपृचानुरुधाङ्यमाङ्यस-परिसृ-
संसृज-परिदेवि-संज्वर-परिक्षिप-
परिरट-परिवद-परिदह-परिमुह-
दुष-द्विष-द्रुह-दुह-युजाक्रीड-
विविच-त्यज-रज-भजाति-
चरापचरा-मुषाभ्याहनश्च ३१२२ ।

१४३. वौ कष-लस-कत्थ-स्रम्भः ३१२३ ।

१४४. अपे च लषः ३१२४ ।

१४५. प्रे लप-सृ-द्रु-मथ-वद-
वसः ३१२५ ।

वुञ् प्रत्ययः

१४६. निन्द-हिंस-क्लिश-खाद-
विनाश-परिक्षिप-परिरट-
परिवादि-व्याभाषासूञो
वुञ् ३१२६ ।

१४७. देविक्रुशोश्चोपसर्गे ३१२७ ।

युच् प्रत्ययः

१४८. चलन-शब्दार्थाद-
कर्मकाद्युच् ३१२८ ।

१४९. अनुदात्तेतश्च हलादेः ३१२९ ।

१५०. जु-चङ्क्रम्य-दन्द्रम्य-सृ-
गृधि-ज्वल-शुच-लष-
पत-पदः ३१३० ।

१५१. क्रुध-मण्डार्थेभ्यश्च ३१३१ ।

१५२. न यः ३१३२ ।

१५३. सूद-दीप-दीक्षश्च ।

उकञ् प्रत्ययः

१५४. लष-पत-पद-स्था-भू-वृष-
हन-कम-गम-शृभ्य
उकञ् ३१३४ ।

षाकन् प्रत्ययः

१५५. जल्प-भिक्ष-कुट्ट-लुण्ट-
वृङः षाकन् ३१३५ ।

इनि प्रत्ययः

१५६. प्रजोरिनिः ३१३६ ।

१५७. जि-दृ-क्षि-विश्रीण्वमा-
व्यथाभ्यम-परिभू-प्रसूभ्यश्च
३१३७ ।

आलुच् प्रत्ययः

१५८. स्पृहि-गृहि-पति-दयि-निद्रा-तन्द्रा-श्रद्धाभ्य आलुच् ३१३८।

रु प्रत्ययः

१५९. दा-धेट्-सि-शद-सदो रुः ३१३९।

क्मरच् प्रत्ययः

१६०. सृ-घस्यदः क्मरच् ३१४०।

घुरच् प्रत्ययः

१६१. भञ्ज-भास-मिदो घुरच् ३१४१।

कुरच् प्रत्ययः

१६२. विदि-भिदिच्छिदेः कुरच् ३१४२।

क्वरप् प्रत्ययः

१६३. इण्-नश्जि-सर्तिभ्यः -क्वरप् ३१४३।

१६४. गत्वरश्च ३१४४।

ऊक-प्रत्ययः

१६५. जागरूकः ३१४५।

१६६. यजजपदशां यङः ३१४६।

र-प्रत्ययः

१६७. नमि-कम्पि-स्म्यजस-कम-हिंस-दीपो रः ३१४७।

उ-प्रत्ययः

१६८. सनाशंसभिक्ष उः ३१४८।

१६९. विन्दुरिच्छुः ३१४९।

१७०. क्याच्छन्दसि ३१५०।

कि-किन्-प्रत्ययौ

१७१. आदृ-गम-हन-जनः किकिनौ -लिट् च ३१५१।

नजिङ् प्रत्ययः

१७२. स्वपितृषोर्नजिङ् ३१५२।

आरु-प्रत्ययः

१७३. शॄवन्द्योरारुः ३१५३।

क्रुक्-लुकन्-प्रत्ययौ

१७४. भियः क्रुक्लुकनौ ३१५४।

वरच् प्रत्ययः

१७५. स्थेश-भास-पिस-कसो वरच् ३१५५।

१७६. यश्च यङः ३१५६।

क्विप् प्रत्ययः

१७७. भ्राज-भास-धुर्वि-द्युतोर्जि-पॄ-जु- ग्रावस्तुवः क्विप् ३१५७।

१७८. अन्येभ्योऽपि दृश्यते ३१५८।

आ क्वेस्तच्छील-तद्धर्म-तत्साधुकारिषु इत्यधिकार इतो निवृत्तः।

१७९. भुवः संज्ञान्तरयोः ३१५९।

डु-प्रत्ययः

१८०. विप्रसंभ्यो ड्वसंज्ञायाम् ३१६०।

ष्ट्रन् प्रत्ययः

१८१. धः कर्मणि ष्ट्रन् ३१६१।

१८२. दाम्नीशस-यु-युज-स्तु-तुद-सि-सिच-मिह-पत-दश-नहः करणे ३१६२।

१८३. हल-सूकरयोः पुवः ३१६४।

इत्र-प्रत्ययः

१८४. अर्ति-लू-धू-सू-खन-सह-चर इत्रः ३१६५।

१८५. पुवः संज्ञायाम् ३१६६।

१८६. कर्तरि चर्षि-देवतयोः ३१६७।

क्त-प्रत्ययः

१८७. ञीतः क्तः ३०८८।

१८८. **मतिबुद्धि-पूजार्थेभ्यश्च ३०८९।**

## तृतीयाध्याये तृतीयः पादः

उणादि-प्रत्ययाः

उणादयः प्रत्ययाः वर्तमानेऽर्थे संज्ञायां विषये बहुलं भवन्ति। इमे प्रत्यया यतो विहितास्ततोऽन्यत्रापि भवन्तीति वेदितव्यम्। केचिदविहिता अपि प्रयोगत उन्नीयन्ते। 'वर्तमाने लट् ३.२.१२३' इत्यतः प्रवर्तमानो वर्तमानाधिकार इतो निवृत्तः।

१. **उणादयो बहुलम् ३१६९।**

२. **भूतेऽपि दृश्यन्ते ३१७०।**

भविष्यदधिकारः

३. **भविष्यति गम्यादयः ३१७१।**

'भविष्यति' इत्यधिक्रियते। इत आरभ्य 'अनद्यतने लुट् ३.३.१५' इत्यतः प्राक् भविष्यदर्थे प्रत्ययाः विहिताः।

लट् प्रत्ययः (लकारप्रत्ययः)

४. **यावत्पुरानिपातयोर्लट् २७८३।**

५. **विभाषा कदा-कर्ह्योः २७८४।**

६. **किं वृत्ते लिप्सायाम् २७८५।**

७. **लिप्स्यमानसिद्धौ च २७८६।**

८. **लोडर्थलक्षणे च २७८७।**

लिङ् प्रत्ययः (लकारप्रत्ययः)

९. **लिङ् चोर्ध्व-मौहूर्तिके २७८८।**

तुमुन्ण्वुल्प्रत्ययौ

१०. **तुमुन्ण्वुलौ क्रियायां - क्रियार्थायाम् ३१७५।**

इतः क्रियायां क्रियार्थायाम् इति अनुवर्तते ३.३.१२ इति यावत्।

११. **भाववचनाश्च ३१८०।**

१२. **अण्कर्मणि च ३१८१।**

लृट् प्रत्ययः (लकारप्रत्ययः)

१३. **लृट् शेषे च २१९३।**

लृटः स्थाने शतृशानचौ

१४. **लृटः सद्वा ३१०७।**

लुट् प्रत्ययः (लकारप्रत्ययः)

१५. **अनद्यतने लुट् २१८५।**

'भविष्यति' इति निवृत्तम्। इत उत्तरं त्रिषु कालेषु प्रत्ययाः।

घञ् प्रत्ययः ३.३.५५ इति यावत्

१६. **पद-रुज-विश-स्पृशो घञ् ३१८२।**

१७. **सृ स्थिरे ३१८४।**

भावाधिकारः

१८. **भावे ३१८४।**

'आक्रोशे नञ्यनिः ३.३.११२' इति यावदधिकारोऽयम्। इत उत्तरं भावे वाच्ये धातोः प्रत्ययाः भवन्तीति वेदितव्यम्।

'अकर्तरि च कारके संज्ञायाम्' इत्यधिकारः

१९. **अकर्तरि च कारके संज्ञायाम् ३१८६।**

अधिकारोऽयम् 'आक्रोशे नञ्यनिः ३.३.११२' इति यावत्। इत उत्तरं कर्तृवर्जिते कारके संज्ञायां विषये धातोः प्रत्ययाः भवन्ति।

२०. **परिमाणाख्यायाम् सर्वेभ्यः।**(घञ्) **३१९०।**

२१. इङश्च । (अचोऽपवादो घञ्) ३१९१ ।
२२. उपसर्गे रुवः । (अपोऽपवादो घञ्) ३१९२ ।
२३. समि युद्रुदुवः । (अपोऽपवादो घञ्) ३१९४ ।
२४. श्रिणीभुवोऽनुपसर्गे ३१९५ । (अजपोरपवादो घञ्)
२५. वौ क्षुश्रुवः । (अपोऽपवादो घञ्) ३१९६ ।
२६. अवोदोर्नियः । (अचोऽपवादो घञ्) ३१९७ ।

इतः अपोऽपवादो घञ् प्रत्ययः

२७. प्रे द्रुस्तुस्रुवः. ३१९८ ।
२८. निरभ्योः पूल्वोः ३१९९ ।
२९. उन्न्योर्ग्रः ३२०० ।
३०. कॄ धान्ये ३२०१ ।
३१. यज्ञे समि स्तुवः ३२०२ ।
३२. प्रे स्त्रोऽयज्ञे ३२०३ ।
३३. प्रथने वावशब्दे ३२०४ ।
३४. छन्दोनाम्नि च ३२०५ ।
३५. उदि ग्रहः ३२०७ ।
३६. समि मुष्टौ ३२०८ ।

अचोऽपवादो घञ् प्रत्ययः

३७. परिन्योर्नीणोर्द्यूताभ्रेषयोः ३२०९ ।
३८. परा-वनुपात्यय इणः३२१० ।
३९. व्युपयोः शेतेः पर्याये ३२११ ।
४०. हस्तादाने चेरस्तेये ३२१२ ।
४१. निवास-चिति-शरीरोपसमा-धानेष्वादेश्च कः ३२१३ ।
४२. संघे चानौत्तराधर्ये ३२१४ ।

णच् प्रत्ययः

४३. कर्मव्यतिहारे णच् - स्त्रियाम् ३२१५ ।

इनुण् प्रत्ययः

४४. अभिविधौ भाव इनुण् ३२१८ ।

घञ् प्रत्ययः

४५. आक्रोशेऽवन्योर्ग्रहः ३२२० ।
४६. प्रे लिप्सायाम् ३२२१ ।
४७. परौ यज्ञे ३२२२ ।
४८. नौ वृ धान्ये ३२२३ ।
४९. उदि श्रयति-यौति-पू-द्रुवः ३२२४ । (अजपोरपवादः)
५०. विभाषाऽऽङि रुप्लुवोः ३२२५ । (अपोऽपवादः)
५१. अवे ग्रहो वर्षप्रतिबन्धे ३२२६ ।
५२. प्रे वणिजाम् ३२२७ ।
५३. रश्मौ च ३२२८ ।
५४. वृणोते-राच्छादने ३२२९ ।
५५. परौ भुवोऽवज्ञाने ३२३० ।

अच् प्रत्ययः

५६. एरच् ३२३१ ।

अप् प्रत्ययः ३.३.८७ इति यावत्

५७. ॠदोरप् ३२३२ ।

घञोऽपवादोऽप् प्रत्ययः

५८. ग्रह-वृ-दृ-निश्चि-गमश्च ३२३४ ।
५९. उपसर्गेऽदः३२३५ ।
६०. नौ ण च ३२३७ ।
६१. व्यध-जपो-रनुपसर्गे ३२३८ ।

६२. स्वन-हसोर्वा ३२३९।
६३. यमः समुप-निविषु च ३२४०।
६४. नौ गद-नद-पठ-स्वनः ३२४१।
६५. क्वणो वीणायां च ३२४२।
६६. नित्यं पणः परिमाणे ३२४३।
६७. मदोऽनुपसर्गे ३२४४।
६८. प्रमद-संमदौ हर्षे ३२४५।
६९. समुदोरजः पशुषु ३२४६।
७०. अक्षेषु ग्लहः ३२४७।
७१. प्रजने सर्तेः ३२४८।
७२. ह्वः सम्प्रसारणं च - न्यभ्युपविषु ३२४९।
७३. आङि युद्धे ३२५०।
७४. निपानमाहावः ३२५१।
७५. भावेऽनुपसर्गस्य ३२५२।
७६. हनश्च वधः ३२५३।
७७. मूर्तौ घनः ३२५४।
७८. अन्तर्घनो देशे ३२५५।
७९. अगारैकदेशे प्रघणः - प्रघाणश्च ३२५६।
८०. उद्घनोऽत्याधानम् ३२५७।
८१. अपघनोऽङ्गम् ३२५८।
८२. करणेऽयोविद्रुषु ३२५९।
८३. स्तम्बे क च ३२६०।
८४. परौ घः ३२६१।
८५. उपघ्न आश्रये ३२६३।
८६. संघोद्घौ गणप्रशंसयोः ३२६४।
८७. निघो निमित्तम् ३२६५।

क्त्रि-प्रत्ययः

८८. ड्वितः क्त्रिः ३२६६।

अथुच् प्रत्ययः

८९. ट्वितोऽथुच् ३२६७।

नङ् प्रत्ययः

९०. यज-याच-यत-विच्छ-प्रच्छ-रक्षो नङ् ३२६८।

नन् प्रत्ययः

९१. स्वपो नन् ३२६९।

कि प्रत्ययः

९२. उपसर्गे घोः किः ३२७०।
९३. कर्मण्यधिकरणे च ३२७१।

स्त्र्यधिकारः

क्तिन् प्रत्ययः

९४. स्त्रियां क्तिन् ३२७२।

अधिकारोऽयम् ३.३.११२ इति यावत्। अकर्तरि च कारके, भावे, स्त्रीलिङ्गे धातोः क्तिन् प्रत्ययो भवति घञजपामपवादः। अस्त्रियामिति पर्युदासाद् वाऽसरूपविधिर्नात्र प्रवर्तते। अतोऽस्मिन्नसरूपोऽपवादप्रत्यय उत्सर्गप्रत्ययं नित्यं बाधते।

९५. स्था-गा-पा-पचो भावे ३२७३।
९६. मन्त्रे वृषेष-पच-मन-विद-भू - वी-रा उदात्तः ३४२०।
९७. ऊति-यूति-जूति-साति-हेति-कीर्तयश्च ३२७४।

क्यप् प्रत्ययः

९८. व्रज-यजोर्भावे क्यप् ३२७५।
९९. संज्ञायां समज-निषद-निपत-मन-विद-षुञ्शीङ्-भृञिणः ३२७६।

श प्रत्ययः

१००. कृञः श च ३२७७।
१०१. इच्छा ३२७८।

अ प्रत्ययः

१०२. **अ प्रत्ययात् ३२७९।**

१०३. **गुरोश्च हलः ३२८०।**

अङ् प्रत्ययः

१०४. **षिद्भिदादिभ्योऽङ् ३२८१।**

१०५. **चिन्ति-पूजि-कथि-कुम्बि-चर्चश्च ३२८२।**

१०६. **आतश्चोपसर्गे ३२८३।**

युच् प्रत्ययः

१०७. **ण्यासश्रन्थो युच् ३२८४।**

ण्वुल् प्रत्ययः

१०८. **रोगाख्यायां ण्वुल्बहुलम् ३२८५।**

१०९. **संज्ञायाम् ३२८६।**

इञ् प्रत्ययः

११०. **विभाषाख्यान-परिप्रश्नयोरिञ्च ३२८७।**

ण्वुच् प्रत्ययः

१११. **पर्यायार्हर्णोत्पत्तिषु ण्वुच् ३२८८।**

अनि-प्रत्ययः

११२. **आक्रोशे नञ्यनिः ३२८९।**

इतः स्त्र्यधिकारो निवृत्तः।

भावधिकारश्च।

कृत्यल्युट्प्रत्ययानामर्थनिर्देशः।

११३. **कृत्यल्युटो बहुलम् २८४१।**

क्त-प्रत्ययः

११४. **नपुंसके भावे क्तः ३०९०।**

ल्युट् प्रत्ययः

११५. **ल्युट् च ३२९०।**

११६. **कर्मणि च येन संस्पर्शात् कर्तुः - शरीरसुखम् ३२९१।**

करणाधिकरणयोः प्रत्ययाः

११७. **करणाधिकरणयोश्च ३२९३।**

अधिकारोऽयम् ३.३.१२५ इति यावत्। अधिकारेऽस्मिन् करणाधिकरणयोरर्थयोर्धातोः प्रत्यया विहिताः।

घ-प्रत्ययः

११८. **पुंसि संज्ञायां घः प्रायेण ३२९६।**

११९. **गोचर-संचर-वह-व्रज-व्यजापण-निगमाश्च ३२९८।**

घञ् प्रत्ययः

१२०. **अवे तॄस्त्रोर्घञ् ३२९९।**

१२१. **हलश्च ३३००।**

१२२. **अध्यायन्यायोद्या-वसंहाराश्च ३३०१।**

१२३. **उदङ्कोऽनुदके ३३०२।**

१२४. **जालमानायः ३३०३।**

१२५. **खनो घ च ३३०४।**

कृच्छ्राकृच्छ्रार्थेषु प्रत्ययाः

खल् प्रत्ययः

१२६ **ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु - खल् ३३०५।**

१२७. **कर्तृकर्मणोश्च भूकृञोः ३३०८।**

युच् प्रत्ययः

१२८. **आतो युच् ३३०९।**

१२९. **छन्दसि गत्यर्थेभ्यः ३४२१।**

१३०. **अन्येभ्योऽपि दृश्यते ३४२२।**

वर्तमानवत्प्रत्ययाः

१३१. **वर्तमानसामीप्ये वर्तमानवद्वा २७८९।**

भूतवत्प्रत्ययाः

१३२. **आशंसायाम् भूतवच्च २७९०।**

इतो लकारप्रत्यया:

लृट् प्रत्यय:

१३३. क्षिप्रवचने लृट् २७९१।

लिङ् प्रत्यय:

१३४. आशंसावचने लिङ् २७९२।

१३५. नानद्यतनवत्क्रिया-प्रबन्ध - सामीप्ययो: २७९३।

१३६. भविष्यति - मर्यादावचनेऽवरस्मिन् २७९४।

१३७. कालविभागे - चानहोरात्राणाम् २७९५।

१३८. परस्मिन्विभाषा २७९६।

लृङ् प्रत्यय:

१३९. लिङ्निमित्ते लृङ् - क्रियातिपत्तौ २२२९।

१४०. भूते च २७९७।

१४१. वोताप्यो: २७९८।

लट् प्रत्यय:

१४२. गर्हायां लडपिजात्वो: २७९९।

लिङ् प्रत्यय:

१४३. विभाषा कथमि लिङ् च २८००।

लिङ्लृटौ प्रत्ययौ

१४४. किंवृत्ते लिङ्लृटौ २८०१।

१४५. अनवक्लृप्त्यमर्षयो- -रकिंवृत्तेऽपि २८०२।

१४६. किंकिलास्त्यर्थेषु लृट् २८०३।

१४७. जातुयदोर्लिङ् २८०४।

१४८. यच्च-यत्रयो: २८०५।

१४९. गर्हायाञ्च २८०६।

१५०. चित्रीकरणे च २८०७।

१५१. शेषे लृडयदौ २८०८।

लिङ् प्रत्यय:

१५२. उताप्यो: समर्थयोर्लिङ् २८०९।

१५३. कामप्रवेदनेऽकच्चिति २८१०।

१५४. सम्भावनेऽलमिति चेत् - सिद्धाप्रयोगे २८११।

१५५. विभाषा धातौ सम्भावन - वचनेऽयदि २८१२।

१५६. हेतुहेतुमतोर्लिङ् २८१३।

लिङ्लोटौ प्रत्ययौ

१५७. इच्छार्थेषु लिङ्लोटौ २८१४।

तुमुन् प्रत्यय: (अयं कृत्प्रत्यय:)

१५८. समानकर्तृकेषु तुमुन् ३१७६।

लिङ्प्रत्यय:

१५९. लिङ् च २८१५।

१६०. इच्छार्थेभ्यो विभाषा - वर्तमाने २८१६।

१६१. विधि-निमन्त्रणा-मन्त्रणा-धीष्ट- सम्प्रश्न-प्रार्थनेषु लिङ् २२०८।

लोट्प्रत्यय:

१६२. लोट् च २१९४।

१६३. प्रैषातिसर्ग-प्राप्तकालेषु - कृत्याश्च २८१७।

१६४. लिङ् चोर्ध्वमौहूर्त्तिके २८१८।

१६५. स्मे लोट् २८१९।

१६६. अधीष्टे च २८२०।

तुमुन् प्रत्यय: (अयं कृत् प्रत्यय:)

१६७. कालसमयवेलासु तुमुन् ३१७९।

लिङ्प्रत्यय:

१६८. लिङ् यदि २८२१।

कृत्य-तृच्-णिनि-लिङ्-लोट्-
प्रत्ययानामर्थाः

१६९. **अर्हे कृत्यतृचश्च २८२२ ।**
१७०. **आवश्यकाधमर्ण्ययोर्णिनिः ३३११ ।**
१७१. **कृत्याश्च ३३१२ ।**
१७२. **शकि लिङ् च २८२३ ।**
१७३. **आशिषि लिङ्लोटौ २१९५ ।**

क्तिच्-क्त-प्रत्ययौ (इमौ कृत्प्रत्ययौ)

१७४. **क्तिच्क्तौ च संज्ञायाम् ३३१३ ।**

लुङ्-लङ्-प्रत्ययौ

१७५. **माङि लुङ् २२१९ ।**
१७६. **स्मोत्तरे लङ् च २२२० ।**

## तृतीयाध्याये चतुर्थः पादः

प्रत्ययार्थाः

१. **धातुसंबन्धे प्रत्ययाः २८२४ ।**
२. **क्रियासमभिहारे लोट् लोटो - हिस्वौ वा च तध्वमोः २८२५ ।**
३. **समुच्चयेऽन्यतरस्याम् २८२६ ।**
४. **यथाविध्यनुप्रयोगः - पूर्वस्मिन् २८२७ ।**
५. **समुच्चये सामान्यवचनस्य २८२८ ।**
६. **छन्दसि लुङ्-लङ्-लिटः ३४२३ ।**

लेट् प्रत्ययः

७. **लिङर्थे लेट् ३४२४ ।**
८. **उपसंवादा-शङ्कयोश्च ३४३१ ।**

इत आरभ्य ३.४.१७ इति यावत् वैदिकाः कृत्प्रत्ययाः

९. **तुमर्थे से-सेनसे-ऽसेन्क्से-कसे-नध्यै-अध्यैन्-कध्यै-कध्यैन्-शध्यै-शध्यैन्-तवै-तवेङ्-तवेनः ३४३६ ।**
१०. **प्रयै रोहिष्यै अव्यथिष्यै ३४३७ ।**
११. **दृशे विख्ये च ३४३८ ।**

णमुल्-कमुल् प्रत्ययौ

१२. **शकि णमुल्कमुलौ ३४३९ ।**

तोसुन्-कसुन् प्रत्ययौ

१३. **ईश्वरे तोसुन्कसुनौ ३४४० ।**

केन्-केन्य-त्वन्-प्रत्ययाः

१४. **कृत्यार्थे तवै केन्केन्यत्वनः ३४४१ ।**

एश् प्रत्ययः

१५. **अवचक्षे च २४४२ ।**

तोसुन् प्रत्ययः

१६. **भावलक्षणे स्थेण्कृञ्वदि-चरि-हु-तमि-जनिभ्यस्तोसुन् ३४४३ ।**

कसुन् प्रत्ययः

१७. **सृपितृदोः कसुन् ३४४४ ।**

इतो लौकिकाः कृत्प्रत्ययाः

क्त्वा प्रत्ययः

१८. **अलंखल्वोः प्रतिषेधयोः - प्राचां क्त्वा ३३१६ ।**
१९. **उदीचां माङो व्यतीहारे ३३१७ ।**
२०. **परावरयोगे च ३३१९ ।**
२१. **समान-कर्तृकयोः** पूर्वकाले ३३२० ।

णमुल् प्रत्यय

२२. **आभीक्ष्ण्ये णमुल् च ३३४३ ।**

क्त्वा-णमुल्-प्रत्ययौ

२३. **न यद्यनाकाङ्क्षे ३३४४ ।**
२४. **विभाषाऽग्रे-प्रथम-पूर्वेषु ३३४५ ।**

खमुञ् प्रत्ययः

२५. कर्मण्याक्रोशे कृञः खमुञ् ३३४६।

णमुल् प्रत्ययः

२६. स्वादुमि णमुल् ३३४७।
२७. अन्यथैवं कथमित्थंसु - सिद्धाप्रयोगश्चेत् ३३४८।
२८. यथातथयोरसूया- प्रतिवचने ३३४९।
२९. कर्मणि दृशिविदोः साकल्ये ३३५०।
३०. यावति विन्दजीवोः ३३५१।
३१. चर्मोदरयोः पूरे ३३५२।
३२. वर्षप्रमाण ऊलोपश्चास्या - न्यतरस्याम् ३३५३।
३३. चेलेः क्नोपेः ३३५४।
३४. निमूल-समूलयोः कषः ३३५५।
३५. शुष्क-चूर्ण-रूक्षेषु पिषः ३३५६।
३६. समूलाकृतजीवेषु हन्कृञ्ग्रहः ३३५७।
३७. करणे हनः ३३५८।
३८. स्नेहने पिषः ३३५९।
३९. हस्ते वर्त्तिग्रहोः ३३६०।
४०. स्वे पुषः ३३६१।
४१. अधिकरणे बन्धः ३३६२।
४२. संज्ञायाम् ३३६३।
४३. कर्त्रोर्जीवपुरुषयोर्नशि- वहोः ३३६४।
४४. ऊर्ध्वे शुषिपूरोः ३३६५।
४५. उपमाने कर्मणि च ३३६६।
४६. कषादिषु - यथाविध्यनुप्रयोगः ३३६७।
४७. उपदंशस्तृतीयायाम् ३३६८।
४८. हिंसार्थानां च - समानकर्मकाणाम् ३३६९।
४९. सप्तम्यां चोपपीडरुधकर्षः ३३७०।
५०. समासत्तौ ३३७१।
५१. प्रमाणे च ३३७२।
५२. अपादाने च परीप्सायाम् ३३७३।
५३. द्वितीयायां च ३३७४।
५४. स्वाङ्गेऽध्रुवे ३३७६।
५५. परिक्लिश्यमाने च ३३७७।
५६. विशि-पति-पदि-स्कन्दां - व्याप्यमानासेव्यमानयोः ३३७८।
५७. अस्यति-तृषोः क्रियान्तरे - कालेषु ३३७९।
५८. नाम्न्यादिशिग्रहोः ३३८०।

क्त्वा-णमुल्-प्रत्ययौ

५९. अव्ययेऽयथाभिप्रेताख्याने - कृञः क्त्वाणमुलौ ३३८१।
६०. तिर्यच्यपवर्गे ३३८२।
६१. स्वाङ्गे तस्प्रत्यये कृभ्वोः ३३८३।
६२. नाधार्थप्रत्यये च्व्यर्थे ३३८४।
६३. तूष्णीमि भुवः ३३८५।
६४. अन्वच्या-नुलोम्ये ३३८६।

तुमुन् प्रत्ययः

६५. शक-धृष-ज्ञा-ग्ला-घट-रभ- लभ-क्रम-सहार्हास्त्यर्थेषु - तुमुन् ३१७७।
६६. पर्याप्तिवचनेष्वलमर्थेषु ३१७८।

लकाराणां कृत्प्रत्ययानां चार्थाः

६७. कर्तरि कृत् २८३२।

६८. भव्य-गेय-प्रवचनीयोपस्थानीय-जन्याप्लाव्यापात्या वा २८९४।
६९. लः कर्मणि च भावे -चाकर्मकेभ्यः २१५२।
७०. तयोरेव कृत्य-क्त-खलर्थाः २८३३।
७१. आदिकर्मणि क्तः कर्तरि च ३०५३।
७२. गत्यर्था-कर्मकश्लिष-शीङ्-स्थास -वस-जन-रुह-जीर्यतिभ्यश्च ३०८६।
७३. दाश-गोघ्नौ संप्रदाने ३१७२।
७४. भीमादयोऽपादाने ३१७३।
७५. ताभ्या-मन्यत्रोणादयः ३१७४।
७६. क्तोऽधिकरणे च ध्रौव्य-गति-प्रत्यवसानार्थेभ्यः ३०८७।

लाधिकारः

७७. लस्य २१५३।

लस्येत्ययमधिकारः ३.४.११२ इति यावत्। अकार उच्चारणार्थः। दश लकारा अनुबन्धविशिष्टा विहिता, अर्थविशेषे, काल-विशेषे च। त एवोत्सृष्टानुबन्धा अत्र गृहीताः। लकारमात्रं स्थानित्वेनाधिक्रियते। यदित ऊर्ध्वमनुक्रमिष्यते लस्येत्येवं तद्वेदितव्यम्।

७८. तिप्तस्झि-सिप्थस्थ-मिब्वस्मस्-तातांझ-थासाथांध्व-मिड्वहि-महिङ् २१५४।
७९. टित आत्मनेपदानां टेरे २२३३।
८०. थासः से २२३६।
८१. लिटस्तझयोरेशिरेच् २२४१।
८२. परस्मैपदानां णलतुसुस् -थलथुस-णल्वमाः २१७३।
८३. विदो लटो वा २४६४।
८४. ब्रुवः पञ्चाना-मादित -आहो ब्रुवः २४५०।
८५. लोटो लङ्वत् २१९८।
८६. एरुः २१९६।
८७. सेर्ह्यपिच्च २२०१।
८८. वा छन्दसि ३५५२।
८९. मेर्निः २२०३।
९०. आमेतः २२५१।
९१. सवाभ्यां वामौ २२५२।
९२. आडुत्तमस्य पिच्च २२०४।
९३. एत ऐ २२५३।
९४. लेटोऽडाटौ ३४२७।
९५. आत ऐ ३४२९।
९६. वैतोऽन्यत्र ३४३०।
९७. इतश्च लोपः परस्मैदेषु ३४२६।
९८. स उत्तमस्य ३४२८।
९९. नित्यं ङितः २२००।
१००. इतश्च २२०७।
१०१. तस्थस्थमिपां तान्तन्तामः २१९९।
१०२. लिङः सीयुट् २२५५।
१०३. यासुट् परस्मैपदेषूदात्तो -ङिच्च २२०९।
१०४. किदाशिषि २२१६।
१०५. झस्य रन् २२५६।
१०६. इटोऽत् २२५७।

१०७. **सुट् तिथोः २२१० ।**
१०८. **झेर्जुस् २२१३ ।**
१०९. **सिजभ्यस्तविदिभ्यश्च २२२६ ।**
११०. **आतः २२२७ ।**
१११. **लङः शाकटायनस्यैव २४६३ ।**
११२. **द्विषश्च २४३५ ।**

सार्वधातुकसंज्ञा

११३. **तिङशित्सार्वधातुकम् २१६६ ।**

आर्धधातुकसंज्ञा

११४. **आर्धधातुकं शेषः २१८७ ।**
११५. **लिट् च २१७२ ।**
११६. **लिङाशिषि २२१५ ।**
११७. **छन्दस्युभयथा ३४३५ ।**

## चतुर्थाध्याये प्रथमः पादः

प्रातिपदिकाधिकारः

१. **ङ्याप्प्रातिपदिकात् १८२ ।**

अधिकारोऽयमापञ्चमाध्यायपरिसमाप्तेः ५.४.१६० इति यावत् । यदित ऊर्ध्वमनुक्रमिष्यते ङ्याप्प्रातिपदिकादित्येवं तद् वेदितव्यम् । अत्र स्वादिषु कप्पर्यन्तेषु प्रत्ययेषु प्रकृतिरधिक्रियते । अस्मिन्नधिकारे त्रिविधाः सन्ति प्रत्ययाः । स्वादिप्रत्ययाः, स्त्रीप्रत्ययाः, तद्धितप्रत्ययाश्च ।

**स्वादि-प्रत्ययाः**

२. **स्वौजसमौट्-छष्टाभ्यांभिस्-ङेभ्यां-भ्यस्-ङसिभ्यांभ्यस्-ङसोसाम्-ङ्योस्सुप् १८३ ।**

स्त्र्यधिकारः

३. **स्त्रियाम् ४५३ ।**

अधिकारोऽयम् ४.१.८१ इति यावत् । यदित ऊर्ध्वमनुक्रमिष्यते स्त्रियामित्येवं तद् वेदितव्यम् । ङ्याप्प्रातिपदिकादिति सर्वा-धिकारेऽपि प्रातिपदिकमात्रमत्र प्रकरणे संबध्यते, ङ्यापोरनेनैव विधानात् ।

टाप्-प्रत्ययः

४. **अजाद्यतष्टाप् ४५४ ।**

ङीप्-प्रत्ययः

५. **ऋन्नेभ्यो ङीप् ३०६ ।**
६. **उगितश्च ४५५ ।**
७. **वनो र च ४५६ ।**
८. **पादोऽन्यतरस्याम् ४५७ ।**
९. **टाबृचि ४५८ ।**
१०. **न षट्स्वस्रादिभ्यः ३०८ ।**
११. **मनः ४५९ ।**
१२. **अनो बहुव्रीहेः ४६० ।**

डाप्-प्रत्ययः

१३. **डाबुभाभ्यामन्यतरस्याम् ४६१ ।**

अनुपसर्जनाधिकारः

१४. **अनुपसर्जनात् ४६९ ।**

अधिकारोऽयम् । उत्तरसूत्रेषूपसर्जने प्रतिषेधं करोति । यदित ऊर्ध्वमनुक्रमिष्यते-ऽनुपसर्जनादित्येवं तद् वेदितव्यम् ।

ङीप्-प्रत्ययः

१५. **टिड्ढाणञ्-द्वयसज्दघ्नञ्-मात्रच्-तयप्-ठक्ठञ्कञ्-क्वरपः ४७० ।**
१६. **यञश्च ४७१ ।**

ष्फप्रत्ययः

१७. **प्राचां ष्फ तद्धितः ४७३ ।**
१८. **सर्वत्र लोहितादिकतन्तेभ्यः ४७६ ।**
१९. **कौरव्यमाण्डूकाभ्यां च ४७७ ।**

ङीप्-प्रत्ययः

२०. वयसि प्रथमे ४७८ ।

२१. द्विगोः ४७९ ।

२२. अपरिमाण-बिस्ताचित-कम्बल्येभ्यो न तद्धितलुकि ४८० ।

२३. काण्डान्तात्क्षेत्रे ४८१ ।

२४. पुरुषात्प्रमाणेऽन्यतरस्याम् ४८२ ।

२५. बहुव्रीहेरूधसो ङीष् ४८४ ।

२६. संख्याव्ययादेर्ङीप् ४८५ ।

२७. दामहायनान्ताच्च ४८६ ।

२८. अन उपधालोपिनोऽन्यतरस्याम् ४६२ ।

२९. नित्यं संज्ञाछन्दसोः ४८७ ।

३०. केवल-मामक-भागधेय-पापापर-समानार्य-कृत-सुमङ्गल-भेषजाच्च ४८८ ।

३१. रात्रेश्चाजसौ ३४४५ ।

३२. अन्तर्वत्पतिवतोर्नुक् ४८९ ।

३३. पत्युर्नो यज्ञसंयोगे ४९० ।

३४. विभाषा सपूर्वस्य ४९१ ।

३५. नित्यं सपत्न्यादिषु ४९२ ।

३६. पूतक्रतो-रै च ४९३ ।

३७. वृषाकप्यग्नि-कुसित-कुसीदाना-मुदात्तः ४९४ ।

३८. मनोरौ वा ४९५ ।

३९. वर्णादनुदात्तात्तोपधात्तो नः ४९६ ।

ङीष्-प्रत्ययः

४०. अन्यतो ङीष् ४९७ ।

४१. षिद्गौरादिभ्यश्च ४९८ ।

४२. जानपद-कुण्ड-गोणस्थल-भाज-नाग-काल-नील- कुश-कामुक-कबराद्- वृत्यमत्रा-वपना-कृत्रिमा-श्राणा-स्थौल्य-वर्णानाच्छादना-योविकार-मैथुनेच्छा-केश-वेशेषु ५०० ।

४३. शोणात्प्राचाम् ५०१ ।

४४. वोतो गुणवचनात् ५०२ ।

४५. बह्वादिभ्यश्च ५०३ ।

४६. नित्यं छन्दसि ३४४६ ।

४७. भुवश्च ३४४७ ।

४८. पुंयोगादाख्यायाम् ५०४ ।

४९. इन्द्र-वरुण-भव-शर्व-रुद्र-मृड-हिमारण्य-यव-यवन-मातुलाचार्या-णामानुक् ५०५ ।

५०. क्रीतात्करणपूर्वात् ५०६ ।

५१. क्तादल्पाख्यायाम् ५०७ ।

५२. बहुव्रीहेश्चान्तोदात्तात् ५०८ ।

५३. अस्वाङ्गपूर्वपदाद्वा ५०९ ।

५४. स्वाङ्गाच्चोपसर्जनादसंयोगोपधाद् ५१० ।

५५. नासिकोदरौष्ठ-जङ्घा-दन्त-कर्ण-शृङ्गाच्च ५११ ।

५६. न क्रोडादिबह्वचः ५१२ ।

५७. सहनञ्विद्यमानपूर्वाच्च ५१३ ।

५८. नखमुखात्संज्ञायाम् ५१४ ।

५९. दीर्घजिह्वी चच्छन्दसि ३४४८ ।

६०. दिक्पूर्वपदान्ङीप् ५१५ ।

६१. वाहः ५१६ ।

६२. **सख्य-शिश्वीति भाषायाम् ५१७ ।**

६३. **जातेरस्त्रीविषया-दयोपधात् ५१८ ।**

६४. **पाक-कर्ण-पर्ण-पुष्प-फल-मूल-वालोत्तर-पदाच्च ५१९ ।**

६५. **इतो मनुष्यजातेः ५२० ।**

ऊङ्-प्रत्ययः

६६. **ऊङुतः ५२१ ।**

६७. **बाह्वन्तात्संज्ञायाम् ५२२ ।**

६८. **पङ्गोश्च ५२३ ।**

६९. **ऊरूत्तरपदादौपम्ये ५२४ ।**

७०. **संहित-शफ-लक्षण-वामादेश्च ५२५ ।**

७१. **कद्रु-कमण्डल्वोश्छन्दसि ३४४९ ।**

७२. **संज्ञायाम् ५२६ ।**

ङीन्-प्रत्ययः

७३. **शाङ्गरवाद्यञो ङीन् ५२७ ।**

चाप्-प्रत्ययः

७४. **यङश्चाप् ५२८ ।**

७५. **आवट्याच्च ५२९ ।**

## अथ तद्धिताधिकारः

७६. **तद्धिताः ५३० ।**

अधिकारोऽयमापञ्चमाध्यायपरिसमाप्तेः ५.४.१६० इति यावत्। ये प्रत्यया इत ऊर्ध्वमनुक्रमिष्यन्ते, तद्धितसंज्ञास्ते वेदितव्याः ।

ति-प्रत्ययः

७७. **यूनस्तिः ५३१ ।**

ष्यङ्-प्रत्ययः

७८. **अणिञोरनार्षयोर्गुरूपोत्तमयोः-ष्यङ् गोत्रे ११९८ ।**

७९. **गोत्रावयवात् ११९९ ।**

८०. **क्रौड्यादिभ्यश्च १२०० ।**

८१. **दैवयज्ञि-शौचिवृक्षि-सात्यमुग्रि-काण्डेविद्धिभ्यो-ऽन्यतरस्याम् १२०१ ।**

समर्थाधिकारः

८२. **समर्थानां प्रथमाद्वा १०७२ ।**

अधिकारोऽयम्। त्रयमप्यधिक्रियते - समर्थानामिति, प्रथमादिति, वा इति च। स्वार्थिकप्रत्ययावधिश्चायमधिकारः 'प्राग्दिशो विभक्तिः ५.३.१' इति यावत्। स्वार्थिकेषु ह्यस्योपयोगो नास्ति। विकल्पोऽपि तत्रा-नवस्थितः। केचिन्नित्यमेव भवन्ति। समर्थानां प्रथमाद्वा, इति सूत्रस्य लक्षणवाक्यानि 'तस्यापत्यम्' 'तेन रक्तं रागाद्' 'तत्र भवः' इत्येवमादीनि भविष्यन्ति। तेषु सामर्थ्ये सति प्रथमनिर्दिष्टादेव विकल्पेन प्रत्ययो भवतीति वेदितव्यम्।

अत्र ध्यातव्यम्। इत आरभ्य 'प्राग्दिशो विभक्तिः ५.३.१' इत्यतः प्राक् १४१ तद्धितार्था अस्थूलाक्षरैर्निर्दिष्टाः सन्ति। ते चार्था अण्-ठक्-यत्-छ-ठञ् इत्येतेषु पञ्चसु महोत्सर्गप्रत्ययेषु विभक्ताः सन्ति।

इदानीमेतेषां पञ्चमहोत्सर्गप्रत्ययाना--मधिकाराः पृथक्कृत्य प्रदर्श्यन्ते। अत्र यानि सूत्राणि तद्धितार्थान् निर्दिशन्ति, तान्यग्रे--ऽस्थूलाक्षरैर्निर्दिष्टानि सन्ति।

## अथ अणधिकारः

## प्राग्दीव्यतीयः

८३. **प्राग्दीव्यतोऽण् १०७३ ।**

अधिकारोऽयम्। 'तेन दीव्यति खनति

जयति जितम् ४.४.२' इति सूत्रात् प्राक्। अस्य सूत्रस्य दीव्यच्छब्दोऽस्याधिकार-स्यावधित्वेन गृह्यते। अतः प्रागेतस्माद् दीव्यत्संशब्दनात् सन्ति येऽपि ४४ अर्थाः प्राग्दीव्यतीयाः 'तस्यापत्यम्' 'तेन रक्तं रागाद्' इत्यादय इत ऊर्ध्वं वक्ष्यमाणाः, तत्रापवादविषयं परिहृत्याण् प्रवर्तते। अर्थनिर्देशकसूत्राण्य-स्थूलाक्षरैर्निर्दिष्टानि।

अथ प्राग्दीव्यतीयाः सामान्यप्रत्ययाः।

८४. **अश्वपत्यादिभ्यश्च १०७४।**

८५. **दित्य-दित्यादित्य-पत्युत्तरपदाण्ण्यः १०७७।**

८६. **उत्सादिभ्योऽञ् १०७८।**

८७. **स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् १०७९।**

'धान्यानां भवने क्षेत्रे खञ् (५.२.१)' सूत्रं वक्ष्यति। अस्मात्सूत्रात्प्राक् सन्ति येऽप्यर्था-स्तेष्वर्थेषु स्त्रीशब्दात् पुंस्-शब्दाच्च यथाक्रमं नञ्स्नञौ प्रत्ययौ भवत, इति अणपवादोऽयम्।

लुक्प्रकरणम् ४.१.९१ यावत्

८८. **द्विगोर्लुगनपत्ये १०८०।**

८९. **गोत्रेऽलुगचि १०८१।**

९०. **यूनि लुक् १०८३।**

९१. **फक्फिञो-रन्यतरस्याम् १०८७।**

**अथ प्राग्दीव्यतीया अर्था**

अस्थूलाक्षरैर्निर्दिष्टाः

९२. तस्यापत्यम् १०८८।

**नियमसूत्रम्**

९३. **एको गोत्रे १०९३।**

९४. **गोत्राद्यून्यस्त्रियाम् १०९४।**

अथापत्यार्थाः प्रत्ययाः

९५. **अत इञ् १०९५।**

९६. **बाह्वादिभ्यश्च १०९६।**

९७. **सुधातु-रकङ् च १०९७।**

९८. **गोत्रे कुञ्जादिभ्यश्च्फञ् १०९९।**

९९. **नडादिभ्यः फक् ११०१।**

१००. **हरितादिभ्यो ञः ११०२।**

१०१. **यञिञोश्च ११०३।**

१०२. **शरद्वच्छुनक-दर्भाद् भृगु-वत्सा-ग्रायणेषु ११०४।**

१०३. **द्रोण-पर्वत-जीवन्ता-दन्यतरस्याम् ११०५।**

१०४. **अनृष्यानन्तर्ये-बिदादिभ्योऽञ् ११०६।**

१०५. **गर्गादिभ्यो यञ् ११०७।**

१०६. **मधुबभ्र्वोर्ब्राह्मण-कौशिकयोः ११०९।**

१०७. **कपिबोधादाङ्गिरसे १११०।**

१०८. **वतण्डाच्च ११११।**

१०९. **लुक्स्त्रियाम् १११२।**

११०. **अश्वादिभ्यः फञ् १११३।**

१११. **भर्गात्त्रैगर्ते १११४।**

११२. **शिवादिभ्योऽण् १११५।**

११३. **अवृद्धाभ्यो नदीमानुषी-भ्यस्तन्नामिकाभ्यः १११६।**

११४. **ऋष्यन्धक-वृष्णि-कुरुभ्यश्च १११७।**

११५. **मातुरुत्संख्या-संभद्र-पूर्वायाः १११८।**

११६. कन्यायाः कनीन च ११११ ।
११७. विकर्ण-शुङ्गच्छगलाद्-वत्स-भरद्वाजात्रिषु ११२० ।
११८. पीलाया वा ११२१ ।
११९. ढक्च मण्डूकात् ११२२ ।
१२०. स्त्रीभ्यो ढक् ११२३ ।
१२१. द्व्यचः ११२४ ।
१२२. इतश्चानिञः ११२५ ।
१२३. शुभ्रादिभ्यश्च ११२६ ।
१२४. विकर्ण-कुषीतकात्काश्यपे ११२७ ।
१२५. भ्रुवो वुक्च ११२८ ।
१२६. कल्याण्यादीना-मिनङ् च ११३१ ।
१२७. कुलटाया वा ११३२ ।
१२८. चटकाया ऐरक् ११३४ ।
१२९. गोधाया ढ्रक् ११३५ ।
१३०. आर-गुदीचाम् ११३६ ।
१३१. क्षुद्राभ्यो वा ११३७ ।
१३२. पितृष्वसुश्छण् ११३८ ।
१३३. ढकि लोपः ११३९ ।
१३४. मातृष्वसुश्च ११४० ।
१३५. चतुष्पाद्भ्यो ढञ् ११४१ ।
१३६. गृष्ट्यादिभ्यश्च ११४३ ।
१३७. राजश्वशुराद्यत् ११५३ ।
१३८. क्षत्राद् घः ११६१ ।
१३९. कुलात् खः ११६२ ।
१४०. अपूर्वपदा-दन्यतरस्यां यड्-ढकञौ ११६३ ।
१४१. महाकुला-दञ्खञौ ११६४ ।
१४२. दुष्कुलाड्-ढक् ११६५ ।
१४३. स्वसुश्छः ११६६ ।
१४४. भ्रातुर्व्यच्च ११६७ ।
१४५. व्यन्सपत्ने ११६८ ।
१४६. रेवत्यादिभ्यष्ठक् ११६९ ।
१४७. गोस्त्रियाः कुत्सने ण च ११७१ ।
१४८. वृद्धाट्-ठक्-सौवीरेषु बहुलम् ११७२ ।
१४९. फेश्छ च ११७३ ।
१५०. फाण्टाहृति-मिमताभ्यां - ण फिञौ ११७४ ।
१५१. कुर्वादिभ्यो ण्यः ११७५ ।
१५२. सेनान्त-लक्षणकारिभ्यश्च ११७६ ।
१५३. उदीचा-मिञ् ११७७ ।
१५४. तिकादिभ्यः फिञ् ११७८ ।
१५५. कौशल्य-कार्मार्याभ्यां च ११७९ ।
१५६. अणो द्व्यचः ११८० ।
१५७. उदीचां वृद्धादगोत्रात् ११८१ ।
१५८. वाकिनादीनां कुक्च ११८२ ।
१५९. पुत्रान्ता-दन्यतरस्याम् ११८३ ।
१६०. प्राचामवृद्धात् फिन्बहुलम् ११८४ ।
१६१. मनोर्जातावञ्यतौ षुक्च ११८५ ।

गोत्रसंज्ञा

१६२. अपत्यं पौत्रप्रभृति गोत्रम् १०८९ ।

युवसंज्ञा ४.३.१६७ इति यावत्

१६३. जीवति तु वंश्ये युवा १०९० ।
१६४. भ्रातरि च ज्यायसि १०९१ ।
१६५. वान्यस्मिन्सपिण्डे स्थविरतरे - जीवति १०९२ ।

इति युवसंज्ञा

१६६. जनपदशब्दात्क्षत्रियादञ् ११८६ ।
१६७. साल्वेय-गान्धारिभ्यां च ११८७ ।
१६८. द्व्यञ्मगध-कलिङ्ग-सूरमसा-दण् ११८८ ।
१६९. वृद्धेत्कोसलाजादाञ् ञ्यङ् ११८९ ।
१७०. कुरुनादिभ्यो ण्यः ११९० ।
१७१. साल्वावयव-प्रत्यग्रथ-कल-
-कूटाश्मकादिञ् ११९१ ।

तद्राजसंज्ञा

१७२. ते तद्राजाः ११९२ ।

४.१.१६८ इत्यत आरभ्य ४.१.१७३ इत्यन्तं विहिता अण्, अञ्, ञ्यङ्, ड्यण्, ण्य प्रत्यया तद्राजसंज्ञा भवन्ति। तद्राजसंज्ञायाः फलं 'तद्राजस्य बहुषु तेनैवास्त्रियाम्'२.४.६२' इत्यनेन तद्राजप्रत्ययस्य लुक्।

१७३. कम्बोजाल्लुक् ११९४ ।
१७४. स्त्रियामवन्ति-कुन्ति-
कुरुभ्यश्च ११९५ ।
१७५. अतश्च ११९६ ।
१७६. न प्राच्यभर्गादि-यौधेयादिभ्यः ११९७ ।

इत्यपत्यार्थाः प्रत्ययाः ।

## चतुर्थाध्याये द्वितीयः पादः

१. तेन रक्तं रागात् १२०२ ।
२. लाक्षारोचनाशकल-
कर्दमाट्ठक् १२०३ ।
३. नक्षत्रेण युक्त कालः १२०४ ।
४. लुबविशेषे १२०५ ।
५. संज्ञायां श्रवणाश्वत्थाभ्याम् १२०६ ।
६. द्वन्द्वाच्छः १२०७ ।
७. दृष्टं साम १२०८ ।
८. कलेर्ढक् १२०९ ।
९. वामदेवाड्-ड्यड्-ड्यौ १२१० ।
१०. परिवृतो रथः १२११ ।
११. पाण्डुकम्बलादिनिः १२१२ ।
१२. द्वैपवैयाघ्रादञ् १२१३ ।
१३. कौमारापूर्ववचने १२१४ ।
१४. तत्रोद्धृतममत्रेभ्यः १२१५ ।
१५. स्थण्डिलाच्छयितरि व्रते १२१६ ।
१६. संस्कृतं भक्षाः १२१७ ।
१७. शूलोखाद्यत् १२१८ ।
१८. दध्नष्ठक् १२१९ ।
१९. उदश्वितोऽन्यतरस्याम् १२२० ।
२०. क्षीराड्-ढञ् १२२२ ।
२१. सास्मिन्पौर्णमासीति
संज्ञायाम् १२२३ ।
२२. आग्रहायण्यश्वत्थाट्-ठक् १२२४ ।
२३. विभाषा फाल्गुनी-श्रवणा-
कार्तिकी-चैत्रीभ्यः १२२५ ।
२४. सास्य देवता १२२६ ।
२५. कस्येत् १२२७ ।
२६. शुक्राद्घन् १२२८ ।
२७. अपोनप्त्रपां-नप्तृभ्यां घः १२२९ ।
२८. छ च १२३० ।
२९. महेन्द्राद् घाणौ च १२३१ ।
३०. सोमाट्ट्यण् १२३२ ।
३१. वाय्वृतुपित्रुषसो यत् १२३३ ।

३२. द्यावापृथिवी-शुनासीर-मरुत्व-
दग्नीषोम-वास्तोष्पति -
गृहमेधाच्छ च १२३५।
३३. अग्नेर्ढक् १२३६।
३४. कालेभ्यो भववत् १२३७।
३५. महाराज-प्रोष्ठपदाट्-ठञ् १२३८।
३६. पितृव्य-मातुल-मातामह-
पितामहाः १२४२।
३७. तस्य समूहः १२४३।
३८. भिक्षादिभ्योऽण् १२४४।
३९. गोत्रोक्षोष्ट्रो-रभ्र-राज-
राजन्य-राजपुत्र-वत्स-
मनुष्याजाद् वुञ् १२४६।
४०. केदाराद्यञ्च १२४८।
४१. ठञ् कवचिनश्च १२४९।
४२. ब्राह्मण-माणव-
वाडवाद्यन् १२५०।
४३. ग्राम-जन-बन्धुभ्यस्तल् १२५१।
४४. अनुदात्तादेरञ् १२५३।
४५. खण्डिकादिभ्यश्च १२५४।
४६. चरणेभ्यो धर्मवत् १२५५।
४७. अचित्त-हस्तिधेनोष्ठक् १२५६।
४८. केशाश्वाभ्यां यञ्छा-
वन्यतरस्याम् १२५७।
४९. पाशादिभ्यो यः १२५८।
५०. खलगो-रथात् १२५९।
५१. इनि-त्र-कट्यचश्च १२६०।
५२. विषयो देशे १२६१।
५३. राजन्यादिभ्यो वुञ् १२६२।
५४. भौरिक्याद्यैषु-कार्यादिभ्यो-
विधल्-भक्तलौ १२६३।
५५. सोऽस्यादिरितिच्छन्दसः
प्रगाथेषु १२६४।
५६. संग्रामे प्रयोजन-योद्धृभ्यः १२६५।
५७. तदस्यां प्रहरणमिति -
क्रीडायां णः १२६६।
५८. घञः सास्यां क्रियेति ञः १२६७।
५९. तदधीते तद्वेद १२६९।
६०. क्रतूक्थादिसूत्रान्ताट्ठक् १२७०।
६१. क्रमादिभ्यो वुन् १२७१।
६२. अनुब्राह्मणादिनिः १२७२।
६३. वसन्तादिभ्यष्ठक् १२७३।
६४. प्रोक्ताल्लुक् १२७४।
६५. सूत्राच्च कोपधात् १२७७।
६६. छन्दोब्राह्मणानि च -
तद्विषयाणि १२७८।

## चतुरर्थाः

६७. तदस्मिन्नस्तीति देशे -
तन्नाम्नि १२७९।
६८. तेन निर्वृत्तम् १२८०।
६९. तस्य निवासः १२८१।
७०. अदूरभवश्च १२८२।

इत आरभ्य 'नडादीनां कुक्च ४.२.९१' इति यावत् ये प्रत्यया विहितास्त एतेषु चतुर्ष्वर्थेषु भवन्ति।

७१. ओरञ् १२८३।
७२. मतोश्च बह्व-जङ्गात् १२८४।
७३. बह्वचः कूपेषु १२८५।
७४. उदक्च विपाशः १२८६।
७५. संकलादिभ्यश्च १२८७।

७६. स्त्रीषु सौवीर-साल्वप्राक्षु १२८८ ।
७७. सुवास्त्वादिभ्योऽण् १२८९ ।
७८. रोणी १२९० ।
७९. कोपधाच्च १२९१ ।
८०. वुञ्-छण्-कठजिल-सेनि-र-ढञ्-ण्य-य-फक्-फिञिञ्-ञ्य-कक्-ठको-ऽरीहण-कृशाश्वर्श्य-कुमुद-काश-तृण-प्रेक्षाश्म-सखि-संकाश-बल-पक्ष-कर्ण-सुतंगम-प्रगदिन्-वराह-कुमुदादिभ्यः १२९२ ।
८१. जनपदे लुप् १२९३ ।
८२. वरणादिभ्यश्च १३०१ ।
८३. शर्कराया वा १३०२ ।
८४. ठक्छौ च १३०३ ।
८५. नद्यां मतुप् १३०४ ।
८६. मध्वादिभ्यश्च १३०५ ।
८७. कुमुद-नड-वेतसेभ्यो-ड्मतुप् १३०६ ।
८८. नड-शादाद् ड्वलच् १३०७ ।
८९. शिखाया वलच् १३०८ ।
९०. उत्करादिभ्यश्छः १३०९ ।
९१. नडादीनां कुक्च १३१० ।

## अथ शेषाधिकारः

९२. शेषे १३१२ ।

अपत्यादिश्चतुरर्थपर्यन्ता अर्था उक्ताः । तेभ्योऽन्योऽर्थः 'तत्र जातः ४.३.२५' इत्यत आरभ्य 'तस्येदम् ४.३.१२०' इति यावत् शेषः । एतेषु जातादिशैषिकेष्वर्थेषु यथाविहिताः घादयः प्रत्ययाः स्युः ।

ये अपत्यादिचतुरर्थपर्यन्ता अर्था उक्तास्तेषु घादयो मा भूवन्निति शेषाधिकारः क्रियते । शेष इति लक्षणं चाधिकारश्च । अतो येऽर्थाः क्वचिन्नोक्तास्तेष्वपि अण् प्रत्ययो भवतु ।

९३. राष्ट्रावारपाराद् घखौ १३१३ ।
९४. ग्रामाद्यखञौ १३१४ ।
९५. कत्र्यादिभ्यो ढकञ् १३१५ ।
९६. कुल-कुक्षि-ग्रीवाभ्यः श्वास्यलंकारेषु १३१६ ।
९७. नद्यादिभ्यो ढक् १३१७ ।
९८. दक्षिणा-पश्चात्-पुरसस्त्यक् १३१८ ।
९९. कापिश्याः ष्फक् १३१९ ।
१००. रङ्को-रमनुष्येऽण् च १३२० ।
१०१. द्युप्रागपा-गुदक्प्रतीचो यत् १३२१ ।
१०२. कन्थायाष्ठक् १३२२ ।
१०३. वर्णौ वुक् १३२३ ।
१०४. अव्ययात्त्यप् १३२४ ।
१०५. ऐषमोह्यःश्वसो-ऽन्यतरस्याम् १३२६ ।
१०६. तीररूप्योत्तरपदादञ्ञौ १३२७ ।
१०७. दिक्पूर्वपदा-दसंज्ञायां ञः १३२८ ।
१०८. मद्रेभ्योऽञ् १३२९ ।
१०९. उदीच्यग्रामाच्च-बह्वचोऽन्तोदात्तात् १३३० ।
११०. प्रस्थोत्तरपद-पलद्यादि-कोपधादण् १३३१ ।
१११. कण्वादिभ्यो गोत्रे १३३२ ।
११२. इञश्च १३३३ ।
११३. न द्व्यचः प्राच्य-भरतेषु १३३४ ।
११४. वृद्धाच्छः १३३७ ।

११५. भवतष्ठक्छसौ १३३९।
११६. काश्यादिभ्यष्ठञ्ञिठौ १३४०।
११७. वाहीकग्रामेभ्यश्च १३४१।
११८. विभाषो-शीनरेषु १३४२।
११९. ओर्देशे ठञ् १३४३।
१२०. वृद्धात्प्राचाम् १३४४।
१२१. धन्वयोपधाद् वुञ् १३४५।
१२२. प्रस्थपुरवहान्ताच्च १३४६।
१२३. रोपधेतो: प्राचाम् १३४७।
१२४. जनपद-तदवध्योश्च १३४८।
१२५. अवृद्धादपि बहुवचन-विषयात् १३४९।
१२६. कच्छाग्नि-वक्त्र-वर्तोत्तरपदात् १३५०।
१२७. धूमादिभ्यश्च १३५१।
१२८. नगरात्कुत्सनप्रावीण्ययो: १३५२।
१२९. अरण्यान्मनुष्ये १३५३।
१३०. विभाषा कुरु-युगन्धराभ्याम् १३५४।
१३१. मद्रवृज्यो: कन् १३५५।
१३२. कोपधादण् १३५६।
१३३. कच्छादिभ्यश्च १३५७।
१३४. मनुष्य-तत्स्थयोर्वुञ् १३५८।
१३५. अपदातौ साल्वात् १३५९।
१३६. गो-यवाग्वोश्च १३६०।
१३७. गर्तोत्तरपदाच्छ: १३६१।
१३८. गहादिभ्यश्च १३६२।
१३९. प्राचां कटादे:१३६३।
१४०. राज्ञ: क च १३६४।
१४१. वृद्धा-दकेकान्त-खोपधात् १३६५।
१४२. कन्था-पलद-नगरग्राम-ह्रदोत्तरपदात् १३६६।
१४३. पर्वताच्च १३६७।
१४४. विभाषा मनुष्ये १३६८।
१४५. कृकण-पर्णाद् भारद्वाजे १३६९।

### चतुर्थाध्याये तृतीय: पाद:

१. युष्मदस्मदो-रन्यतरस्यां - खञ्च १३७०।
२. तस्मिन्नणि च - युष्माकास्माकौ १३७१।
३. तवक-ममका-वेकवचने १३७२।
४. अर्धाद्यत् १३७४।
५. परावराधमोत्तम-पूर्वाच्च १३७५।
६. दिक्पूर्वपदाट्-ठञ्च १३७६
७. ग्रामजनपदैकदेशा-दञ्ठञौ १३७७।
८. मध्यान्म: १३७८।
९. अ साम्प्रतिके १३७९।
१०. द्वीपादनुसमुद्रं यञ् १३८०।
११. कालाट्ठञ् १३८१।
१२. श्राद्धे शरद: १३८२।
१३. विभाषा रोगातपयो: १३८३।
१४. निशा-प्रदोषाभ्यां च १३८४।
१५. श्वसस्तुट् च १३८५।
१६. सन्धिवेलाद्यृतु - नक्षत्रेभ्योऽण् १३८७।
१७. प्रावृष एण्य: १३८८।
१८. वर्षाभ्यष्ठक् १३८९।
१९. छन्दसि ठञ् ३४५०।
२०. वसन्ताच्च ३४५१।

२१. हेमन्ताच्च ३४५२ ।
२२. सर्वत्राण्च तलोपश्च १३९० ।
२३. सायंचिरं-प्राह्णे-प्रगे-ऽव्ययेभ्यष्ट्युट्युलौ तुट् च १३९१ ।
२४ विभाषा पूर्वाह्णा-पराह्णाभ्याम् १३९२ ।
२५. तत्र जातः १३९३ ।
२६. प्रावृषष्ठप् १३९४ ।
२७. संज्ञायां शरदो वुञ् १३९५ ।
२८. पूर्वाह्णा-पराह्णार्द्रा-मूल-प्रदोषावस्कराद् वुन् १४०१ ।
२९. पथः पन्थ च १४०२ ।
३०. अमावास्याया वा १४०३ ।
३१. अ च १४०४ ।
३२. सिन्ध्वपकराभ्यां कन् १४०५ ।
३३. अणञौ च १४०६ ।
३४. श्रविष्ठा-फल्गुन्यनुराधा-स्वाति-तिष्य-पुनर्वसु-हस्त-विशाखाषाढा-बहुलाल्लुक् १४०७ ।
३५. स्थानान्त-गोशाल-खरशालाच्च १४१० ।
३६. वत्सशालाभिजिदश्वयुक्-शतभिषजो वा १४११ ।
३७. नक्षत्रेभ्यो बहुलम् १४१२ ।
३८. कृतलब्धक्रीतकुशलाः १४१३ ।
३९. प्रायभवः १४१४ ।
४०. उपजानूपकर्णोप-नीवेष्ठक् १४१५ ।
४१. संभूते १४१६ ।
४२. कोशाड्ढञ् १४१७ ।
४३. कालात् साधु-पुष्प्यत् पच्यमानेषु १४१८ ।
४४. उप्ते च १४१९ ।
४५. आश्वयुज्या वुञ् १४२० ।
४६. ग्रीष्मवसन्ता -दन्यतरस्याम् १४२१ ।
४७. देयमृणे १४२२ ।
४८. कलाप्यश्वत्थ-यवबुसाद् वुन् १४२३ ।
४९. ग्रीष्मावरसमाद् वुञ् १४२४ ।
५०. संवत्सराग्रहायणीभ्यां ठञ्च १४२५ ।
५१. व्याहरति मृगः १४२६ ।
५२. तदस्य सोढम् १४२७ ।
५३. तत्र भवः १४२८ ।
५४. दिगादिभ्यो यत् १४२९ ।
५५. शरीरावयवाच्च १४३० ।
५६. दृति-कुक्षि-कलशि-वस्त्यस्त्यहेर्ढञ् १४३३ ।
५७. ग्रीवाभ्योऽण्च १४३४ ।
५८. गम्भीराञ्ञ्यः १४३५ ।
५९. अव्ययीभावाच्च १४३६ ।
६०. अन्तःपूर्वपदाद् ठञ् १४३७ ।
६१. ग्रामात्पर्यनुपूर्वात् १४४० ।
६२. जिह्वामूलाङ्गुलेश्छः १४४१ ।
६३. वर्गान्ताच्च १४४२ ।
६४. अशब्दे -यत्खा-वन्यतरस्याम् १४४३ ।
६५. कर्णललाटात् कनलंकारे १४४४ ।

६६. तस्य व्याख्यान इति -
च व्याख्यातव्यनाम्न: १४४५ ।
६७. बह्वचोऽन्तोदात्ताट्-ठञ् १४४६ ।
६८. क्रतुयज्ञेभ्यश्च १४४७ ।
६९. अध्यायेष्वेवर्षे १४४८ ।
७०. पौरोडाशपुरोडाशात्ष्ठन् १४४९ ।
७१. छन्दसो यदणौ १४५० ।
७२. द्व्यजृद्-ब्राह्मणर्क्-प्रथमाध्वर-
पुरश्चरण-नामा -
ख्याताट्ठक् १४५१ ।
७३. अणृगयनादिभ्य:१४५२ ।
७४. तत आगत: १४५३ ।
७५. ठगायस्थानेभ्य: १४५४ ।
७६. शुण्डिकादिभ्योऽण् १४५५ ।
७७. विद्या-योनि-सम्बन्धेभ्यो -
वुञ् १४५६ ।
७८. ऋतष्ठञ् १४५७ ।
७९. पितुर्यच्च १४५८ ।
८०. गोत्रा-दङ्कवत् १४५९ ।
८१. हेतुमनुष्येभ्योऽन्यतरस्यां -
रूप्य: १४६१ ।
८२. मयट् च १४६२ ।
८३. प्रभवति १४६३ ।
८४. विदूराञ्ञ्य: १४६४ ।
८५. तद् गच्छति पथिदूतयो: १४६५ ।
८६. अभिनिष्क्रामति द्वारम् १४६६ ।
८७. अधिकृत्य कृते ग्रन्थे १४६७ ।
८८. शिशुक्रन्द-यमसभ-द्वन्द्वेन्द्र-
जननादिभ्यश्छ: १४६८ ।
८९. सोऽस्य निवास: १४६९ ।
९०. अभिजनश्च १४७० ।
९१. आयुधजीविभ्यश्छ: पर्वते १४७१ ।
९२. शण्डिकादिभ्यो ञ्य: १४७२ ।
९३. सिन्धुतक्ष-
शिलादिभ्योऽणञौ १४७३ ।
९४. तूदीशलातुर-वर्मतीकूचवाराड्-
ढक्छण्ढञ्यक: १४७४ ।
९५. भक्ति: १४७५ ।
९६. अचित्ता-ददेशकालाट्ठक् १४७६ ।
९७. महाराजाट्ठञ् १४७७ ।
९८. वासुदेवार्जुनाभ्यां वुन् १४७८ ।
९९. गोत्रक्षत्रियाख्येभ्यो -
बहुलं वुञ् १४७९ ।
१००. जनपदिनां जनपदवत्सर्वं जनपदेन
समानशब्दानां बहुवचने १४८० ।
१०१. तेन प्रोक्तम् १४८१ ।
१०२. तित्तिरि-वरतन्तु-
खण्डिकोखाच्छण् १४८२ ।
१०३. काश्यप-कौशिकाभ्या-मृषिभ्यां -
णिनि: १४८३ ।
१०४. कलापि-वैशम्पायनान्ते-
-वासिभ्यश्च १४८४ ।
१०५. पुराणप्रोक्तेषु -
ब्राह्मणकल्पेषु १४८५ ।
१०६. शौनकादिभ्यश्छन्दसि १४८६ ।
१०७. कठचरकाल्लुक् १४८७ ।
१०८. कलापिनोऽण् १४८८ ।
१०९. छगलिनो ढिनुक् १४८९ ।
११०. पाराशर्य-शिलालिभ्यां भिक्षु-
नटसूत्रयो: १४९० ।

१११. कर्मन्दकृशाश्वादिनिः १४९१।

११२. तेनैकदिक् १४९२।

## अव्ययतद्धितः

११३. तसिश्च १४९३।

'तसिश्च ४.३.११३' इत्यनेन विधीयमान-
-स्तसिप्रत्ययोऽव्ययसंज्ञकः।

११४. उरसो यच्च १४९४।

११५. उपज्ञाते १४९५।

११६. कृते ग्रन्थे १४९६।

११७. संज्ञायाम् १४९७।

११८. कुलालादिभ्यो वुञ् १४९८।

११९. क्षुद्रा-भ्रमर-वटर-
पादपादञ् १४९९।

१२०. तस्येदम् १५००।

१२१. रथाद्यत् १५०१।

१२२. पत्रपूर्वादञ् १५०२।

१२३. पत्राध्वर्युपरिषदश्च १५०३।

१२४. हलसीराट्ठक् १५०४।

१२५. द्वन्द्वाद् वुन् -
वैरमैथुनिकयोः १५०५।

१२६. गोत्रचरणाद् वुञ् १५०६।

१२७. सङ्घाङ्क-लक्षणेष्वञ्यञिञा-
-मण् १५०७।

१२८. शाकलाद्वा १५०८।

१२९. छन्दो-गौक्थिक-याज्ञिक-
बह्वृचनटाञ्ञ्यः १५०९।

१३०. न दण्डमाणवान्तेवासिषु १५१०।

१३१. रैवतिकादिभ्यश्छः १५११।

१३२. कौपिञ्जल-हास्तिपदादण् १५१२।

१३३. आथर्वणिकस्येकलोपश्च १५१३।

इति शेषाधिकारः।

('तस्य विकारः' 'अवयवे च प्राण्योषधि-
वृक्षेभ्यः' इत्यनयोर्विकारावयवयोरर्थयोः प्राण्यो-
-षधिवृक्षेभ्यो यथाविहिताः प्रत्यया भवन्ति।
प्राण्योषधिवृक्षान्यप्रकृतिभ्यः शैषिका एवेति
विवेकः।)

१३४. तस्य विकारः १५१४।

१३५. अवयवे च -
प्राण्योषधिवृक्षेभ्यः १५१५।

१३६. बिल्वादिभ्योऽण् १५१६।

१३७. कोपधाच्च १५१७।

१३८. त्रपुजतुनोः षुक् १५१८।

१३९. ओरञ् १५१९।

१४०. अनुदात्तादेश्च १५२०।

१४१. पलाशादिभ्यो वा १५२१।

१४२. शम्याः ष्लञ् १५२२।

१४३. मयड्वैतयोर्भाषायाम-
भक्ष्याच्छादनयोः १५२३।

१४४. नित्यं वृद्धशरादिभ्यः १५२४।

१४५. गोश्च पुरीषे १५२५।

१४६. पिष्टाच्च १५२६।

१४७. संज्ञायां कन् १५२७।

१४८. व्रीहेः पुरोडाशे १५२८।

१४९. असंज्ञायां तिलयवाभ्याम् १५२९।

१५०. द्व्यचश्छन्दसि ३४५३।

१५१. नोत्वद्वर्ध्र-बिल्वात् ३४५४।

१५२. तालादिभ्योऽण् १५३०।

१५३. जातरूपेभ्यः परिमाणे १५३१।

१५४. प्राणि-रजतादिभ्योऽञ् १५३२।
१५५. ञितश्च तत्प्रत्ययात् १५३३।
१५६. क्रीतवत्परिमाणात् १५३४।
१५७. उष्ट्राद् वुञ् १५३५।
१५८. उमोर्णयोर्वा १५३६।
१५९. एण्या ढञ् १५३७।
१६०. गोपयसोर्यत् १५३८।
१६१. द्रोश्च १५३९।
१६२. माने वयः १५४०।
१६३. फले लुक् १५४१।
१६४. प्लक्षादिभ्योऽण् १५४२।
१६५. जम्ब्वा वा १४४४।
१६६. लुप् च १५४५।
१६७. हरीतक्यादिभ्यश्च १५४६।
१६८. कंसीय-परशव्ययोर्यञञौ - लुक्च १५४७।

## चतुर्थाध्याये चतुर्थः पादः
## अथ ठगधिकारः
### प्राग्वहतीयः

१. प्राग्वहतेष्ठक् १५४८।

'प्राग्वहतेष्ठक् ४.४.१' इत्यत आरभ्या--धिकारोऽयं 'तद्वहति रथयुगप्रासङ्गम् ४.४.७६' इत्यतः प्राक्। अस्य सूत्रस्य वहति-शब्दोऽस्याधिकारस्यावधित्वेन गृह्यते।

अतः प्रागेतस्माद् वहतिसंशब्दनादित ऊर्ध्वं सन्ति येऽपि ३६ अर्था अस्थूलाक्षरैर्निर्दिष्टाः प्राग्वहतीया वक्ष्यमाणाः, 'तेन दीव्यति खनति जयति जितम्' 'संस्कृतम्' इत्यादयः, तत्रापवादविषयं परिहृत्य ठक् प्रवर्तते।

२. तेन दीव्यति खनति जयति - जितम् १५५०।
३. संस्कृतम् १५५१।
४. कुलत्थकोपधादण् १५५२।
५. तरति १५५३।
६. गोपुच्छाट्ठञ् १५५४।
७. नौद्व्यचष्ठन् १५५५।
८. चरति १५५६।
९. आकर्षात्ष्ठल् १५५७।
१०. पर्पादिभ्यः ष्ठन् १५५८।
११. श्वगणाट्ठञ्च १५५९।
१२. वेतनादिभ्यो जीवति १५६२।
१३. वस्नक्रयविक्रयाट्ठन् १५६३।
१४. आयुधाच्छ च १५६४।
१५. हरत्युत्सङ्गादिभ्यः १५६५।
१६. भस्त्रादिभ्यः ष्ठन् १५६६।
१७. विभाषा विवधात् १५६७।
१८. अण्कुटिलिकायाः १५६८।
१९. निर्वृत्तेऽक्षद्यूतादिभ्यः १५६९।
२०. क्त्रेर्मम्नित्यम् १५७०।
२१. अपमित्य-याचिताभ्यां-कक्कनौ १५७१।
२२. संसृष्टे १५७२।
२३. चूर्णादिनिः १५७३।
२४. लवणाल्लुक् १५७४।
२५. मुद्गादण् १५७५।
२६. व्यञ्जनै-रुपसिक्ते १५७६।
२७. ओजःसहोम्भसा वर्तते १५७७।
२८. तत्प्रत्यनु-पूर्व-मीप-लोम-कूलम् १५७८।

२९. **परिमुखं च १५७९ ।**
३०. प्रयच्छति गर्ह्यम् १५८० ।
३१. **कुसीद-दशैका-दशात्-ष्ठन्ष्ठचौ १५८१ ।**
३२. उञ्छति १५८२ ।
३३. रक्षति १५८३ ।
३४. शब्ददर्दुरं करोति १५८४ ।
३५. पक्षि-मत्स्य-मृगान्हन्ति १५८५ ।
३६. परिपन्थं च तिष्ठति १५८६ ।
३७. माथोत्तरपदपदव्यनुपदं - धावति १५८७ ।
३८. **आक्रन्दाट्ठञ्च १५८८ ।**
३९. पदोत्तरपदं गृह्णाति १५८९ ।
४०. **प्रतिकण्ठार्थललामं च १५९० ।**
४१. धर्मं चरति १५९१ ।
४२. प्रतिपथमेति ठंश्च १५९२ ।
४३. समवायान्समवैति १५९३ ।
४४. **परिषदो ण्यः १५९४ ।**
४५. **सेनाया वा १५९५ ।**
४६. संज्ञायां ललाटकुक्कुट्यौ - पश्यति १५९६ ।
४७. तस्य धर्म्यम् १५९७ ।
४८. **अण्महिष्यादिभ्यः १५७८ ।**
४९. **ऋतोऽञ् १५९९ ।**
५०. अवक्रयः १६०० ।
५१. तदस्य पण्यम् १६०१ ।
५२. **लवणाट्ठञ् १६०२ ।**
५३. **किसरादिभ्यः ष्ठन् १६०३ ।**
५४. **शलालुनोऽन्यतरस्याम् १६०४ ।**
५५. शिल्पम् १६०५ ।
५६. **मड्डुक-झर्झरा-दणन्य-तरस्याम् १६०६ ।**
५७. प्रहरणम् १६०७ ।
५८. **परश्वधाट्ठञ्च १६०८ ।**
५९. **शक्तियष्ट्योरीकक् १६०९ ।**
६०. अस्तिनास्तिदिष्टं मतिः १६१० ।
६१. शीलम् १६११ ।
६२. **छत्रादिभ्यो णः १६१२ ।**
६३. कर्माध्ययने वृत्तम् १६१४ ।
६४. **बह्वच्पूर्वपदाट्ठञ् १६१५ ।**
६५. हितं भक्षाः १६१६ ।
६६. तदस्मै दीयते नियुक्तम् १६१७ ।
६७. **श्राणा-मांसौदनाद्-टिठन् १६१८**
६८. **भक्तादणन्यतरस्याम् १६१९ ।**
६९. तत्र नियुक्तः १६२० ।
७०. **अगारान्ताद् ठन् १६२१ ।**
७१. अध्यायिन्यदेशकालात् १६२२ ।
७२. कठिनान्तप्रस्तारसंस्थानेषु - व्यवहरति १६२३ ।
७३. निकटे वसति १६२४ ।
७४. **आवसथात्ष्ठल् १६२५ ।**

## अथ यदधिकारः

## प्राग्घितीयः

७५. प्राग्घिताद्यत् १६२६ ।

'प्राग्घिताद्यत् ४.४.७५' इत्यत आरभ्याधिकारोऽयं 'तस्मै हितम् ५.१.५' इत्यत प्राक्। अस्य सूत्रस्य हितशब्दोऽस्या- -धिकारस्यावधित्वेन गृह्यते।

अतः प्रागेतस्माद्धितसंशब्दनादित ऊर्ध्वं सन्ति येऽपि ३१ अर्था अस्थूलाक्षरैर्निर्दिष्टाः प्राग्घितीया वक्ष्यमाणा, 'तद्वहति रथयुग -प्रासङ्गम्' 'विध्यत्यधनुषा' 'धनगणं लब्धा' इत्यादयः, तत्रापवादविषयं परिहृत्य यत् प्रवर्तते।

७६. तद्वहति रथयुगप्रासङ्गम् १६२७।
७७. **धुरो यड्ढकौ १६२८।**
७८. **खः सर्वधुरात् १६३०।**
७९. **एकधुराल्लुक्च १६३१।**
८०. **शकटादण् १६३२।**
८१. **हलसीराट् ठक् १६३३।**
८२. **संज्ञायां जन्या १६३४।**
८३. विध्यत्यधनुषा १६३५।
८४. धनगणं लब्धा १६३६।
८५. **अन्नाण्णः १६३७।**
८६. वशं गतः १६३८।
८७. पदमस्मिन्दृश्यम् १६३९।
८८. मूलमस्याबर्हि १६४०।
८९. **संज्ञायां धेनुष्या १६४१।**
९०. गृहपतिना संयुक्ते ञ्यः १६४२।
९१. **नौवयो-धर्म-विष-मूल-मूल-सीता-तुलाभ्यस्तार्य-तुल्य-प्राप्य-वध्यानाम्य-सम-समित-संमितेषु १६४३।**
९२. धर्मपथ्यर्थन्यायादनपेते १६४४।
९३. छन्दसो निर्मिते १६४५।
९४. उरसोऽण्च १६४६।
९५. हृदयस्य प्रियः १६४७।
९६. बन्धने चर्षौ १६४८।
९७. मतजनहलात् - करणजल्पकर्षेषु १६४९।
९८. तत्र साधुः १६५०।
९९. **प्रतिजनादिभ्यः खञ् १६५१।**
१००. **भक्ताण्णः १६५२।**
१०१. **परिषदो ण्यः १६५३।**
१०२. **कथादिभ्यष्ठक् १६५४।**
१०३. **गुडादिभ्यष्ठञ् १६५५।**
१०४. **पथ्यतिथि-वसति-स्वपतेर्ढञ् १६५६।**
१०५. **सभाया यः १६५७।**
१०६. **ढश्छन्दसि ३४५५।**
१०७. समानतीर्थे वासी १६५८।
१०८. समानोदरे शयित ओ चोदात्तः १६५९।
१०९. **सोदराद्यः १६६०।**

### भवाधिकारश्छन्दोऽधिकारश्च

'भवे छन्दसि ४.४.११०' इत्यत आरभ्य छन्दोऽधिकार आपादपरिसमाप्तेः। भवाधिकारश्च 'समुद्राभ्राद् घ, इति यावत्।

११०. भवे छन्दसि ३४५६।
१११. **पाथोनदीभ्यां ड्यण् ३४५७।**
११२. **वेशन्तहिमवद्भ्यामण् ३४५८।**
११३. **स्रोतसो विभाषा - ड्यड्ड्यौ ३४५९।**
११४. **सगर्भसयूथसनुताद्यन् ३४६०।**
११५. **तुग्राद् घन् ३४६१।**
११६. **अग्राद्यत् ३४६२।**
११७. **घच्छौ च ३४६३।**

११८. **समुद्राभ्राद् घः ३४६४।**
११९. बर्हिषि दत्तम् ३४६५।
१२०. दूतस्य भागकर्मणी ३४६६।
१२१. रक्षोयातूनां हननी ३४६७।
१२२. रेवती जगती-हविष्याभ्यः -
प्रशस्ये ३४६८।
१२३. असुरस्य स्वम् ३४६९।
१२४. **मायायामण् ३४७०।**
१२५. तद्वानासा-मुपधानो मन्त्र -
इतीष्टकासु लुक्च मतोः ३४७१।
१२६. **अश्विमानण् ३४७२।**
१२७. **वयस्यासु मूर्ध्नो मतुप् ३४७३।**
१२८. मत्वर्थे मासतन्वोः ३४७४।
१२९. **मधोर्ज च ३४७५।**
१३०. **ओजसोऽहनि यत्खौ ३४७६।**
१३१. **वेशोयशआदेर्भगाद्यल् ३४७७।**
१३२. **ख च ३४७८।**
१३३. पूर्वैः कृतमिनयौ च ३४७९।
१३४. अद्भिः संस्कृतम् ३४८०।
१३५. सहस्रेण संमितौ घः ३४८१।
१३६. **मतौ च ३४८२।**
१३७. सोममर्हति यः ३४८३।
१३८. मये च ३४८४।
१३९. **मधोः ३४८५।**
१४०. **वसोः समूहे च ३४८६।**
१४१. **नक्षत्राद् घः३४८७।**
१४२. **सर्वदेवात्तातिल् ३४८८।**
१४३. शिवशमरिष्टस्य करे ३४८९।
१४४. भावे च ३४९०।

## पञ्चमाध्याये प्रथमः पादः

## अथ छाधिकारः

### प्राक्क्रीतीयः

१. **प्राक् क्रीताच्छः १६६१।**

'प्राक्क्रीताच्छः५.१.१' इत्यत आरभ्या- -धिकारोऽयम् 'तेन क्रीतम् ५.१.३७' इत्यतः प्राक्। अस्य सूत्रस्य क्रीतशब्दोऽस्याधिकार- -स्यावधित्वेन गृह्यते।

अतः प्रागेतस्मात् क्रीतसंशब्दनादित ऊर्ध्वं सन्ति येऽपि त्रयोऽर्था अस्थूलाक्षरै- -र्निर्दिष्टाः प्राक्क्रीतीया वक्ष्यमाणाः, 'तस्मै हितम्' 'तदर्थं विकृतेः प्रकृतौ' 'तदस्य तदस्मिन् स्यादिति' इत्यादयः, तत्रापवादविषयं परिहृत्य छः प्रवर्तते।

२. **उगवादिभ्यो यत् १६६२।**
३. **कम्बलाच्च संज्ञायाम् १६६३।**
४. **विभाषा हविरपूपादिभ्यः १६६४।**
५. तस्मै हितम् १६६५।
६. **शरीरावयवाद्यत् १६६६।**
७. **खल-यव-माष-तिल-
वृषब्रह्मणश्च १६६८।**
८. **अजाविभ्यां थ्यन् १६६९।**
९. **आत्मन्विश्वजन-भोगोत्तर-
पदात्खः १६७०।**
१०. **सर्वपुरुषाभ्यां णढञौ १६७२।**
११. **माणव-चरकाभ्यां खञ् १६७३।**
१२ तदर्थं विकृतेः प्रकृतौ १६७४।
१३ **छदि-रुपधि-बलेर्ढञ् १६७५।**
१४. **ऋषभोपानहोर्ञ्यः १६७६।**
१५. **चर्मणोऽञ् १६७७।**

१६. तदस्य तदस्मिन्स्यादिति १६७८।

१७. **परिखाया ढञ् १६७९।**

## अथ ठञधिकारः

## प्राग्वतीयः

१८. **प्राग्वतेष्ठञ् १६८०।**

अधिकारोऽयम्। 'तेन तुल्यं क्रिया चेद् वतिः' ५.१.११५ इति सूत्रात् प्राक्। अस्य सूत्रस्य वतिशब्दोऽस्याधिकारस्यावधित्वेन गृह्यते। अतः प्रागेतस्माद् वतिसंशब्दनात् सन्ति येऽपि २७ अर्था अस्थूलाक्षरैर्निर्दिष्टाः प्राग्वतीया वक्ष्यमाणाः 'तेन क्रीतम्' 'तस्य निमित्तं संयोगोत्पातौ' इत्यादयः, तत्रापवादविषयं परिहृत्य ठञ् प्रवर्तते।

## अथ ठगधिकारः प्रागार्हीयः

१९. **आर्हादगोपुच्छसंख्या-परिमाणाट्ठक् १६८१।**

'तदर्हति ५.१.६३' इत्येतदभिव्याप्य ठञधिकारमध्ये ठञोऽपवादष्ठगधिक्रियते, गोपुच्छादीन् वर्जयित्वा। इत्थञ्चैतेष्वेकादश--स्वार्हीयेष्वर्थेषु गोपुच्छसंख्यापरिमाणादिभ्य--ष्ठञ् भवति, तदन्येभ्यष्ठगिति वेदितव्यम्। ठक्ठञोर्मध्ये स्वरे भेदः।

२०. **असमासे निष्कादिभ्यः १६८२।**

२१. **शताच्च ठन्यतावशते १६८६।**

२२. **संख्याया अतिशदन्तायाः -कन् १६८७।**

२३. **वतोरिड् वा १६८८।**

२४. **विंशतित्रिंशद्भ्यां -ड्वुन्नसंज्ञायाम् १६८९।**

२५. **कंसाट् टिठन् १६९०।**

२६. **शूर्पा-दञन्यतरस्याम् १६९१।**

२७. **शतमान-विंशतिक-सहस्र-वसनादण् १६९२।**

२८. **अध्यर्धपूर्व-द्विगोर्लुगसंज्ञायाम् १६९३।**

२९. **विभाषा कार्षापण-सहस्राभ्याम् १६९४।**

३०. **द्वित्रिपूर्वान्निष्कात् १६९५।**

३१. **बिस्ताच्च १६९६।**

३२. **विंशतिकात्खः १६९७।**

३३. **खार्या ईकन् १६९८।**

३४. **पण-पाद-माष-शताद्यत् १६९९।**

३५. **शाणाद्वा १७००।**

३६. **द्वित्रिपूर्वादण्च १७०१।**

३७. तेन क्रीतम् १७०२।

३८. तस्य निमित्तं -संयोगोत्पातौ १७०४।

३९. **गोद्व्यचोऽसंख्या-परिमाणाश्वादेर्यत् १७०५।**

४०. **पुत्राच्छ च १७०६।**

४१. **सर्वभूमि-पृथिवीभ्यामणञौ १७०७।**

४२. तस्येश्वरः १७०८।

४३. तत्र विदित इति च १७०९।

४४. **लोकसर्वलोकाट्ठञ् १७१०।**

४५. तस्य वापः १७११।

४६. **पात्रात्ष्ठन् १७१२।**

४७. तदस्मिन्वृद्ध्यायलाभ -शुल्कोपदा दीयते १७१३।

४८. पूरणार्धाट् ठन् १७१४ ।
४९. भागाद्यच्च १७१५ ।
५०. तद्धरति वहत्यावहति - भाराद्वंशादिभ्यः १७१६ ।
५१. वस्नद्रव्याभ्यां ठन्कनौ १७१७ ।
५२. संभवत्यवहरति पचति १७१८ ।
५३. आढकाचितपात्रात् - खोऽन्यतरस्याम् १७१९ ।
५४. द्विगोः ष्ठंश्च १७२० ।
५५. कुलिजाल्लुक्खौ च १७२१ ।
५६. सोऽस्यांशवस्नभृतयः १७२२ ।
५७. तदस्य परिमाणम् १७२३ ।
५८. संख्यायाः संज्ञा-सङ्घ-सूत्राध्ययनेषु १७२४ ।
५९. पंक्ति-विंशति-त्रिंशच्चत्वारिंशत्-पञ्चाशत्षष्टि-सप्तत्यशीति-नवति-शतम् १७२५ ।
६०. पञ्चद्दशतौ वर्गे वा १७२६ ।
६१. सप्तनोऽञ्छन्दसि ३४९१ ।
६२. त्रिंशच्चत्वारिंशतोर्ब्राह्मणे - संज्ञायां डण् १७२७ ।
६३. तदर्हति १७२८ ।
६४. छेदादिभ्यो नित्यम् १७२९ ।
६५. शीर्षच्छेदाद्यच्च १७३० ।
६६. दण्डादिभ्यो यः १७३१ ।
६७. छन्दसि च ३४९२ ।
६८. पात्राद् घंश्च १७३२ ।
६९. कडङ्कर-दक्षिणाच्छ च १७३३ ।
७०. स्थालीबिलात् १७३४ ।
७१. यज्ञर्त्विग्भ्यां घखञौ १७३५ ।

इत्यार्हीयाः । अतः परं ठञेव ।

७२. पारायणतुरायणचान्द्रायणं - वर्तयति १७३६ ।
७३. संशयमापन्नः १७३७ ।
७४. योजनं गच्छति १७३८ ।
७५. पथः ष्कन् १७३९ ।
७६. पन्थो ण नित्यम् १७४० ।
७७. उत्तरपथेनाहृतं च १७४१ ।

## अथ कालाधिकारः

७८. कालात् १७४२ ।

व्युष्टादिभ्योऽण् ५.१.९७' इत्यतः प्रागधिकारोऽयम् । यदित ऊर्ध्वमनुक्रमिष्यते, कालादित्येवं तद्वेदितव्यम् ।

७९. तेन निर्वृत्तम् १७४३ ।
८०. तमधीष्टो भृतो भूतो - भावी १७४४ ।
८१. मासाद्वयसि यत्खञौ १७४५ ।
८२. द्विगोर्यप् १७४६ ।
८३. षण्मासाण्ण्यच्च १७४७ ।
८४. अवयसि ठंश्च १७४८ ।
८५. समायाः खः १७४९ ।
८६. द्विगोर्वा १७५० ।
८७. रात्र्यहःसंवत्सराच्च १७५१ ।
८८. वर्षाल्लुक्च १७५३ ।
८९. चित्तवति नित्यम् १७५५ ।
९०. षष्टिकाः षष्टिरात्रेण पच्यन्ते १७५६ ।
९१. वत्सरान्ताच्छश्छन्दसि ३४९३ ।
९२. संपरिपूर्वात्ख च ३४९४ ।

९३. तेन परिजय्यलभ्यकार्य - सुकरम् १७५७।

९४. तदस्य ब्रह्मचर्यम् १७५८।

९५. **तस्य च दक्षिणा - यज्ञाख्येभ्यः १७५९।**

९६. तत्र च दीयते कार्यं - भववत् १७६०।

९७. **व्युष्टादिभ्योऽण् १७६१।**

इति कालाधिकारः

९८. **तेन यथाकथाच हस्ताभ्यां - ण-यतौ १७६२।**

९९. संपादिनि १७६३।

१००. **कर्मवेषाद्यत् १७६४।**

१०१. तस्मै प्रभवति - संतापादिभ्यः १७६५।

१०२. **योगाद्यच्च १७६६।**

१०३. **कर्मण उकञ्** १७६७।

१०४. समयस्तदस्य प्राप्तम् १७६८।

१०५. **ऋतोरण् १७६९।**

१०६. **छन्दसि घस् ३४९५।**

१०७. **कालाद्यत् १७७०।**

१०८. प्रकृष्टे ठञ् १७७१।

१०९. प्रयोजनम् १७७२।

११०. **विशाखा-षाढा-दण्मन्थ-दण्डयोः १७७३।**

१११. **अनुप्रवचनादिभ्यश्छः १७७४।**

११२. **समापनात् सपूर्वपदात् १७७५।**

११३. **ऐकागारिकट् चौरे १७७६।**

११४. **आकालिकडाद्यन्तवचने १७७७।**

इति तद्धितठञधिकारप्रकरणम।

## अव्ययतद्धितः

'तेन तुल्यं क्रियाचेद्वतिः ५.१.११४' इत्यनेन विधीयमानो वतिप्रत्ययोऽव्यय-संज्ञकः।

## वतिप्रत्ययः

११५. तेन तुल्यं क्रिया चेद्वतिः १७७८।

११६. तत्र तस्येव १७७९।

११७. तदर्हम् १७८०।

११८. उपसर्गाच्छन्दसि धात्वर्थे ३४९६।

## भावकर्मार्थकप्रत्ययाः

११९. तस्य भावस्त्वतलौ १७८१।

## त्वतलाधिकारः

१२०. **आ च त्वात् १७८२।**

अधिकारोऽयम्। 'ब्रह्मणस्त्व ५.१.१३६ इति वक्ष्यति। आ-एतस्मात् त्वसंशब्दनात् यदित ऊर्ध्वमनुक्रमिष्यते तत्र त्वतलौ प्रत्ययावधिकृतौ वेदितव्यौ।

१२१. **न नञ्पूर्वात्-तत्पुरुषा-दचतुर-संगत-लवण-वट-युध-कत-रस-लसेभ्यः १७८३।**

१२२. **पृथ्वादिभ्यः इमनिज्वा १७८४।**

१२३. **वर्णदृढादिभ्यः ष्यञ्च १७८७।**

१२४. **गुणवचनब्राह्मणादिभ्यः - कर्मणि च १७८८।**

१२५. **स्तेनाद्यन्नलोपश्च १७९०।**

१२६. **सख्युर्यः १७९१।**

१२७. **कपिज्ञात्योर्ढक् १७९२।**

१२८. **पत्यन्त-पुरोहितादिभ्यो - यक् १७९३।**

१२९. प्राणभृज्जातिवचनोद् - गात्रादिभ्योऽञ् १७९४।
१३०. हायनान्त-युवादिभ्योऽण् १७९५।
१३१. इगन्ताच्च लघुपूर्वात् १७९६।
१३२. योपधाद् गुरुपोत्तमाद् - वुञ् १७९७।
१३३. द्वन्द्व-मनोज्ञादिभ्यश्च १७९८।
१३४. गोत्रचरणाच्छ्लाघात्याकार - तदवेतेषु १७९९।
१३५. होत्राभ्यश्छः १८००।
१३६. ब्रह्मणस्त्वः १८०१।

## पञ्चमाध्याये द्वितीयः पादः

द्वितीयेऽस्मिन् पादे न कोऽपि प्रत्ययो--ऽधिक्रियते। स्फुटेष्वर्थेषु स्फुटप्रत्ययाः सन्ति। ते चार्था अग्रेऽस्थूलाक्षरैर्निर्दिश्यन्ते।

१. धान्यानां भवने क्षेत्रे खञ् १८०२।

'स्त्री-पुंसाभ्यां नञ्स्नञौ भवनात्' (४.१.८७) इत्यधिकार इतो निवृत्तः।

२. व्रीहिशाल्योर्ढक् १८०३।
३. यव-यवक-षष्टिकाद्यत् १८०४।
४. विभाषा तिल-माषोमा-भङ्गाणुभ्यः १८०५।
५. सर्वचर्मणः कृतः खखञौ १८०६।
६. यथामुखसंमुखस्य - दर्शनः खः १८०७।
७. तत्सवदिः पथ्यङ्गकर्म - पत्रपात्रं व्याप्नोति १८०८।
८. आप्रपदं प्राप्नोति १८०९।
९. अनुपदसर्वान्नायानयं - बद्धाभक्षयतिनेयेषु १८१०।
१०. परोवरपरंपरपुत्रपौत्र-मनुभवति १८११।
११. अवारपारात्यन्ता-नुकामं गामी १८१२।
१२. समां समां विजायते १८१३।
१३. अद्यश्वीनावष्टब्धे १८१४।
१४. आगवीनः १८१५।
१५. अनुग्वलंगामी १८१६।
१६. अध्वनो यत्खौ १८१७।
१७. अभ्यमित्राच्छ च १८१८।
१८. गोष्ठात्खञ्भूतपूर्वे १८१९।
१९. अश्वस्यैकाहगमः १८२०।
२०. शालीनकौपीने - अधृष्टाकार्ययोः १८२१।
२१. व्रातेन जीवति १८२२।
२२. साप्तपदीनं सख्यम् १८२३।
२३. हैयंगवीनं संज्ञायाम् १८२४।
२४. तस्य पाकमूले पील्वादि-कर्णादिभ्यः कुणब्जाहचौ १८२५।
२५. पक्षात्तिः १८२६।
२६. तेन वित्तश्चुञ्चुप्चणपौ १८२७।
२७. विनञ्भ्यां नानञौ न सह १८२८।
२८. वेः शालच्छङ्कटचौ १८२९।
२९. संप्रोदश्च कटच् १८३०।
३०. अवात्कुटारच्च १८३१।
३१. नते नासिकायाः संज्ञायां - टीटञ्नाटज्भ्रटचः १८३२।
३२. नेर्बिडज्बिरीसचौ १८३३।
३३. इनच्पिटच्चिकचि च १८३४।

३४. उपाधिभ्यां - त्यकन्नासन्नारूढयो: १८३५ ।
३५. कर्मणि घटोऽठच् १८३६ ।
३६. तदस्य संजातं तारकादिभ्य - इतच् १८३७ ।
३७. प्रमाणे - द्वयसज्दघ्नञ्मात्रच: १८३८ ।
३८. पुरुष-हस्तिभ्यामण्च १८३९ ।
३९. यत्तदेतेभ्य: परिमाणे वतुप् १८४० ।
४०. किमिदंभ्यां वो घ: १८४१ ।
४१. किम: संख्यापरिमाणे डति च १८४२ ।
४२. संख्याया अवयवे तयप् १८४३ ।
४३. द्वित्रिभ्यां तयस्यायज्वा १८४४ ।
४४. उभादुदात्तो नित्यम् १८४५ ।
४५. तदस्मिन्नधिकमिति - दशान्ताड्ड: १८४६ ।
४६. शदन्तविंशतेश्च १८४७ ।
४७. संख्याया गुणस्य - निमाने मयट् १८४८ ।
४८. तस्य पूरणे डट् १८४९ ।
४९. नान्ता-दसंख्यादेर्मट् १८५० ।
५०. थट् च छन्दसि ३४९७ ।
५१. षट्कति-कतिपय-चतुरां - थुक् १८५१ ।
५२. बहु-पूग-गण-सङ्घस्य - तिथुक् १८५२ ।
५३. वतो-रिथुक् १८५३ ।
५४. द्वेस्तीय: १८५४ ।
५५. त्रे: सम्प्रसारणं च १८५५ ।
५६. विंशत्यादिभ्यस्तमडन्य - तरस्याम् १८५६ ।
५७. नित्यं शतादि-मासार्ध-मास - संवत्सराच्च १८५७ ।
५८. षष्ट्यादेश्चासंख्यादे: १८५८ ।
५९. मतौ छ: सूक्तसाम्नो: १८५९ ।
६०. अध्यायानुवाकयोर्लुक् १८६० ।
६१. विमुक्तादिभ्योऽण् १८६१ ।
६२. गोषदादिभ्यो वुन् १८६२ ।
६३. तत्र कुशल: पथ: १८६३ ।
६४. आकर्षादिभ्य: कन् १८६४ ।
६५. धनहिरण्यात्कामे १८६५ ।
६६. स्वाङ्गेभ्य: प्रसिते १८६६ ।
६७. उदराट्ठगाद्यूने १८६७ ।
६८. सस्येन परिजात: १८६८ ।
६९. अंशं हारी १८६९ ।
७०. तन्त्रादचिरापहृते १८७० ।
७१. ब्राह्मणकोष्णिके संज्ञायाम् १८७१ ।
७२. शीतोष्णाभ्यां कारिणि १८७२ ।
७३. अधिकम् १८७३ ।
७४. अनुकाभिकाभीक: कमिता १८७४ ।
७५. पार्श्वेनान्विच्छति १८७५ ।
७६. अय:शूलदण्डाजिनाभ्यां - ठक्ठञौ १८७६ ।
७७. तावतिथं ग्रहणमिति - लुग्वा १८७७ ।
७८. स एषां ग्रामणी: १८७८ ।
७९. शृङ्खलमस्य बन्धनं करभे १८७९ ।

८०. उत्क उन्मनाः १८८० ।
८१. कालप्रयोजनाद्रोगे १८८१ ।
८२. तदस्मिन्नन्नं प्राये - संज्ञायाम् १८८२ ।
८३. **कुल्माषादञ् १८८३ ।**
८४. श्रोत्रियंश्छन्दोऽधीते १८८४ ।
८५. श्राद्धमनेन - भुक्तमिनिठनौ १८८५ ।
८६. पूर्वादिनिः १८८६ ।
८७. सपूर्वाच्च १८८७ ।
८८. **इष्टादिभ्यश्च १८८८ ।**
८९. छन्दसि परिपन्थिपरिपरिणौ - पर्यवस्थातरि १८८९ ।
९०. अनुपद्यन्वेष्टा १८९० ।
९१. साक्षाद् द्रष्टरि संज्ञायाम् १८९१ ।
९२. क्षेत्रियच्परक्षेत्रे चिकित्स्यः १८९२ ।
९३. **इन्द्रिय-मिन्द्रलिङ्ग-मिन्द्रदृष्ट - मिन्द्रसृष्ट-मिन्द्रजुष्ट- मिन्द्रदत्तमिति वा १८९३ ।**

**अथ मत्वर्थीयाः**

९४. तदस्यास्त्यस्मिन्निति मतुप् १८९४ ।
इत आरभ्यापादान्तं 'अस्य' 'अस्मिन्' इत्यर्थे प्रत्यया भवन्ति ।
९५. **रसादिभ्यश्च १८९५ ।**
९६. **प्राणिस्थादातो - लजन्यतरस्याम् १९०३ ।**
९७. **सिध्मादिभ्यश्च १९०४ ।**
९८. **वत्सांसाभ्यां कामबले १९०५ ।**
९९. **फेनादिलच्च १९०६ ।**
१००. **लोमादि-पामादि-पिच्छादिभ्यः - शनेलचः १९०७ ।**
१०१. **प्रज्ञा-श्रद्धार्चाभ्यो णः १९०८ ।**
१०२. **तपः-सहस्राभ्यां विनीनी १९०९ ।**
१०३. **अण्च १९१० ।**
१०४. **सिकता-शर्कराभ्यां च १९११ ।**
१०५. **देशे लुबिलचौ च १९१२ ।**
१०६. **दन्त उन्नत उरच् १९१३ ।**
१०७. **ऊष-शुषि-मुष्कमधो रः १९१४ ।**
१०८. **द्युद्रुभ्यां मः १९१५ ।**
१०९. **केशाद्वोऽन्यतरस्याम् १९१६ ।**
११०. **गाण्ड्यजगात्संज्ञायाम् १९१७ ।**
१११. **काण्डाण्डा-दीरन्नीरचौ १९१८ ।**
११२. **रजःकृष्यासुति-परिषदो - वलच् १९१९ ।**
११३. **दन्तशिखात्संज्ञायाम् १९२० ।**
११४. **ज्योत्स्ना-तमिस्रा-शृङ्गि - णोर्जस्विन्नूर्जस्वल- गोमिन्मलिन-मलीमसाः १९२१ ।**
११५. **अत इनिठनौ १९२२ ।**
११६. **व्रीह्यादिभ्यश्च १९२३ ।**
११७. **तुन्दादिभ्य इलच्च १९२४ ।**
११८. **एकगोपूर्वाट् ठञ्नित्यम् १९२५ ।**
११९. **शतसहस्रान्ताच्च - निष्कात् १९२६ ।**
१२०. **रूपा-दाहत-प्रशंसयोर्यप् १९२७ ।**
१२१. **अस्मायामेधास्रजो विनिः १९२८ ।**
१२२. **बहुलं छन्दसि ३४९८ ।**
१२३. **ऊर्णाया युस् १९२९ ।**
१२४. **वाचो ग्मिनिः १९३० ।**

१२५. आलजाटचौ बहुभाषिणि १९३१।
१२६. स्वामिन्नैश्वर्ये १९३२।
१२७. अर्श आदिभ्योऽच् १९३३।
१२८. द्वन्द्वोपताप-गर्ह्यात्-प्राणिस्थादिनिः १९३४।
१२९. वाताती-साराभ्यां कुक्च १९३५।
१३०. वयसि पूरणात् १९३६।
१३१. सुखादिभ्यश्च १९३७।
१३२. धर्म-शील-वर्णान्ताच्च १९३८।
१३३. हस्ताज्जातौ १९३९।
१३४. वर्णाद् ब्रह्मचारिणि १९४०।
१३५. पुष्करादिभ्यो देशे १९४१।
१३६. बलादिभ्यो-मतुबन्यतरस्याम् १९४२।
१३७. संज्ञायां मन्माभ्याम् १९४३।
१३८. कंशंभ्यां ब-भ-युस्ति-तु-त-यसः १९४४।
१३९. तुन्दि-बलि-वटेर्भः १९४५।
१४०. अहं-शुभमोर्युस् १९४६।

समर्थानां प्रथमाद्वा (४.१.८६) इत्यधिकार इतो निवृत्तः।

## पञ्चमाध्याये तृतीयः पादः

### विभक्तिसंज्ञा

१. प्राग्दिशो विभक्तिः १९४७।

### प्रकृत्यधिकारः

२. किंसर्वनाम-बहुभ्योऽद्व्यादिभ्यः १९४८।

अधिकारोऽयम्। किमः, सर्वनाम्नो, बहुशब्दाच्चेति, प्राग्दिशोऽधिक्रियते।

३. इदम इश् १९४९।
४. एतेतौ रथोः १९५०।
५. एतदोऽन् १९५१।
६. सर्वस्य सोऽन्यतरस्यां दि १९५२।

### विभक्तिसंज्ञका अव्ययसंज्ञकाश्च तद्धिताः

'पञ्चम्यास्तसिल् ५.३.७' इत आरभ्य 'दिक्शब्देभ्यः ५.३.२७' इत्यन्तं वक्ष्यमाणाः प्रत्ययाः, विभक्तिसंज्ञका अव्ययसंज्ञकाश्च सन्ति।

७. पञ्चम्यास्तसिल् १९५३।
८. तसेश्च १९५५।
९. पर्यभिभ्यां च १९५६।
१०. सप्तम्यास्त्रल् १९५७।
११. इदमो हः १९५८।
१२. किमोऽत् १९५९।
१३. वा ह च च्छन्दसि १९६१।
१४. इतराभ्योऽपि दृश्यन्ते १९६३।
१५. सर्वैकान्यकिंयत्तदः-काले दा १९६४।
१६. इदमो र्हिल् १९६५।
१७. अधुना १९६६।
१८. दानीं च १९६७।
१९. तदो दा च १९६८।
२०. तयोर्दार्हिलौ च च्छन्दसि ३४९९।
२१. अनद्यतने-र्हिलन्यतरस्याम् १९६९।
२२. सद्यः परुत्परार्यैषमः-परेद्यव्यद्य-पूर्वेद्यु-रन्येद्यु-रन्यतरेद्यु-रितरेद्यु-रपरेद्यु-रधरेद्यु-रुभयेद्यु-रुत्तरेद्युः १९७०।

२३. प्रकारवचने थाल् १९७१।
२४. इदमस्थमुः १९७२।
२५. किमश्च १९७३।
२६. था हेतौ च च्छन्दसि ३५००।

अव्ययतद्धिताः

दिक्शब्देभ्यः० ५.३.२७ इत आरभ्य 'याप्ये पाशप् ५.३.४७' इत्यतः प्राक् कथिताः प्रत्ययाः 'तसिलादयः प्राक्पाशपः' इत्यनेन अव्ययसंज्ञकाः। एषां विभक्तिसंज्ञा नास्ति।

२७. दिक्शब्देभ्यः - सप्तमीपञ्चमी-प्रथमाभ्यो - दिग्देशकालेष्वस्तातिः १९७४।
२८. दक्षिणोत्तराभ्यामतसुच् १९७८।
२९. विभाषा परावराभ्याम् १९७९।
३०. अञ्चेर्लुक् १९८०।
३१. उपर्युपरिष्टात् १९८१।
३२. पश्चात् १९८२।
३३. पश्च पश्चा च च्छन्दसि ३५०१।
३४. उत्तराधर-दक्षिणादातिः १९८३।
३५. एनबन्यतरस्या-मदूरेऽपञ्चम्याः १९८४।
३६. दक्षिणादाच् १९८५।
३७. आहि च दूरे १९८६।
३८. उत्तराच्च १९८७।
३९. पूर्वाधरावराणामसि-पुरधवश्चैषाम् १९७५।
४०. अस्ताति च १९७६।
४१. विभाषावरस्य १९७७।
४२. संख्याया विधार्थे धा १९८८।
४३. अधिकरणविचाले च १९८९।
४४. एकाद्धो - ध्यमुञन्यतरस्याम् १९९०।
४५. द्वित्र्योश्च धमुञ् १९९१।
४६. एधाच्च १९९२।
४७. याप्ये पाशप् १९९३।

इत्यव्ययतद्धिताः

४८. पूरणाद् भागे तीयादन् १९९४।
४९. प्रागेकादशभ्योऽच्छन्दसि १९९५।
५०. षष्ठाष्टमाभ्यां ञ च १९९६।
५१. मानपश्वङ्गयोः - कन्लुकौ च १९९७।
५२. एकादाकिनिच्चासहाये १९९८।
५३. भूतपूर्वे चरट् १९९९।
५४. षष्ठ्या रूप्य च २०००।

आतिशायिकप्रकरणम्

५५. अतिशायने तमबिष्ठनौ २००१।
५६. तिङश्च २००२।

'तिङश्च' इत्यनुवर्तते ५.३.९५ इति यावद्। ५८-६५। ६८-७० सूत्राणि वर्जयित्वा।

५७. द्विवचनविभज्योपपदे - तरबीयसुनौ २००५।
५८. अजादी गुणवचनादेव २००६।
५९. तुश्छन्दसि २००७।
६०. प्रशस्यस्य श्रः २००९।
६१. ज्य च २०११।
६२. वृद्धस्य च २०१३।
६३. अन्तिकबाढयोर्नेदसाधौ २०१४।
६४. युवाल्पयोः कनन्यतरस्याम् २०१९।
६५. विन्मतोर्लुक् २०२०।

## स्वार्थिकप्रत्यया:

६६. प्रशंसायां रूपप् २०२१।

६७. ईषदसमाप्तौ - कल्पब्देश्यदेशीयर: २०२२।

६८. विभाषा सुपो - बहुच्पुरस्तात्तु २०२३।

६९. प्रकारवचने जातीयर् २०२४।

## अथ काधिकार:

७०. प्रागिवात्क: २०२५।

'इवे प्रतिकृतौ ५.३.९६' इति वक्ष्यति। प्रागेतस्मादिवसंशब्दनाद् यदित ऊर्ध्वमनुक्रमिष्यते कप्रत्ययस्तेष्वधिकृतो वेदितव्य:।

७१. अव्ययसर्वनाम्ना-मकच् - प्राक्टे: २०२६।

७२. कस्य च द: २०२७।

७३. अज्ञाते २०२८।

७४. कुत्सिते २०२९।

७५. संज्ञायां कन् २०३०।

७६. अनुकम्पायाम् २०३१।

७७. नीतौ च तद्युक्तात् २०३२।

७८. बह्वचो मनुष्यनाम्नष्ठज्वा २०३३।

७९. घनिलचौ च २०३४।

८०. प्राचा-मुपादे-रडज्वुचौ च २०३६।

८१. जातिनाम्न: कन् २०३७।

८२. अजिनान्तस्योत्तरपद - लोपश्च २०३९।

८३. ठाजादा-वूर्ध्वं द्वितीयादच: २०३५।

८४. शेवल-सुपरिविशाल - वरुणार्यमादीनां तृतीयात् २०३८।

८५. अल्पे २०४०।

८६. ह्रस्वे २०४१।

८७. संज्ञायां कन् २०४२।

८८. कुटीशमी-शुण्डाभ्यो र: २०४३।

८९. कुत्वा डुपच् २०४४।

९०. कासू-गोणीभ्यां ष्टरच् २०४५।

९१. वत्सोक्षाश्वर्षभेभ्यश्च - तनुत्वे २०४६।

९२. किंयत्तदोर्निधारणे द्वयोरेकस्य - डतरच् २०४७।

९३. वा बहूनां जातिपरिप्रश्ने डतमच् २०४८।

९४. एकाच्च प्राचाम् २०४९।

९५. अवक्षेपणे कन् २०५०।

काधिकारो निवृत्त:।

९६. इवे प्रतिकृतौ २०५१।

इत 'इवे' इति अनुवर्तते ५.३.१११ इति यावत्।

९७. संज्ञायां च २०५२।

९८. लुम्मनुष्ये २०५३।

९९. जीविकार्थे चापण्ये २०५४।

१००. देवपथादिभ्यश्च २०५५।

१०१. वस्तेर्ढञ् २०५६।

१०२. शिलाया ढ: २०५७।

१०३. शाखादिभ्यो य: २०५८।

१०४. द्रव्यं च भव्ये २०५९।

१०५. कुशाग्राच्छ: २०६०।

१०६. समासाच्च तद्विषयात् २०६१।

१०७. शर्करादिभ्योऽण् २०६२।

१०८. अङ्गुल्यादिभ्यष्ठक् २०६३।

१०९. एकशालायाष्ठ-

जन्यतरस्याम् २०६४।
११०. कर्कलोहितादीकक् २०६५।
१११. प्रत्नपूर्वविश्वे-
मात्थाल्छन्दसि ३५०२।

तद्राजप्रत्ययाः

५.३.११२ इत्यत आरभ्य ५.३.११८ इत्यन्तानां प्रत्ययानां तद्राजसंज्ञा भवति। 'तद्राजस्य बहुषु तेनैवास्त्रियाम् (२.४.६२) इत्यनेन बहुषु तद्राजप्रत्ययस्य लुग्भवति।

११२. पूगाञ्ञ्योऽग्रामणीपूर्वात् २०६६।
११३. व्रातच्फञोरस्त्रियाम् ११००।
११४. आयुध-जीविसंघाञ्ञ्यड्वाहीके-
ष्वब्राह्मण-राजन्यात् २०६७।
११५. वृकाट्-टेण्यण् २०६८।
११६. दामन्यादित्रिगर्त-
षष्ठाच्छः २०६९।
११७. पर्श्वादि-यौधेयादिभ्या-
मणञौ २०७०।
११८. अभिजिद्विदभृच्छालावच्छिखा -
वच्छमीवदूर्णावच्छ्रुमदणो -
यञ् २०७१।

तद्राजसंज्ञा

११९. ञ्यादयस्तद्राजाः २०७२।

## पञ्चमाध्याये चतुर्थः पादः

१. पादशतस्य संख्यादेर्वीप्सायां -
-वुन्लोपश्च २०७३।
२. दण्डव्यवसर्गयोश्च २०७४।
३. स्थूलादिभ्यः प्रकारवचने -
कन् २०७५।
४. अनत्यन्तगतौ क्तात् २०७६।
५. न सामिवचने २०७७।
६. बृहत्या आच्छादने २०७८।
७. अषडक्षाशितङ्ग्वलङ्-
कर्मालंपुरुषाध्युत्तरपदात् -
खः २०७९।
८. विभाषाञ्चेरदिक्-
स्त्रियाम् २०८०।
९. जात्यन्ताच्छ बन्धुनि २०८१।
१०. स्थानान्ताद्विभाषा सस्थानेनेति
चेत् २०८२।

अव्ययतद्धिताः

११. किमेत्-तिङव्यय-
घादाम्वद्रव्यप्रकर्षे २००४।
१२. अमु च च्छन्दसि ३५०३।

११-१२ सूत्राभ्यां विहितौ अमु-आमु- इत्येतौ प्रत्ययावव्ययसंज्ञकौ स्तः।

१३. अनुगादिनष्ठक् २०८३।
१४. णचः स्त्रियामञ् ३२१६।
१५. अणिनुणः ३२१९।
१६. विसारिणो मत्स्ये २०८४।

अव्ययतद्धिताः

५.४.१७ इत्यतः ५.४.२० इत्यन्तानां कृत्वसुच्-सुच्-धा-प्रत्ययानाम् अव्ययसंज्ञा भवति।

१७. संख्यायाः क्रियाभ्यावृत्तिगणने
कृत्वसुच् २०८५।
१८. द्वित्रिचतुर्भ्यः सुच् २०८६।
१९. एकस्य सकृच्च २०८७।
२०. विभाषा बहोर्धा
विप्रकृष्टकाले २०८८।

इत्यव्ययतद्धिताः

२१. तत्प्रकृतवचने मयट् २०८९ ।

२२. समूहवच्च बहुषु २०९० ।

२३. अनन्ता-वसथेतिह-
भेषजाञ्ञ्यः २०९१ ।

२४. देवतान्तात्तादर्थ्ये यत् २९९२ ।

२५. पादार्घाभ्यां च २०९३ ।

२६. अतिथेर्ञ्यः २०९४ ।

२७. देवात्तल् २०९५ ।

२८. अवेः कः २०९६ ।

२९. यावादिभ्यः कन् २०९७ ।

३०. लोहितान्मणौ २०९८ ।

३१. वर्णे चानित्ये २०९९ ।

३२. रक्ते २१०० ।

३३. कालाच्च २१०१ ।

३४. विनयादिभ्यष्ठक् २१०२ ।

३५. वाचो व्याहृतार्थायाम् २१०३ ।

३६. तद्युक्तात्कर्मणोऽण् २१०४ ।

३७. ओषधे-रजातौ २१०५ ।

३८. प्रज्ञादिभ्यश्च २१०६ ।

३९. मृदस्तिकन् २१०७ ।

४०. सस्नौ प्रशंसायाम् २१०८ ।

४१. वृकज्येष्ठाभ्यां तिल्तातिलौ -
च च्छन्दसि ३५०४ ।

अथाव्ययतद्धिताः

'बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् ५.४.४२' इत्यारभ्य प्राक् 'समासान्ताः ५.४. ६८' इति प्रत्ययाः 'शस्प्रभृतयः प्राक् समासान्तेभ्यः' इत्यनेनाव्ययसंज्ञकाः ।

४२. बह्वल्पार्थाच्छस्कारकादन्य -
तरस्याम् २१०९ ।

४३. संख्यैकवचनाच्च -
वीप्सायाम् २११० ।

४४. प्रतियोगे पञ्चम्यास्तसिः २१११ ।

४५. अपादाने चाहीयरुहोः २११२ ।

४६. अतिग्रहा-व्यथन-क्षेपेष्वकर्तरि -
तृतीयायाः २११३ ।

४७. हीयमान-पापयोगाच्च २११४ ।

४८. षष्ठ्या व्याश्रये २११५ ।

४९. रोगाच्चापनयने २११६ ।

५०. कृभ्वस्तियोगे संपद्यकर्तरि -
च्विः २११७ ।

५१. अरुर्मनश्चक्षुश्चेतो-रहो-
रजसां लोपश्च २१२१ ।

५२. विभाषा साति कार्त्स्न्ये २१२२ ।

५३. अभिविधौ संपदा च २१२४ ।

५४. तदधीनवचने २१२५ ।

५५. देये त्रा च २१२६ ।

५६. देव-मनुष्य-पुरुष-पुरु-मर्त्येभ्यो -
द्वितीया-सप्तम्योर्बहुलम् २१२७ ।

५७. अव्यक्तानुकरणाद् -
द्व्यजवरार्धा-दनितौ डाच् २१२८ ।

५८. कृञो द्वितीय-तृतीय -
शम्ब-बीजात्कृषौ २१२९ ।

५९. संख्यायाश्च गुणान्तायाः २१३० ।

६०. समयाच्च यापनायाम् २१३१ ।

६१. सपत्र-निष्पत्रा-
दतिव्यथने २१३२ ।

६२. निष्कुलान्निष्कोषणे २१३३ ।

६३. सुखप्रिया-दानुलोम्ये २१३४ ।

६४. दुःखात्प्रातिलोम्ये २१३५ ।

६५. शूलात्पाके २१३६ ।
६६. सत्या-दशपथे २१३७ ।
६७. मद्रात्परिवापणे २१३८ ।

### समासान्ताधिकारः

६८. समासान्ताः ६७६ ।

अधिकारोऽयम्। आपादपरिसमाप्तेर्ये प्रत्यया विहितास्ते समासस्यान्तावयवा एकदेशा भवन्ति, तद्ग्रहणेन गृह्यन्त इति वेदितव्यम्।

६९. न पूजनात् ९५४ ।
७०. किमः क्षेपे ९५५ ।
७१. नञस्तत्पुरुषात् ९५६ ।
७२. पथो विभाषा ९५७ ।
७३. बहुव्रीहौ संख्येये - डजबहुगणात् ८५१ ।
७४. ऋक्पूरब्धूःपथामानक्षे ९४० ।
७५. अच्प्रत्यन्ववपूर्वात् - सामलोम्नः ९४३ ।
७६. अक्ष्णोऽदर्शनात् ९४४ ।
७७. अचतुर-विचतुर-सुचतुर-स्त्रीपुंस-धेन्वनडुहर्क्साम-वाङ्मनसाक्षि-भ्रुवदार-गवोर्वष्ठीव-पदष्ठीव-नक्तंदिव-रात्रिंदिवाहर्दिव-सरजस-निःश्रेयस-पुरुषायुष-द्व्यायुष-त्र्यायुषर्ग्यजुष-जातोक्ष-महोक्ष-वृद्धोक्षोपशुन-गोष्ठश्वाः ९४५ ।
७८. ब्रह्महस्तिभ्यां वर्चसः ९४६ ।
७९. अव-समन्धेभ्यस्तमसः ९४७ ।
८०. श्वसोवसीयः श्रेयसः ९४८ ।
८१. अन्ववतप्ताद्रहसः ९४९ ।
८२. प्रते-रुरसः सप्तमीस्थात् ९५० ।
८३. अनुगव-मायामे ९५१ ।
८४. द्विस्तावा त्रिस्तावा वेदिः ९५२ ।
८५. उपसर्गा-दध्वनः ९५३ ।
८६. तत्पुरुषस्याङ्गुलेः - संख्याव्ययादेः ७८६ ।
८७. अहः सर्वैकदेश-संख्यात-पुण्याच्च रात्रेः ७८७ ।
८८. अह्नोऽह्न एतेभ्यः ७९० ।
८९. न संख्यादेः समाहारे ७९३ ।
९०. उत्तमैकाभ्यां च ७९४ ।
९१. राजाहःसखिभ्यष्टच् ७८८ ।
९२. गो-रतद्धितलुकि ७२९ ।
९३. अग्राख्याया-मुरसः ७५९ ।
९४. अनोश्मायःसरसां-जाति-संज्ञयोः ७९६ ।
९५. ग्राम-कौटाभ्यां च तक्ष्णः ७९७ ।
९६. अतेः शुनः ७९८ ।
९७. उपमाना-दप्राणिषु ७९९ ।
९८. उत्तरमृग-पूर्वाच्च सक्थ्नः ८०० ।
९९. नावो द्विगोः ८०१ ।
१००. अर्धाच्च ८०२ ।
१०१. खार्याः प्राचाम् ८०३ ।
१०२. द्वित्रिभ्या-मञ्जलेः ८०४ ।
१०३. अनसन्तान्नपुंस-काच्छन्दसि ३५०५ ।
१०४. ब्रह्मणो जानपदाख्यायाम् ८०५ ।
१०५. कुमहद्भ्या-मन्यतरस्याम् ८०६ ।
१०६. द्वन्द्वाच्चुदषहान्तात्समाहारे ९३० ।

१०७. अव्ययीभावे शरत्प्रभृतिभ्यः ६७७ ।
१०८. अनश्च ६७८ ।
१०९. नपुंसका-दन्यतरस्याम् ६८० ।
११०. नदीपौर्णमास्याग्रहायणीभ्यः ६८१ ।
१११. झयः ६८२ ।
११२. गिरेश्च सेनकस्य ६८३ ।
११३. बहुव्रीहौ सक्थ्यक्ष्णोः - स्वाङ्गात्षच् ८५२ ।
११४. अङ्गुलेर्दारुणि ८५३ ।
११५. द्वित्रिभ्यां ष मूर्ध्नः ८५४ ।
११६. अप्पूरणीप्रमाण्योः ८३२ ।
११७. अन्तर्बहिर्भ्यां च लोम्नः ८५५ ।
११८. अञ्नासिकायाः संज्ञायां नसं - चास्थूलात् ८५६ ।
११९. उपसर्गाच्च ८५८ ।
१२०. सुप्रात-सुश्व-सुदिव-शारिकुक्ष-चतुरश्रैणी-पदाजपद-प्रोष्ठपदाः ८६० ।
१२१. नञ्दुःसुभ्यो हलि-सक्थ्योरन्य - तरस्याम् ८६१ ।
१२२. नित्यमसिच्प्रजामेधयोः ८६२ ।
१२३. बहुप्रजाश्छन्दसि ३५०६ ।
१२४. धर्मादनिच्केवलात् ८६३ ।
१२५. जम्भा सुहरित-तृण-सोमेभ्यः ८६४ ।
१२६. दक्षिणेर्मा लुब्धयोगे ८६५ ।
१२७. इच्कर्मव्यतिहारे ८६६ ।
१२८. द्विदण्ड्यादिभ्यश्च ८६७ ।
१२९. प्रसंभ्यां जानुनोर्ज्ञुः ८६८ ।
१३०. ऊर्ध्वाद्विभाषा ८६९ ।
१३१. ऊधसोऽनङ् ४८३ ।
१३२. धनुषश्च ८७० ।
१३३. वा संज्ञायाम् ८७१ ।
१३४. जायाया निङ् ८७२ ।
१३५. गन्धस्येदुत्पूति-सुसुरभिभ्यः ८७४ ।
१३६. अल्पाख्यायाम् ८७५ ।
१३७. उपमानाच्च ८७६ ।
१३८. पादस्य लोपोऽहस्त्यादिभ्यः ८७७ ।
१३९. कुम्भपदीषु च ८७८ ।
१४०. संख्यासुपूर्वस्य ८७९ ।
१४१. वयसि दन्तस्य दतृ ८८० ।
१४२. छन्दसि च ३५०७ ।
१४३. स्त्रियां संज्ञायाम् ८८१ ।
१४४. विभाषा श्यावारोकाभ्याम् ८८२ ।
१४५. अग्रान्त-शुद्ध-शुभ्र-वृष-वराहेभ्यश्च ८८३ ।
१४६. ककुदस्यावस्थायां लोपः ८८४ ।
१४७. त्रिककुत्पर्वते ८८५ ।
१४८. उद्विभ्यां काकुदस्य ८८६ ।
१४९. पूर्णाद्विभाषा ८८७ ।
१५०. सुहृद्-दुर्हृदौ मित्रामित्रयोः ८८८ ।
१५१. उरःप्रभृतिभ्यः कप् ८८९ ।
१५२. इनः स्त्रियाम् ८९० ।
१५३. नद्यृतश्च ८३३ ।
१५४. शेषाद्विभाषा ८९१ ।
१५५. न संज्ञायाम् ८९३ ।
१५६. ईयसश्च ८९४ ।
१५७. वन्दिते भ्रातुः ८९५ ।
१५८. ऋतश्छन्दसि ३५०८ ।

षष्ठाध्याये प्रथमः पादः

द्वित्वप्रकरणम्



अभ्याससंज्ञा



अभ्यस्तसंज्ञा



सम्प्रसारणप्रकरणम्



आत्वप्रकरणम्

४६. न व्यो लिटि २४१६ ।
४७. स्फुरतिस्फुलत्योर्घञि ३१८५ ।
४८. क्रीङ्जीनां णौ २६०० ।
४९. सिध्यते-रपारलौकिके २६०२ ।
५०. मीनाति-मिनोति-दीङां - ल्यपि च २५०८ ।
५१. विभाषा लीयतेः २५०९ ।
५२. खिदेश्छन्दसि ३५१३ ।
५३. अपगुरो णमुलि ३३७५ ।
५४. चिस्फुरोर्णौ २५६९ ।
५५. प्रजने वीयतेः २६०३ ।
५६. बिभेतेर्हेतुभये २५९३ ।
५७. नित्यं स्मयतेः २५६९ ।

अमागमप्रकरणम्

५८. सृजिदृशोर्झल्यमकिति २४०५ ।
५९. अनुदात्तस्य चर्दुपधस्यान्य - तरस्याम् २४०२ ।

प्रकृत्यादेशप्रकरणम्

६०. शीर्षंश्छन्दसि ३५१४ ।
६१. ये च तद्धिते १६६७ ।
६२. पद्दन्नोमास्हृन्निशसन्यूषन्-दोषन्-यकञ्छकन्नुदन्-नासञ् - -छस्प्रभृतिषु २२८ ।
६३. धात्वादेः षः सः २२६४ ।
६४. णो नः २२६८ ।

लोपप्रकरणम्

६५. लोपोव्योर्वलि ८७३ ।
६६. वेरपृक्तस्य ३७५ ।
६७. हल्ङ्याब्भ्यो दीर्घात् - सुतिस्यपृक्तं हल् २५२ ।
६८. एङ्ह्रस्वात्सम्बुद्धेः १९३ ।
६९. शेश्छन्दसि बहुलम् ३५१६ ।

तुगागमप्रकरणम् ६.१.७६ इत्यन्तम्

७०. ह्रस्वस्य पिति कृति तुक् २८५८ ।

**संहिताधिकारः**

७१. संहितायाम् १४५ ।

अधिकारोऽयमनुदात्तं पदमेकवर्जम् ६.१.१५६ इति यावत् । प्रागेतस्मात् सूत्रादित उत्तरं यद्वक्ष्यते, संहितायामित्येवं तदिति वेदितव्यम् ।

७२. छे च १४६ ।
७३. आङ्माङोश्च १४७ ।
७४. दीर्घात् १४८ ।
७५. पदान्ताद्वा १४९ ।

## अच्-सन्धिप्रकरणम्

यण् सन्धिः

७६. इको यणचि ४७ ।

अयादिसन्धिः

७७. एचोऽयवायावः ६१ ।
७८. वान्तो यि प्रत्यये ६३ ।
७९. धातोस्तन्निमित्तस्यैव ६४ ।
८०. क्षय्यजय्यौ शक्यार्थे ६५ ।
८१. क्रय्यस्तदर्थे ६६ ।
८२. भय्यप्रवय्ये चच्छन्दसि ३५१७ ।

**एकः पूर्वपरयोरित्यधिकारः**

८३. एकः पूर्वपरयोः ६८ ।

अधिकारोऽयं 'ख्यत्यात् परस्य ६.१.११०' इत्येतस्मात् सूत्रात् प्राग्वर्तते । इत उत्तरं यद् वक्ष्यते, तत्र पूर्वस्य परस्य द्वयोरपि स्थाने एकादेशो भवतीत्येतद् वेदितव्यम् ।

पूर्वान्तवत्त्वपरादिवत्त्वातिदेशः

८४. अन्तादिवच्च ७५ ।

असिद्धवत्त्वातिदेश

८५. षत्वतुकोरसिद्धः ३३३३ ।

गुणसन्धिः

८६. आद् गुणः ६९ ।

वृद्धिसन्धिः

८७. वृद्धिरेचि ७२ ।

८८. एत्येधत्यूठ्सु ७३ ।

८९. आटश्च २६९ ।

९०. उपसर्गादृति धातौ ७४ ।

९१. वा सुप्यापिशलेः ७७ ।

ओत आकारादेशः

९२. औतोऽम्-शसोः २८५ ।

पररूपसन्धिः

९३. एङि पररूपम् ७८ ।

९४. ओमाङोश्च ८० ।

९५. उस्यपदान्तात् २२१४ ।

९६. अतो गुणे १९१ ।

९७. अव्यक्तानुकरणस्यात इतौ ८१ ।

९८. नाम्रेडितस्यान्त्यस्य तु वा ८२ ।

सवर्णदीर्घसन्धिः

९९. अकः सवर्णे दीर्घः ८५ ।

पूर्वसवर्णदीर्घसन्धिः

१००. प्रथमयोः पूर्वसवर्णः १६४ ।

१०१. तस्माच्छसो नः पुंसि १९६ ।

१०२. नादिचि १६५ ।

१०३. दीर्घाज्जसि च २३९ ।

१०४. वा छन्दसि ३५१५ ।

पूर्वरूपसन्धिः

१०५. अमि पूर्वः १९४ ।

१०६. संप्रसारणाच्च ३३० ।

१०७. एङः पदान्तादति ८६ ।

१०८. ङसिङसोश्च २४६ ।

पूर्वपरयोरुत्त्वम्

१०९. ऋत उत् २७९ ।

११०. ख्यत्यात्परस्य २५५ ।

उत्वसन्धिः

१११. अतो रोरप्लुता-दप्लुते १६३ ।

११२. हशि च १६६ ।

प्रकृतिभावसन्धिः

११३. प्रकृत्यान्तःपादमव्यपरे ३५१८ ।

११४. अव्या-दवद्या-दवक्रमु-रव्रताय-मवन्त्ववस्युषु च ३५१९ ।

११५. यजुष्युरः ३५२० ।

११६. आपो जुषाणो वृष्णो वर्षिष्ठे-ऽम्बेऽम्बालेऽम्बिके पूर्वे ३५२१ ।

११७. अङ्ग इत्यादौ च ३५२२ ।

११८. अनुदात्ते च कुधपरे ३५२३ ।

११९. अवपथासि च ३५२४ ।

१२०. सर्वत्र विभाषा गोः ८७ ।

१२१. अवङ् स्फोटायनस्य ८८ ।

१२२. इन्द्रे च ८९ ।

१२३. प्लुतप्रगृह्या अचि नित्यम् ९० ।

१२४. आङोऽनुनासिकश्छन्दसि ३५२५ ।

१२५. इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च - ९१ ।

१२६. ऋत्यकः ९२ ।

१२७. अप्लुतवदुपस्थिते ९८ ।

१२८. ई३ चाक्रवर्मणस्य ९९ ।

पदस्य दिव उत्त्वम्

१२९. दिव उत् ३७ ।

सुलोपसन्धिः

१३०. एतत्तदोः सुलोपोऽकोरनञ्स - मासे हलि १७६।

१३१. स्यश्छन्दसि बहुलम् ३५२६।

१३२. सोऽचि लोपे चेत्पादपूरणम् १७७।

## सुट्कात्पूर्व इत्यधिकारः

अधिकारोऽयं 'पारस्करप्रभृतीनि च संज्ञायाम् ६.१.१५७' इति यावत्। इत उत्तरं यद्वक्ष्यते, तत्र सुडिति कात्पूर्व इति चैतदधिकृतं वेदितव्यम्।

१३३. सुट्कात्पूर्वः २५५३।

१३४. अडभ्यासव्यवायेऽपि २५३९।

१३५. संपरिभ्यां करोतौ भूषणे २५५०।

१३६. समवाये च २५५१।

१३७. उपात्प्रतियत्न-वैकृत-वाक्याध्याहारेषु २५५२।

१३८. किरतौ लवने २५३९।

१३९. हिंसायां प्रतेश्च २५४०।

१४०. अपाच्चतुष्पाच्छकुनिष्वा-लेखने २६८८।

१४१. कुस्तुम्बुरूणि जातिः १०५८।

१४२. अपरस्पराः क्रियासातत्ये १०५९।

१४३. गोष्पदं सेविता-सेवितप्रमाणेषु १०६०।

१४४. आस्पदं प्रतिष्ठायाम् १०६१।

१४५. आश्चर्य-मनित्ये १०६२।

१४६. वर्चस्केऽवस्करः १०६३।

१४७. अपस्करो रथाङ्गम् १०६४।

१४८. विष्किरः शकुनौ वा १०६५।

१४९. ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे ३५२७।

१५०. प्रतिष्कशश्च कशेः १०६६।

१५१. प्रस्कण्व-हरिश्चन्द्रावृषी १०६७।

१५२. मस्कर-मस्करिणौ - वेणुपरिव्राजकयोः १०६८।

१५३. कास्तीराजस्तुन्दे नगरे १०६९।

१५४. पारस्करप्रभृतीनि च - संज्ञायाम् १०७१।

## स्वरप्रकरणम् ६.२.१९९ इत्यन्तम्

परिभाषासूत्रम्

१५५. अनुदात्तं पदमेकवर्जम् ३६५०।

अन्तोदात्तस्वरः

१५६. कर्षात्वतो घञोऽन्त - उदात्तः ३६८०।

१५७. उञ्छादीनां च ३६८१।

१५८. अनुदात्तस्य च यत्रोदात्तलोपः ३६५१।

१५९. धातोः ३६७१।

१६०. चितः ३७१०।

१६१. तद्धितस्य ३७११।

१६२. कितः ३७१२।

१६३. तिसृभ्यो जसः ३७१३।

१६४. चतुरः शसि ३६८२।

१६५. सावेकाचस्तृतीयादि - र्विभक्तिः ३७१४।

१६६. अन्तोदात्ता-दुत्तरपदादन्य-तरस्या-मनित्यसमासे ३७१५।

१६७. अञ्चेश्छन्दस्य-सर्वनामस्थानम् ३७१६।

१६८. ऊडिदंपदाद्यप्पुम्रैद्युभ्यः ३७१७।

१६९. अष्टनो दीर्घात् ३७१८।

१७०. शतु-रनुमो नद्यजादी ३७१९ ।
१७१. उदात्तयणो हल्पूर्वात् ३७२० ।
१७२. नोङ्धात्वोः ३७२१ ।
१७३. ह्रस्व-नुड्भ्यां मतुप् ३७२२ ।
१७४. नामन्यतरस्याम् ३७२३ ।
१७५. ङ्याश्छन्दसि बहुलम् ३७२४ ।
१७६. षट्त्रिचतुर्भ्यो हलादिः ३७२५ ।
१७७. झल्युपोत्तमम् ३६८३ ।
१७८. विभाषा भाषायाम् ३६८४ ।
१७९. न गोश्वन्सावर्णराडङ्-
क्रुङ्-कृद्भ्यः ३७२६ ।
१८०. दिवो झल् ३७२७ ।
१८१. नृ चान्यतरस्याम् ३७२८ ।
१८२. तित्स्वरितम् ३७२९ ।
१८३. तास्यनुदात्तेन्ङिदुपदेशाल्ल-
सार्वधातुक-मनुदात्त-
मह्न्विङोः ३७३० ।

आद्युदात्तस्वरः

१८४. आदिः सिचोऽन्यतरस्याम् ३७३१ ।
१८५. स्वपादि-हिंसामच्यनिटि ३६७२ ।
१८६. अभ्यस्ताना-मादिः ३६७३ ।
१८७. अनुदात्ते च ३६७४ ।
१८८. सर्वस्य सुपि ३६८५ ।
१८९. भी-ही-भृ-हु-मद-जन-
धन-दरिद्रा-जागरां-प्रत्ययात्
पूर्वं पिति ३६७५ ।
१९०. लिति ३६७६ ।
१९१. आदिर्णमुल्यन्यतरस्याम् ३६७७ ।
१९२. अचः कर्तृयकि ३६७८ ।
१९३. थलि च सेटीडन्तो वा ३७३२ ।
१९४. ञ्नित्यादिर्नित्यम् ३६८६ ।
१९५. आमन्त्रितस्य च ३६५३ ।
१९६. पथिमथोः सर्वनामस्थाने ३६८७ ।
१९७. अन्तश्च तवै युगपत् ३६८८ ।
१९८. क्षयो निवासे ३६८९ ।
१९९. जयः करणम् ३६९० ।
२००. वृषादीनां च ३६९१ ।
२०१. संज्ञाया-मुपमानम् ३६९२ ।
२०२. निष्ठा च द्व्यजनात् ३६९३ ।
२०३. शुष्कधृष्टौ ३६९४ ।
२०४. आशितः कर्ता ३६९५ ।
२०५. रिक्ते विभाषा ३६९६ ।
२०६. जुष्टार्पिते चच्छन्दसि ३६९७ ।
२०७. नित्यं मन्त्रे ३६९८ ।
२०८. युष्मदस्मदोर्ङसि ३६९९ ।
२०९. ङयि च ३७०० ।
२१०. यतोऽनावः ३७०१ ।
२११. ईड-वन्द-वृ-शंस-दुहां
ण्यतः ३७०२ ।
२१२. विभाषा वेण्विन्धानयोः ३७०३ ।
२१३. त्याग-राग-हास-कुहश्वठ-
क्रथानाम् ३७०४ ।
२१४. उपोत्तमं रिति ३७३३ ।
२१५. चङ्यन्यतरस्याम् ३६७९ ।
२१६. मतोः पूर्वमात्संज्ञायां -
स्त्रियाम् ३७०५ ।

अन्तोदात्तस्वरः

२१७. अन्तोऽवत्याः ३७०६ ।
२१८. ईवत्याः ३७०७ ।
२१९. चौ ३६५२ ।

समासस्वरः -

२२०. **समासस्य ३७३४ ।**

**षष्ठाध्याये द्वितीयः पादः**

समासस्वरापवादाः

पूर्वपदस्य प्रकृत्या स्वरप्रकरणम्

१. **बहुव्रीहौ प्रकृत्या पूर्वपदम् ३७३५ ।**

पूर्वपदमित्यनुवर्तते । इत उत्तरं यद्वक्ष्यते, तत् पूर्वपदस्य भवतीत्येवं तद्वेदितव्यम् ।

२. **तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः ३७३६ ।**

३. **वर्णो वर्णेष्वनेते ३७३७ ।**

४. **गाधलवणयोः प्रमाणे ३७३८ ।**

५. **दायाद्यं दायादे ३७३९ ।**

६. **प्रतिबन्धि चिर-कृच्छ्रयोः ३७४० ।**

७. **पदेऽपदेशे ३७४१ ।**

८. **निवाते वातत्राणे ३७४२ ।**

९. **शारदेऽनार्तवे ३७४३ ।**

१०. **अध्वर्यु-कषाययोर्जातौ ३७४४ ।**

११. **सदृशप्रतिरूपयोः सादृश्ये ३७४५ ।**

१२. **द्विगौ प्रमाणे ३७४६ ।**

१३. **गन्तव्यपण्यं वाणिजे ३७४७ ।**

१४. **मात्रोपज्ञोपक्रमच्छाये - नपुंसके ३७४८ ।**

१५. **सुखप्रिययोर्हिते ३७४९ ।**

१६. **प्रीतौ च ३७५० ।**

१७. **स्वं स्वामिनि ३७५१ ।**

१८. **पत्यावैश्वर्ये ३७५२ ।**

१९. **न भूवाक्-चिद्-दिधिषु ३७५३ ।**

२०. **वा भुवनम् ३७५४ ।**

२१. **आशङ्का-बाध-नेदीयःसु संभावने ३७५५ ।**

२२. **पूर्वे भूतपूर्वे ३७५६ ।**

२३. **सविध-सनीड-समर्याद-सवेश-सदेशेषु सामीप्ये ३७५७ ।**

२४. **विस्पष्टादीनि - गुणवचनेषु ३७५८ ।**

२५. **श्रज्यावमकन्पापवत्सु भावे - कर्मधारये ३७५९ ।**

२६. **कुमारश्च ३७६० ।**

२७. **आदिः प्रत्येनसि ३७६१ ।**

२८. **पूगेष्वन्यतरस्याम् ३७६२ ।**

२९. **इगन्त-काल-कपाल-भगाल-शरावेषु द्विगौ ३७६३ ।**

३०. **बह्वन्यतरस्याम् ३७६४ ।**

३१. **दिष्टिवितस्त्योश्च ३७६५ ।**

३२. **सप्तमी सिद्धशुष्कपक्व-बन्धेष्वकालात् ३७६६ ।**

३३. **परिप्रत्युपापा वर्ज्यमाना-होरात्रावयवेषु ३७६७ ।**

३४. **राजन्यबहुवचनद्वन्द्वे-ऽन्धकवृष्णिषु ३७६८ ।**

३५. **संख्या ३७६९ ।**

३६. **आचार्योपसर्जनश्चान्ते - वासी ३७७० ।**

३७. **कार्त-कौजपादयश्च ३७७१ ।**

३८. **महान्व्रीह्यपराह्ण-गृष्टीष्वास-जाबाल-भार-भारत-हैलिहिल-रौरव-प्रवृद्धेषु ३७७२ ।**

३९. **क्षुल्लकश्च वैश्वदेवे ३७७३ ।**

४०. **उष्ट्रः सादिवाम्योः ३७७४ ।**

४१. गौः सादसादिसारथिषु ३७७५।
४२. कुरु-गार्हपत-रिक्त-गुर्वसूत-जरत्यश्लील-दृढरूपा पारेवडवा तैतिलकद्रूः पण्यकम्बलो दासीभाराणां च ३७७६।
४३. चतुर्थी तदर्थे ३७७७।
४४. अर्थे ३७७८।
४५. क्ते च ३७७९।
४६. कर्मधारयेऽनिष्ठा ३७८०।
४७. अहीने द्वितीया ३७८१।
४८. तृतीया कर्मणि ३७८२।
४९. गति-रनन्तरः ३७८३।
५०. तादौ च निति कृत्यतौ ३७८४।
५१. तवै चान्तश्च युगपत् ३७८५।
५२. अनिगन्तोऽञ्चतौ वप्रत्यये ३७८६।
५३. न्यधी च ३७८७।
५४. ईषदन्यतरस्याम् ३७८८।
५५. हिरण्य-परिमाणं धने ३७८९।
५६. प्रथमोऽचिरोपसंपत्तौ ३७९०।
५७. कतरकतमौ कर्मधारये ३७९१।
५८. आर्यो ब्राह्मण-कुमारयोः ३७९२।
५९. राजा च ३७९३।
६०. षष्ठी प्रत्येनसि ३७९४।
६१. क्ते नित्यार्थे ३७९५।
६२. ग्रामः शिल्पिनि ३७९६।
६३. राजा च प्रशंसायाम् ३७९७।

पूर्वपदाद्युदात्तस्वराधिकारः

६४. आदिरुदात्तः ३७९८।

इत आदिरुदात्त इत्येतदधिकृतं वेदितव्यम्। इत उत्तरं यद्वक्ष्यते, तत्र पूर्व-पदस्यादिरुदात्तो भवतीत्येवं तद्वेदितव्यम्।

६५. सप्तमीहारिणौ-धर्म्येऽहरणे ३७९९।
६६. युक्ते च ३८००।
६७. विभाषाध्यक्षे ३८०१।
६८. पापं च शिल्पिनि ३८०२।
६९. गोत्रान्तेवासि-माणव-ब्राह्मणेषु क्षेपे ३८०३।
७०. अङ्गानि मैरेये ३८०४।
७१. भक्ताख्यास्तदर्थेषु ३८०५।
७२. गो-बिडाल-सिंह-सैन्धवेषूपमाने ३८०६।
७३. अके जीविकार्थे ३८०७।
७४. प्राचां क्रीडायाम् ३८०८।
७५. अणि नियुक्ते ३८०९।
७६. शिल्पिनि चाकृञः ३८१०।
७७. संज्ञायां च ३८११।
७८. गोतन्तियवं पाले ३८१२।
७९. णिनि ३८१३।
८०. उपमानं शब्दार्थ-प्रकृतावेव ३८१४।
८१. युक्ता-रोह्यादयश्च ३८१५।
८२. दीर्घकाशतुषभ्राष्ट्रवटं जे ३८१६।
८३. अन्त्यात्पूर्वं बह्वचः ३८१७।
८४. ग्रामेऽनिवसन्तः ३८१८।
८५. घोषादिषु च ३८१९।
८६. छात्र्यादयः शालायाम् ३८२०।
८७. प्रस्थेऽवृद्धमकर्क्यादीनाम् ३८२१।
८८. मालादीनां च ३८२२।

८९. अमहन्नवं-नगरेऽनुदीचाम् ३८२३।

९०. अर्मे चावर्णं द्व्यच् त्र्यच् ३८२४।

९१. न भूताधिक-संजीव-मद्राश्मकज्जलम् ३८२५।

पूर्वपदान्तोदात्तस्वराधिकार:

९२. अन्त: ३८२६।

अन्त इत्यधिकृतम्। यदित उत्तरं वक्ष्यते, तत्र पूर्वस्यान्त उदात्तो भवतीत्येव-मधिकृतं वेदितव्यम्।

९३. सर्वं गुणकार्त्स्न्ये ३८२७।

९४. संज्ञायां गिरि-निकाययो: ३८२८।

९५. कुमार्यां वयसि ३८२९।

९६. उदकेऽकेवले ३८३०।

९७. द्विगौ क्रतौ ३८३१।

९८. सभायां नपुंसके ३८३२।

९९. पुरे प्राचाम् ३८३३।

१००. अरिष्ट-गौडपूर्वे च ३८३४।

१०१. न हास्तिन-फलक-मार्देया: ३८३५।

१०२. कुसूल-कूप-कुम्भशालं बिले ३८३६।

१०३. दिक्शब्दा ग्रामजनपदाख्यान - चानराटेषु ३८३७।

१०४. आचार्योपसर्जनश्चान्ते-वासिनि ३८३८।

१०५. उत्तरपदवृद्धौ सर्वं च ३८३९।

१०६. बहुव्रीहौ विश्वं संज्ञायाम् ३८४०।

१०७. उदराश्वेषुषु ३८४१।

१०८. क्षेपे ३८४२।

१०९. नदी बन्धुनि ३८४३।

११०. निष्ठोपसर्गपूर्व-मन्यतरस्याम् ३८४४।

उत्तरपदाद्युदात्तस्वराधिकार:

१११. उत्तरपदादि: ३८४५।

उत्तरपदादिरित्येतदधिकृतम्। यदित ऊर्ध्वमनुक्रमिष्यते, तत्र उत्तरपदस्यादिरुदात्तो भवतीत्येवमधिकृतं वेदितव्यम्। उत्तरपद--स्येत्येतदापादपरिसमाप्ते:।

११२. कर्णो वर्णलक्षणात् ३८४६।

११३. संज्ञौपम्ययोश्च ३८४७।

११४. कण्ठपृष्ठग्रीवाजङ्घं च ३८४८।

११५. शृङ्ग-मवस्थायां च ३८४९।

११६. नञो जरमर-मित्रमृता: ३८५०।

११७. सोर्मनसी अलो-मोषसी ३८५१।

११८. क्रत्वादयश्च ३८५२।

११९. आद्युदात्तं द्व्यच्छन्दसि ३८५३।

१२०. वीरवीर्यौ च ३८५४।

